ஒரு கனவு கண்டதாகவும் அதில் ஒரு மலை மீது ராமன் லக்ஷ்மணனுடன் இருக்கக் கண்டதாகவும், ராவணன் சிகப்புத்துணி அணிந்து எண்ணெய் தேய்த்துக்கொண்டு தென்திசை நோக்கி ஒரு பெண்ணால் இழுத்துச் செல்லப்படுவதாகவும் கண்டேன். இந்த சீதையின் கணவர் அரக்கர் குலத்தையே அழிக்கப்போகிறார். ஆகையால் நீங்கள் இந்த சீதைக்குத் தொந்தரவு தராமல் சீதையை சமாதானப்படுத்தினால்தான் உங்களுக்கு நன்மை உண்டு என்று கூறுதல். அரக்கிகள் தூங்குதல். சீதை துயரம் தாங்காமல் 'ஹே ராமபத்ரா' ! என்று கதறி நிற்கும் சமயம் அனுமான் சீதைக்கு ஆறுதல் ஏற்படும் விதத்தில் ஸ்ரீராமனுடைய வரலாற்றை ஆரம்பம் முதல், தான் சீதையைத் தேடி கடல் கடந்து வந்துள்ளது வரை கூறுதல். சீதை இதுவும் ராவணனுடைய மாயையோ என சந்தேகித்தல். அனுமான் 'சிம்சுபா' மரத்திலிருந்து இறங்கி தரையில் சற்று தொலைவில் வணங்கி நிற்பது கண்டு ராவணனே வானர வடிவத்துடன் வந்திருப்பதாக எண்ணி பயமடைதல். அனுமான் ராமன் அளித்த முத்திரை மோதிரத்தை சீதையிடம் கொடுத்தல். தம் வரலாற்றை விளக்கமாகக் கூறுதல். ராமன் பற்றியும் கூறி, தாயே ! என் முதுகில் ஏறிக்கொள்ளுங்கள் - தங்களைச் சுமந்து கடல் கடந்து தங்களை ஸ்ரீ ராமனிடம் சேர்ப்பிக்கிறேன் எனக்கூற, அதனை ஏற்காத சீதைக்கு அனுமார் தன் விச்வரூப வடிவத்தைக் காண்பித்தல். எனினும் சீதை, "ராமன் இங்கு வந்து அரக்கர்களைக் கொன்று என்னை அழைத்துச் செல்வதுதான் முறையாகும்" என்று கூறி மறுத்துவிடுதல். அனுமான் சீதையிடம், தாயே ! தங்கள் கூறுவதுதான் சரி. நான் இப்பொழுதே சென்று ஸ்ரீ ராமனிடம் செய்திகளைக் கூறித் தங்களை சிறை மீட்க ஆவன செய்கிறேன். தங்களை நான் கண்டதற்கு அடையாளம் தாருங்கள் எனக் கேட்க. சீதை, ஸ்ரீராமனும் சீதையும் மட்டுமே அறிந்திருந்த சில நிகழ்ச்சிகளையும் செய்திகளையும்

கூறி, சூடாமணியையும் கொடுத்தல். அனுமான் அதனை பத்திரப்படுத்திக்கொண்டு, ஒரு அறிவுமிக்க ஆற்றல் மிக்க தூதனுக்குரிய செயலைச் செய்யும் எண்ணமுடன் அசோக மரக்கிளைகளை முறித்தல் காவலர்களை அழித்தல், செய்தி அறிந்த ராவணன் பல அரக்கர்களை அனுப்ப அனுமான் அக்ஷயகுமாரன் (ராவணகுமாரன்) முதலானவர்களையும் கொல்லுதல். இந்திரஜித் அங்குவந்து ப்ரம்மாஸ்திரத்தால் அனுமனைப் பிணைத்தல். ப்ரம்மனின் வரம் பெற்ற அனுமான் கட்டுப்பட்டது போல் பாசாங்கு செய்தல் என்பது வரை கூறப்படுகிறது.

பதினாறாவது ஸர்க்கம்

ராவணசபையில் அனுமான் -அவர் ராமனைப் பற்றிக் கூறி சீதையை ராமனிடம் ஒப்படைக்கும்படி கூற - கோபம் கொண்ட ராவணன் விபீஷணனின் சொல் கேட்டு அனுமானின் வாலில் துணியைச்சுற்றி எண்ணெய் ஊற்றி எரியச்செய்ய உத்திரவிடுதல். அனுமன் வாலில் உள்ள நெருப்பு தன்னைச் சுடவில்லையே ! ஏன்? இது ராமனின் கருணையா அல்லது ராமபத்னியின் திருவருளா என வியப்புறுதல் -அனுமன் வீதியெங்கும் சென்று, வீடுகளைத் தீப்பற்றி எரியச் செய்தல்-காலதேவனே குரங்கு வடிவில் வந்துள்ளாரா ! என்று லங்கா நகர மக்கள் பயந்து ஓடுதல்-புலம்புதல். அனுமான் மறுபடி அசோக வனம் வந்து சீதையைக் கண்டு உத்திரவுபெற்று திரும்புதல் அங்கத ஜாம்பவதாதியர் அனுமான் எக்காளமிட்டு வருவது கண்டு சீதாதேவியை பார்த்த மகிழ்ச்சியில் அனுமான் ஒலியெழுப்புகிறார் என்று அறிந்து அவரை வரவேற்றல் செய்திகளை கேட்டறிந்து உடனே கிஷ்கிந்தை சென்று ராமனிடம் செய்திகளைச் சொல்லத் திரும்புதல். வழியில் மதுவனத்தை அழித்தல். ராமன்

சுக்ரீவன் சமீபம் வந்து அனுமான் செய்திகளைக் கூறி சீதை அளித்த சூடாமணியை ராமனிடம் கொடுத்தல். லங்கா நகரம் சென்று திரும்பிய செய்திகளைக் கூறுதல் வரையில் கூறப்படுகிறது.

பதினேழாவது ஸர்க்கம்

ராமன், ஆஞ்ஜனேயர் போன்ற சிறந்த பணியாட்களைக் கொண்டிருப்பதுடன், தான் உறுதி கூறியவாறு சீதையின் இருப்பிடம் அறிந்து கூறியதால் தானும், ரகுகுலமும் (தன் கௌரவமும் ரகுவின் குலத்தின் கௌரவமும்) பாதுகாக்கப்பட்டதாகக் கூறிப் புகழ்ந்து பேசுதல். அனுமனை அணைத்து மகிழ்ச்சி அடைதல் - சுக்ரீவன் ராமனிடம், உங்கள் காரணமாக வானரர்கள் தீயில் விழவும் தயாராக உள்ளார்கள். விரைவில் மலைப் பாறைகளைக் கொண்டு லங்கைக்குச் சென்று போரில் ராவணனையும் கொல்லப் போகிறீர்கள். கவலையை விடுங்கள் என்று கூறுதல். ராமன் லங்கை சென்று வந்த அனுமானிடம் லங்கா நகரத்தின் அமைப்பு பற்றியும் கோட்டை அகழ், மதில், சுவர் எங்கெங்கு வாசல்கள் என்றும், மற்றும் காவல் பற்றியும் கூறுமாறு கேட்க அனுமான் விரிவாக லங்கா நகரத்தின் எளிதில் பிரவேசிக்க முடியாத அமைப்பு பற்றிக் கூறுதல். மற்றும் இவ்விதம் கடுமையான பாதுகாப்பு உள்ள நிலையில் லங்கை இருந்தாலும் சாமான்யனாகிய நானே தனி ஒருவனாக லங்கை சென்று தங்கள் திருவருளால் நகரைத் தீக்கிரையாக்கி விட்டு சீதாபிராட்டியையும் கண்டு செய்தி அறிந்து வந்திருக்கிறேன் என்றால் இங்குள்ள குமுதன், நளன், நீலன், த்விவிதன், மைந்தன், கவாக்ஷன், கவயன், ஜாம்பவான், அங்கதன் போன்ற பல யானை பலம்

கொண்ட வீரர்கள். தலைவரின் உத்திரவுக்காகவே காத்திருக்கிற நிலையில் லங்கையும் ராவணனும் அழிந்துவிட்டதாகவே கருதலாம். வெற்றியளிக்கும் நல்ல நேரத்தில் புறப்படுங்கள். நல்ல நிமித்தங்கள் தெரிகின்றன எனக் கூறுதல், ராமன் சுக்ரீவனிடம் வானரர் படைகளை தென்திசைக் கடல் நோக்கிப் புறப்படும்படி கூறுதல். அபிஜித் எனும் முஹூர்த்தத்தில் ராமன் படைகளுடன் புறப்படுதல். தெற்கு சமுத்ரக் கரையில் நீலன் படைகளை அணிவகுத்து இருக்கச் செய்தல். ராமனும் லக்ஷ்மணனுடன் சீதை பற்றிப் பேசிவிட்டு மாலை வழிபாடு செய்து தங்குதல்.

லங்கையில் ராவணன், யாரும் புகுவதற்கு இயலாத லங்கையில் ஒரு வானர வீரன் வந்து என் மகன் அக்ஷகுமாரனையும் கொன்று ஸர்வநாசம் செய்து விட்டுச் சென்றிருக்கிறதை எண்ணும்பொழுது ராமன் சீதை பற்றியசெய்தியைக் கேட்டதும் கடலைக் கடந்து லங்கைக்கு வந்துவிடுவது நிச்சயம், என்ன செய்யலாம் எனச் சிந்தித்து, சபையைக் கூட்டி ப்ரஹஸ்தன் இந்திரஜித் முதலானோருடன் ஆலோசனை கலந்து கொள்ளுதல். ப்ரஹஸ்தன் முதலானோர் ராவணனுடைய கருத்துக்கு மாறு சொல்லக் கூடியவர்களல்ல என்பதுடன் ராவணனை மேலும் தூண்டி விடவும் செய்தல். ஆறு மாதங்களுக்கு ஒரு முறை விழித்துக்கொள்ளும் கும்பகர்ணனும் விழித்தெழுந்து செய்தி கேட்டு ராவணா! ராமனுடைய மனைவியைக் கவர்ந்து வந்து இதுகாறும் சம்பாதித்த புகழைக் கெடுத்துக்கொண்டாயே ! இதனால் லங்கை மட்டும் அழியப்போவதில்லை. நீயும் அழியப் போகிறாய் ஆனாலும் வாழ்நாளைத் தூங்கியே கழிக்கும் எனக்கு வேண்டியவற்றைச் செய்து கொடுத்துவரும்

உனக்காகப் போரிட்டு யாவரையும் அழிக்கிறேன். எனக்கூறுதல். மஹாபார்ச்வன் என்பவன் கூறிய கருத்துக்கு பதில் கூறும் முகமாக, தனக்கு புஞ்ஜிகஸ்தலை எனும் அப்ஸரஸ் பெண் அளித்த சாபத்தால் விருப்பப்படாத எந்தப் பெண்ணையும் நெருங்க முடியாது. ராமனைக் கொன்றுவிட்டால் வேறுவழியின்றி சீதை எனக்கு வயப்பட்டுவிடுவாள் என ராவனன் கூறுதல். ராவணனுடைய அருவருக்கத் தக்க பேச்சைக்கேட்டு சகியாத விபீஷணன், ராவண ! உலகில் மனதிற்கு உற்சாகமூட்டும் விதத்தில் பேசுகிறவர் அதிகம் உண்டு. ஆனால் நன்மை தரும் ஹிதமான கருத்துக்களைச் சொற்களைக் கேட்பவர் அரிதாகியதால் சொல்பவர்களும் அரிது. அரக்கர்களுக் கெல்லாம் அரசனாக இருந்துகொண்டு அற்பத்தனமாக ராமன் லக்ஷ்மணன் இல்லாத சமயத்தில் திருடன் போல் சீதையை அபகரித்து வந்துவிட்டாய். அந்த நேரம் ராமன் மட்டும் அங்கு இருந்திருந்தால் நீ உயிருடன் திரும்பியிருக்க மாட்டாய். உனக்கு நண்பர்கள் போல் நாடகமாடும் இந்த மஹாபார்ச்வன், ப்ரஹஸ்தன் போன்றவர்கள் எல்லோரும்தான் உனது சத்ருக்கள். அவர்கள் கூறிய வார்த்தைகள் உன்னை ஸர்வ நாசமாக்கும் என்பதை நீ உணரவில்லை. நீ உனது கூட்டத்தாருடன் ஜீவித்திருக்க விரும்பினால் சீதையைத் திரும்ப ராமனிடம் ஒப்படைத்து விட்டு மன்னிப்புக் கேள் என்று கூறுதல். ராவணன் மிகுந்த கோபம் கொண்டு உன்னையன்றி வேறு யாரேனும் இதைக் கூறியிருப்பின் அவனைக் கொன்று போட்டிருப்பேன். இனி நீ என் முன் நிற்காதே என்று கூறவே விபீஷணனும் கோபத்துடன் தனது மந்திரிகளுடன் எழுந்து உன் பக்கத்தில் நான் இல்லாதிருப்பின் நீ சுகமாக இருக்க முடியும் என்று எண்ணினால், உன்னையும் பாதுகாத்துக்

கொண்டு லங்கையையும் ரக்ஷித்துக் கொண்டு சுகமாக இரு என்று சொல்லிவிட்டு லங்கையை விட்டுப் புறப்பட்டு ராமனிடம் சரணாகதி அடைதல். ராமன் விபீஷணனை ஏற்றுக்கொள்ளலாமா கூடாதா என்று வானரர்களிடம் ஆலோசனை கேட்டல். சுக்ரீவன் முதலானோர் தன் உடன்பிறந்தவனையே கைவிட்டு வந்த இவனை நம்பி ஏற்பது கூடாது. என மறுத்துக்கூற, அனுமானுடைய கருத்தைக் கூறுமாறு ராமன் கேட்டல். எல்லாம் அறிந்த தங்களுக்கு நான் என்ன ஆலோசனை கூறப் போகிறேன். அநியாய வழியில் ராவணன் செல்வதை அறிந்தும், வாலியைக் கொன்று பெரும் வானர படைகளுடன் வந்துள்ள தங்கள் கை ஓங்கியிருப்பதை அறிந்தும், ராவணன் அழியப் போவது நிச்சயம் என்று ஆகிய பிறகு ராவணனுக்குப் பிறகு லங்கா ராஜ்யத்தைப் பெறலாமே என்ற ஆசையுடன் வந்துள்ள விபீஷணனை ஏற்கலாம் என்று அனுமான் கூற ராமன் சுக்ரீவனை அழைத்து உலகில் உன்போன்ற நண்பர்களும் பரதன் போன்ற தம்பிகளும் யாருக்கும் அமைவதற்கில்லை. என்னை சரணம் என்று வந்துள்ளவன் விபீஷணனாயினும் சரி, ஏன் ! ராவணனாக இருப்பினும் சரி, அவனுக்கு நான் அடைக்கலமளிப்பேன். அழைத்துவா என்று கூறுதல். விபீஷணன் நால்வருடன் ராமனை வணங்குதல் ராவணனுடைய பலம் பற்றிக் கூறுமாறு ராமன் விபீஷணனிடம் கேட்டல். ராவணன் வரம் பெற்றது முதலான செய்திகளை முழுவதும் விபீஷணன் ராமனிடம் கூறதல். ராமன் ராவணனைக் கொல்லாமல் அயோத்தித் திரும்பமாட்டேன் என சபதம் செய்தல் விபீஷண பட்டாபிஷேகம் ஆகியவை பற்றிக் கூறப்படுகிறது.

பதினெட்டாவது ஸர்க்கம் (யுத்தகாண்டம்)

இதில் கடல் அரசனைப் பணிந்தால் அவன் உதவியுடன் கடல் கடந்து செல்வது எளிதாக இருக்கும் என விபீஷணன் கூறுவது கேட்டு ராமன் தவமிருத்தல். இதற்கிடையே ராவணனால் அனுப்பபப்பட்ட சுகன் என்ற அரக்கன் பறவை வடிவத்துடன் வந்து சுக்ரீவனை நோக்கி , "வானரேந்திரா நீர் எமது நண்பர். உமது படைகளுடன் எம்பக்கம் வந்துவிடுங்கள்" என்று ராவணேச்வரன் உங்களிடம் தெரிவிக்கிறார். எனக் கூற, வானரர்கள் அவனைப் பிடித்து அடித்தல். ராமன் அவனைச் சிறை வைக்கும்படி கூறுவது வரையில் கூறப்படுகிறது.

பத்தொன்பவதாவது ஸர்க்கம்

இதில் தவமிருக்கும் ராமன், தன்னைக் கடலரசன் அலட்சியம் செய்வதாக எண்ணி வில் எடுத்து அஸ்திரத்தைத் தொடுக்க, பயன்தோடி வந்த கடலரசன், உங்கள் படையில் உள்ள நளன் என்ற வானரவீரன் கடலில் பாலம் அமைக்கட்டும். என்று கூறி மறைதல். ஸேது பந்தம் - ராமன் லங்கை கரைசேருதல் - சிறையிலிருந்த சுகனை விடுவித்து அனுப்புதல் - சுகன் கூறிய செய்தி கேட்ட ராவணன் சுகன் - ஸாரணன் இருவரையும் வானரர் வடிவத்துடன் சென்று வானரர் படையின் பலா-பலத்தை அறிந்து வர அனுப்புதல். அவர்களைப் பார்த்து விட்ட விபீஷணன் அவர்களைப் பிடித்துவரச்செய்து ராமன் முன்னிலையில் நிறுத்துதல் படைமுழுவதும் சுற்றிப் பார்த்தீர்களா இல்லையேல் விபீஷண மகாராஜா உங்களை அழைத்துச் சென்று காட்டுவார். நாளை நான் லங்கா நகரத்தை எரிக்கப் போவதாக ராவணனிடம் சொல்லுங்கள் என்று கூறி அனுப்புதல். இருவரும் ராவணனிடம் வந்து அரசே,

வானரர் படைகளைக் கண்டோம். தங்கள் தம்பியையும் சுக்ரீவனையும் கண்டோம். ராமனும் லக்ஷ்மணனும் ருத்ரர்கள் போல் இருக்கிறார்கள். லங்கையை அழிக்க வானரர் படைவேண்டாம் ராமன் லக்ஷ்மணன் சுக்ரீவன் தங்கள் தம்பி இந்த நால்வர் போதும். ஆனால் ராமன் ஒருவரே லங்கையை அழிக்கப் போதுமானவர் என்பது எங்கள் கருத்து. ஆதலின் சீதையை மறுபடி ராமனிடம் சேர்ப்பித்துப் பணிவதுதான் நல்லது எனக் கூறுதல். ராவணன் தற்பெருமை பேசியவாறு 'ஸுவேல' எனும் மலைமீது நின்று வானரர் படைகளைக் காணுதல். சுகஸாரணர்கள் ராவணனுக்கு வானரர் படையில் உள்ளவர்களைப் பெயர் கூறிக் கண்பித்தல், ராவணன் அது கண்டு மனதிற்குள் கவலையுற்றாலும் வெளியில் காண்பித்துக் கொள்ளாமல் போருக்குத் தயாராகும்படி அரக்கர் சேனாதிபதிக்கு உத்திரவிடுதல். இது ஒருபுறம் இருக்க. ராவணன் மாயாவியான வித்யுஜ் ஜிஹ்வன் என்பவனை அழைத்து ராமனுடைய தலை, வில் அம்புக்குடலை ஆகியவற்றை மாயையால் செய்யச் செய்து அதை ராவணனே எடுத்துப்போய் சீதையிடம் காண்பித்து "ராமனை அரக்கர்கள் கொன்றுவிட்டார்கள். நீ ராமன் சிறைமீட்கப்போகிறான் என்று நம்பியிருந்தது வீணாயிற்று" என்று கூற சீதை துயரம் மேலிடக் கண்ணீர் வடித்தல். இதனிடையே பிரஹஸ்தன் விசேஷச் செய்தியனுப்பவே, வாடிய முகத்துடன் ராவணன் அங்கிருந்து செல்லுதல், மாயையான ராமன் தலையும் மறைந்துவிடுதல். ஸரமா என்பவள், சீதைக்கு ஆறுதல் கூறி உண்மைச் செய்திகளையும் கூறியதோடு ராவணனுடைய தாயும், தாய் வழிப்பாட்டனாரும் ராவணனிடம் வந்து சீதையைத் திரும்ப ராமனிடம் சேர்ப்பித்துவிடுமாறு கூறியும் ராவணன் அதனைக் கேளாது அவர்களையே பயமுறுத்தி அனுப்பிவிட்டான் என்றும் கூறுதல். அழிவு நேரம் நெருங்கிவிட்ட

ராவணனின் அழிவு நிச்சயம். தான் மட்டுமல்லாது தன் இனத்தையே அழித்துவிடப் போகிறான். ஸ்ரீ ராமன் உன்னை விரைவில் சிறை மீட்டு அயோத்தி அழைத்துச் செல்லப்போகிறார். கவலை வேண்டாம் என்றும் கூறுதல் வரை வருணிக்கப்படுகிறது.

பத்தொன்பதாவது ஸர்க்கம்

இதில் படைகளைப் போருக்குத் தயார் நிலையில் இருக்கச் செய்து யார் யார் எங்கு நின்று போரிடுவதென்று தீர்மானித்தல் . அப்பால் மாலை நேரத்தில் ராமன் சுக்ரீவன் விபீஷணன் முதலானோருடன் "ஸுவேல" மலை மீது ஏறி நின்று லங்கா நகரத்தைப் பார்த்தல். அதே சமயம் ராவணன் அரண்மனை மாடத்திற்கு வந்து நிற்பதைக் கண்டு சுக்ரீவன் கடும் கோபமுடன் அவனை நோக்கிப் பாய்ந்து துவந்த்வ யுத்தம் செய்தல். யுத்தம் கடுமையாகிய பொழுது ராவணன் மாயையைத் துணைகொள்ளத் தொடங்கியதும் சுக்ரீவன் அங்கிருந்து பாய்ந்து ராம சமீபம் வருதல். ராமன் சுக்ரீவனின் அவசர புத்தியைப் பற்றிக் கூறுதல் என்ற கருத்துக்கள் கூறப்படுகின்றன.

இருபதாவது ஸர்க்கம்

இதுமுதல் 26வது ஸர்க்கம் முடிய ராமன், லக்ஷ்மணன், வானரர் படைகள் ராவணாதி அரக்கர்களுடன் செய்த கடும்போர் பற்றியும், இந்திரஜித் நாகபாசத்தால் ராமாதியரைப் பிணைத்தல். சீதையை புஷ்பக விமானத்தில் ஏற்றிச் சென்று போர்க்களத்தில் கட்டுண்டு மயங்கிய ராமலக்ஷ்மணர்களைக் காண்பித்தல். சீதையின் துயரம். த்ரிஜடை சமாதானம் செய்தல். கருடன் வருகையால் ராமன் , லக்ஷ்மணன் மயக்கம் தெளிதல். ராம ராவணயுத்தம் (முதல்போர்)

ராவணனுடைய கொடி, தேரோட்டி, குதிரைகள் யாவற்றையும் அழித்து ராவணனுடைய மகுடம் ஆயுதங்கள் யாவற்றையும் வீழ்த்தி தனியே நிற்கச் செய்து, இளைப்பாறி ஆயுத பலத்துடன் மறுபடியும் வா எனக் கூறி அனுப்புதல். அதிகாயன் முதலானோர் யுத்தம். இந்திரஜித் மறைந்திருந்து போர் செய்து ப்ரம்மாஸ்திரம் பிரயோகித்து அனைவரையும் வீழ்த்துதல். அனுமான் சஞ்ஜீவி மலை கொண்டுவருதல். மிகுந்த கஷ்டத்துடன் எழுப்பப்பட்ட கும்பகர்ணனின் வதம். இந்திரஜித் மாயா சீதையைப் போர்க்களம் கொண்டுவந்து, பலர் முன்னிலையில் தலையைச் சீவுதல். யாவரும் துயர வயப்படுதல். விபீஷணன் கூறியது கேட்டு நிகும்பிளை யாகத்தைத் தடை செய்து லக்ஷ்மணன் இந்திரஜித்தை வதம் செய்தல். மூலபலயுத்தம். ராமராவண யுத்தம் இடையில் ராவண்ன் எதிர்ப்பட்ட விபீஷணனைக் கொல்லும் எண்ணத்துடன் சக்தி ஆயுதம் பிரயோகித்தல். லக்ஷ்மணன் , அதனைத்தன் மார்பில் ஏற்று இறந்துவிடுதல். அனுமன் மறுபடி சஞ்ஜீவி மலை கொண்டுவருதல்.

இங்கு கவி புதுமையான ஒரு கற்பனை செய்திருக்கிறார். ராவணன் லங்கையில், பதினான்கு உலகமும் சேர்ந்து வந்தாலும் வெல்ல முடியாத சக்திபெற தன் மனைவி மந்தோதரியுடன் ருத்ரமூர்த்தியைக் குறித்து யாகம் செய்யும் நிமித்தம் ராமனுடையவும் சைன்யத்தினுடையவும் கவனத்தை வேறுபக்கம் திருப்பவே லக்ஷ்மணன் மீது சக்தி ஆயுத பிரயோகம் செய்திருக்கிறான் என்று விபீஷணன் மூலம் அறிந்த ராமன், அங்கதன் முதலிய மாபெரும் வீரர்களை லங்கைக்கு அனுப்பி ராவண யாகத்தை அழிக்கச் செய்தல். யாக சாலையில் மந்தோதரியைக் கண்ட

அங்கதன் ராவணனை நோக்கி, ராவணா ! நீ ராமன் இல்லாத சமயம் அவருடைய பத்னீயை அபகரித்து வந்தாய். நானோ உன் எதிரிலேயே உன் மனைவியை இழுத்துச் செல்லப் போகிறேன். முடிந்தால் தடுத்துப் பார். எனக்கூறி, அங்கதன் மந்தோதரியை இழுத்தல். ராவணன் அங்கதனை அடித்தல் - அங்கதன் தன் நெடிய வாலால் ராவணனை அடித்து ராவணனின் ரத சக்தியை எடுத்துச்செல்லுதல்-மற்ற வானர வீரர்களும் மந்தோதரி யிடம் தொந்திரவு செய்தல். யாக சாலையையும் சினனாபின்னம் ஆக்குதல். அது கண்ட ராவணன் யாக முயற்சியைக் கைவிட்டுப் போர்க்களம் புகுதல்.

(26வது ஸர்க்கத்தில் 20 ச்லோகங்களில் கூறப்பட்டுள்ள இக்கற்பனை வரலாறு வால்மீகி ராமாயணத்தில் இல்லை. ராவணன் ஒரு தவறு செய்தான் என்பதற்காக அதற்கு பதிலாக மற்றும் ஒரு தவறு செய்வது நியாயமாகிவிடாது அல்லவா. ராமன் சமீபத்தில் இருக்கையில், ராமனுடைய கொள்கைக்கு முற்றிலும் மாறான பாதகச்செயலை ராமனுடைய கட்டுப்பாட்டில் உள்ள - ராவணனுடைய அடாத யாகத்தை அழிப்பதற்காக மட்டுமே அனுப்பப்பட்ட - வானர இளவரசன் அங்கதன் செய்ததைத் தொடர்ந்து மற்ற வானர வீரர்களும் இந்தத் தவறான செயலில் சம்பந்தப்பட்டதாகக் கூறப்பட்டுள்ள இக்கற்பனைக் கருத்து முற்றிலும் ஏற்க இயலாததே. ராமசரிதத்தைக் கூறும் நூல்களுள் எந்த ஒரு நூலிலும் கூறப்படாத இக்கருத்து பெருமை சேர்ப்பதாக இல்லை.) ராம ராவண யுத்தம் கடுமையாக நடைபெறுதல். தேவேந்திரன், ராவணன் தேரிலும், ராமன் தரையிலும் நின்று போரிடுவதைப் பார்த்துவிட்டு, ராமனும் தேர்மீது நின்று போர் செய்வதே முறை. என எண்ணித் தனது

தேரை மாதலி (தேரோட்டியின் பெயர்)யோடு அனுப்புதல். கடுமையான போரில் காயமுற்று மூர்ச்சை அடைந்த ராவணன் நிலை கண்டு, திறமைசாலியான தேரோட்டி தேரைத் தனியிடம் ஓட்டிச் செல்லுதல். விழித்தெழுந்த ராவணன், ஒரு மாபெரும் வீரனோடு போரிடும்பொழுது எனது வீரத்திற்கு இழுக்கு ஏற்படும் விதத்தில் போர்க்களத்தை விட்டு விலகி வந்தது தவறு எனக் கோபித்தல். தேரோட்டி கூறிய சரியான காரணம் கேட்டு மகிழ்ந்து ராவணன் தன் கையில் அணிந்திருந்த தோடாவைக் கழற்றி அவனுக்குப் பரிசளித்தல். இதனிடையே அகஸ்த்தியர் வருகை. "ஆதித்ய ஹ்ருதய" உபதேசம்-ராமராவண யுத்தம் மிகவும் பயங்கரமாக நடைபெறுதல்-ராவணனுடைய தலையை பலமுறை ஆறுத்துத் தள்ளினாலும் மறுபடி ஒரு தலை தோன்றிய அதிசயம் கண்ட ராமனிடம் மாதலி, தேவ சபையில் "ராவணன் ப்ரம்மாஸ்தரம் ஒன்றினால்தான் மரணம் அடைவான்" என்று தேவர்கள் கூறக் கேட்டிருக் கிறேன். என்று நினைவூட்ட, ப்ரம்மாஸ்திரத்தால் ராவணவதம் என்றவாறு கூறப்படுகிறது.

இருபத்தேழாவது ஸர்க்கம்

உடன் பிறந்த ராவணனுடைய உயர்ந்த ஆற்றலையும், சிவபக்தியையும் அறிந்திருந்த விபீஷணன் ராவணன் இறந்தது கண்டு, வருந்துதல். ராவணனுடைய ப்ரதான மகிஷி மந்தோதரியும், பிற மனைவியரும் போர்க்களம் வந்து ராவணனுடைய உடல் மீது விழுந்து அழுது புலம்புதல். ராவணனுக்கு ஈமக்கடன் செய்ய மறுத்த விபீஷணனிடம் பகை என்பது மரணம் வரைதான் என ராமன் கூறுதல். விபீஷணன் ராவணனுக்கு ஈமக்கடன் செய்தல் என்பது வரை கூறப்படுகிறது.

இருபத்தெட்டாவது ஸர்க்கம்

இதில் லக்ஷ்மணன் லங்கை சென்று விபீஷணனுக்கு முடி சூட்டுதல். ராமன் அனுமனை அழைத்துச் சீதையிடம் ராவண வதம் பற்றிக் கூறி வருமாறு பணித்தல். நற்செய்தி கூறிய அனுமனுக்குச் சிறந்த பரிசு ஏதும் கொடுக்க இயலவில்லையேயென சீதை வருந்துதல். சீதையை மங்களஸ்நானம் செய்வித்து ஆடை அணிகள் அணிவித்து வருமாறு விபீஷணனிடம் கூறுதல். அவரும் அவ்விதமே சென்று சொல்லுதல். ஸ்நானம் செய்யாத இந்நிலையிலேயே ராமனைக் காண விரும்புவதாய் சீதை கூறுதல். ராமன் கூறியதை விபீஷணன் வலியுறுத்த சீதை ஸ்நானம் செய்து பட்டாடை உடுத்தி ஆபரணங்களால் அலங்கரிக்கப் பட்டு பல்லக்கில் ராமன் இருக்குமிடம் அழைத்து வரப்படுதல். ராமன், சிதையிடம் ஒரு வீரன் என்ன செய்ய வேண்டுமோ அதை நான் செய்து, என் குலத்திற்கு ஏற்பட்ட இழுக்கையும் எனது பகையையும் தீர்த்துக் கொண்டுவிட்டேன். நீ இனி எங்கு வேண்டுமானாலும் போகலாம். உன்னால் இனி ஆவது ஏதுமில்லை. கண்நோய் வந்தவன் விளக்கொளியை எவ்வாறு விரும்புகிறதில்லையோ அவ்விதமே உன்னை நான் விரும்பவில்லை. பகைவன் வீட்டில் பலகாலம் வசித்துள்ள உன்னால் எனக்கு ஆவது ஏதுமில்லை எனக் கூறுதல். அது கேட்ட சீதை, ஸ்வாமி தாங்கள் நினைப்பது போல் நான் இல்லை. என்னை நம்புங்கள். அபலையான என்னை அரக்கன் தூக்கிச்சென்றபோது நான் என்ன செய்ய முடியும். என் வசத்தில் இருந்த மனம் தங்களிடமே இருந்து வருகிறது. இன்று இவ்வாறு கூறும் தாங்கள் அனுமனை லங்கைக்கு அனுப்பிய போதே சொல்லியனுப்பியிருக்கலாமே உங்களுக்கும் உங்கள் நண்பருக்கும் இவ்வளவு கஷ்டம் ஏற்பட்டு

இருக்காதே என்று கூறி லக்ஷ்மணனை தீ மூட்டச் செய்து நான் மனம் மொழி மெய்யால் ஸ்ரீ ராமனைத் தவிர வேறில்லை என்று இருப்பது உண்மையானால் அக்னி குளிர்ச்சியடையட்டும் என்று கூறியவாறு ராமனை வலம் வந்து அக்னியில் பிரவேசித்தல். அக்னிதேவன் சீதையைப் பணிவுடன் ராமனிடம் சேர்ப்பித்தல். தேவர்கள் தோன்றி ராம! ராவணனை வதம் செய்வதற்காக வைகுண்டத்தைவிட்டு மானிட உடலை யேற்ற நீ ஸத் -சித் -ஆனந்த வடிவினன், ஸ்ரீமன் நாராயணன், இந்த சீதை உன்னைவிட்டகலாத மஹாலக்ஷ்மீ எனக் கூறுதல். சிவபெருமானும், ராம! உன் தந்தை உன்னைக் காண வந்துள்ளார் எனக் கூற. தசரதன் தன் இரு குமாரர்களையும் அணைத்து மகிழ்ந்து, "சீதே ! ராமனைத் தவறாக எண்ணாதே என்று கூறி, ராம ! உடனே அயோத்தி சென்று முடிசூட்டிக்கொண்டு தர்மநெறி தவறாமல் ஆட்சி செய்" எனக்கூறி மறைதல் என்பது வரை கூறப்படுகிறது.

இருபத்தொன்பதாவது ஸர்க்கம்

இதில் ராமன் இந்திரனின் உதவியால், கிஷ்கிந்தையிலிருந்து ராமனுக்கு உதவி செய்யவந்து போரில் இறந்த அவ்வளவு வானர வீரர்களையும் உயிர்பெறச்செய்து மகிழ்தல். அன்று இரவு அங்கு தங்கி மறுநாள் ராமன் விபீஷணனை அழைத்து வானரர்களுக்கு வேண்டிய செல்வங்களை அளித்து மகிழச் செய்து, புஷ்பகவிமானம் ஏறி அயோத்தி புறப்படும்பொழுது, சுக்ரீவன் முதலானோர் தாமும் அயோத்தி வந்து பட்டாபிஷேக வைபவம் கண்டு திரும்புவதாகக் கூற ராமன் அங்கீகரித்து, சுக்ரீவன் - அனுமான்-ஜாம்பவான் முதலான வானரர்களுடனும், விபீஷணனோடும் புஷ்பக விமானத்தில் ஏறி அயோத்திக்குக் கிளம்புதல். வான்வழியே செல்லும்பொழுது, போர்க்களம்,

சீதைக்காக கடலில் அமைத்த அணை. யாவற்றையும் சீதைக்குக் காண்பித்தவாறு பல மலைகளையும், வனங்களயும் கடந்து கிஷ்கிந்தை சேருதல். சுக்ரீவ பத்னீகளையும் அழைத்துச் செல்ல சீதை விருப்பம் தெரிவிக்க, சுக்ரீவன் இறங்கிச் சென்று தாரை முதலானோரை அழைத்து, வானரப் பெண்கள் அனைவரையும் தாமதியாமல் உடனே புறப்படச் செய் எனக் கூறி அவர்களை அழைத்து வருதல். அனைவரும் சீதையை வணங்கி அவளருகில் அமர்ந்துகொள்ள, புஷ்பகவிமானம் புறப்பட, ராமன் சீதைக்கு தண்டகாரண்யத்தில் பல இடங்களையும் காண்பித்த வண்ணம் குஹனுடைய நகரமான சிருங்கிபேரபுரம் நகரத்தையும் அங்கிருந்து தெரிந்த அயோத்தியின் உயரமான மாளிகைகளையும் காண்பித்தல். அது கண்ட வானரர்கள் அஞ்சலிசெய்து வணங்குதல். ராமன் பரத்வாஜ ஆசிரமம் சேருதல் என்பது வரை கூறப்படுகிறது.

முப்பதாவது ஸர்க்கம்

ராமன் சீதையுடனும், லக்ஷ்மணனுடனும் சென்று பரத்வாஜ முனிவரை வணங்குதல். ராமன் ராவணாதியரை வதம்செய்ததின் மூலம் உலகிற்கு அமைதியை வழங்கியது பற்றி நினைந்து ராமனுக்கு வேண்டியது எதுவாயினும் கேட்குமாறு கூற ராமன், சுவாமி ! இங்கு தொடங்கி அயோத்தி வரையிலான பூமியில் உள்ள மரங்கள் யாவும் உண்ணத் தக்க காய்கனிகளுடன் எக்காலமும் விளங்க வேண்டும் எனக் கேட்க, முனிவரும் ராமன் வானர வீரர்களின் உணவு நிமித்தம் இவ்விதம் கேட்பதை உணர்ந்து அவ்வாறே ஆகுக எனக்கூறுதல். ராமன் அனுமனை அழைத்து, “நீ உடனே அயோத்தி சென்று பரதனிடம் எனது வருகை பற்றிக் கூறு. வழியில் “சிருங்கிபேரபுரம்” என்ற

வேடுவர் ராஜ்யம் சென்று குஹனிடமும் என் வருகை பற்றிக் கூறு” என்று கூறுதல். அனுமனும் விரைந்து சென்று குஹனிடம் விபரம் அறிவித்துவிட்டு அயோத்தி அருகில் நந்திக்ராமத்தில் சத்ருக்னனுடன் இருந்துவரும் பரதனிடமும் கூறுதல். பெருமகிழ்ச்சியுற்ற பரதன் ராமனின் வருகை பற்றி எல்லோருக்கும் அறிவித்து வசிஷ்டர் முதலானோருடனும் தாய்மார்களுடனும் புஷ்பகவிமானத்தில் வரும் ராமனை எதிர்நோக்கி இருத்தல். விமானம் தரையிறங்கியதும் பரதனும் சத்ருக்னனும் விமானத்தில் ஏறி ராமன் சீதையை வணங்குதல். லக்ஷ்மணனை அணைத்து மகிழ்தல். ராமன், பரதனை சுக்ரீவன், விபீஷணன் முதலானோருக்கு அறிமுகம் செய்து வைத்தல். ராமன் விமானத்திலிருந்து இறங்கிச் சென்று, கௌஸல்யை முதலான தாய்மார்களையும், வசிஷ்டர் முதலானோரையும் வணங்குதல், பரதன் பாதுகைகளை ராமனிடம் அளித்து ராஜ்யத்தை ஏற்க வேண்டுமெனக் கூறுதல். ராமன் லக்ஷ்மணன் இருவரும் சடைமுடி அகற்றிவிட்டு முடிசூட்டு விழாவை ஏற்க வேண்டும் என்று பரதன் வேண்டிக் கொள்ளுதல். ராமன் அதனை அங்கீகரித்து, மந்திரி பிரதானிகளுக்கும் பரதன் சத்ருக்னனுக்கும் சுக்ரீவனும், வானர வீரர்களும், விபீஷணனும் செய்த அரிய உதவிகள் பற்றிக் கூறிய வண்ணம் சுமந்திரர் கொண்டு வந்த தேரில் ஏறி, நந்தி கிராமம் விட்டு அயோத்திக்குப் புறப்படுதல். ராமனின் ஆணைப்படி சுக்ரீவன் சத்ருஞ்ஜயன் எனும் யானை மீதும் மற்ற வானர வீரர்கள். பல யானைகள்மீது ஏறிக்கொண்டும் தொடர்ந்து வர, யாவரும் அயோத்தி நகரம் சேருதல். ராமன் பரதனை அழைத்து சுக்ரீவன், விபீஷணன் ஆகியோருக்கு அரண்மனைப் பகுதிகளைச் சுற்றிக் காண்பிக்கச்செய்தல் . பரதனும் அவ்வாறே செய்துவிட்டு சுக்ரீவனிடம் வந்து ராமனின்

முடிசூட்டுவிழா நிமித்தம் பல புண்ய நதிகளிலிருந்து புனித நீர் எடுத்துவர வீரர்களைப் பணிக்கும்படி கேட்டல். வானர வீரர்கள் தங்கக் கலசங்களை எடுத்துக்கொண்டு விரைந்து சென்று பல புண்ய நதிகளிலிருந்து புனித நீர் கொண்டுவருதல். வசிஷ்டர் நல்ல நேரத்தில் ராமனையும் சீதையையும் ரத்ன சிம்மாசனத்தில் அமரச்செய்து முறைப்படி பட்டாபிஷேகம் செய்தல். நாட்டு மக்களின் பெரு மகிழ்ச்சி. துந்துபி வாத்யங்களும் சங்கு முதலான வாத்யங்களும் முழங்க பட்டாபிஷேக விழா இனிது நிறைவு பெறுதல். ராமன், அங்கதன் முதலானோருக்கு மிகவும் உயர்ந்த ஆபரணங்ளைப் பரிசளித்தல். அது சமயம் இந்திரன் வாயு பகவான் மூலமாக ராமனுக்கு உயர்ந்த ரத்னஹாரம் ஒன்றை அனுப்பியதை ராமன் வாங்கி சீதைக்கு அணிவிக்கிறார். சீதை சற்று யோசனை செய்து ரத்னஹாரத்தைக் கழற்றிக் கையில் வைத்துக்கொண்டு சுற்றிலும் பார்த்துவிட்டு ராமனையும் பார்க்கிறாள். சீதையின் குறிப்பை அறிந்த ராமன் சீதே ! இந்த ரத்னஹாரத்தை நீ யாருக்கேனும் கொடுக்க விரும்பினால் கொடு என்று கூற, சீதை அதனை அனுமனுக்குக் கொடுக்கிறார். ஒருவன் அன்புடன் கொடுத்த பரிசுப் பொருளை மற்றவருக்குக் கொடுப்பதே தவறு. அவ்வாறு இருக்க சீதை அந்த ரத்னஹாரத்தை அனுமனிடம் கொடுத்தது முறைதானா ! என்றால், சீதை தான் லங்கையில் அல்லல்பட்டுத் தன் உயிரைப் போக்கிக் கொள்ள முயற்சி செய்துகொண்டிருந்த பொழுது, கடல் கடந்து லங்கை வந்து சமயம் அறிந்து பக்குவமாக ராம சரித்ரம் சொல்லியபொழுது சீதை தனக்கு உயிர்த் தண்ணீர் வார்த்ததுபோல் உணர்ந்து ஆனந்தம் அடைந்தாள். அன்றிருந்த நிலை பற்றி சீதையும் வால்மீகி முனிவருமே அறிவர். எதைவிட உயர்ந்த பொருள்

உலகில் இல்லையோ அதனை அனுமானுக்குக் கொடுக்க அன்று சீதையால் இயலவில்லை. இதை மனதில் மறைத்துப் போற்றி சந்தர்பத்திற்காகக் காத்துக்கொண்டிருந் திருக்கிறாள். இன்று மிகவும் அன்புடன் ராமன் அளித்த பரிசை சீதை உயிருக்கும் மேலாகப் போற்ற வேண்டியதே. சீதையும் இதை அறிந்தவளே. அனுமன் லங்கையில் அன்று செய்த பேருதவிக்கு சீதை தன் சொந்த முறையில் உயர்ந்ததாக எதைக் கொடுத்தால் சரியாக இருக்கும் ! எனவே யோசித்தாள். ரத்ன ஹாரத்தைத் தவிர வேறு மிகவும் உயர்ந்த மதிப்புள்ள பொருள் அப்பொழுது அவளிடம் இல்லை. இன்று கிடைத்திருக் கிறது. எனவே ராமனுடைய அனுமதி பெற்று இதனைக் கொடுத்துவிட எண்ணித்தான் ராமனைப் பார்த்தாள். சீதையின் குறிப்பறிந்துவிட்ட ராமனும் சீதைக்கு அனுமதி வழங்குகிறார்)

சுக்ரீவன் முதலான வானர வீரர்கள் ராமனிடம் அனுமதி பெற்று கிஷ்கிந்தை செல்லுதல். விபீஷணனும் ராமனால் கௌரவிக்கப்பட்டு ராமனிடம் விடை பெற்று லங்கை திரும்புதல்.

ராமன் லக்ஷ்மணனைஅழைத்து இளவரசனாகப் பொறுப்பு ஏற்குமாறு கேட்க, லக்ஷ்மணன் மறுக்கிறான். பலவகையாலும் முயன்று அவனை இளவரசுப் பொறுப்பை ஏற்கச்செய்ய முயன்றும் லக்ஷ்மணன் மறுத்துவிடவே பரதனை இளவரசனாக்குகிறார்.

இங்கு இது பற்றிக் கூற வேண்டியது ஒன்று உண்டு. ராமன் பதினான்கு ஆண்டுகள் வனத்தில் இருந்த காலத்தில் அரசைப் பாதுகைகளிடம் ஒப்படைத்தாலும்

நிர்வகித்தது பரதனேயாவான். ஆகையால் பரதனைத்தான் இளவரசுப் பொறுப்பில் இருக்கும்படி ராமன் கூறியிருக்க வேண்டும். லக்ஷ்மணனை வற்புறுத்தியது ஏன் ? 14 ஆண்டுகள் தன்னுடன் துயரத்தைப் பங்கு கொண்டான் என்பதாலா ? இல்லை. இதற்கு விடை சொல்ல அயோத்தியா காண்டம் செல்ல வேண்டும்.

தசரதன் தன் சொந்த ஏற்பாட்டின்படி ராமனுக்கு முடிசூட்ட விரும்பி, ராமனை அழைத்து ராம ! எனக்கு வயதாகிவிட்டது. குடிஜனங்களின் அளவற்ற அன்பை நீ பெற்றிருக்கிறாய். தவிர பரதனும் அருகில் இல்லாத சமயமாக இருக்கிறது. (இந்தக் கருத்து ஒரு பெரிய உட்கருத்துடன் கூறப்பட்டதாகும்) எனக்கூறி நாளை உனக்கு பட்டாபிஷேகம் என்று கூறுகிறார். ராமன் மறுக்கவில்லை. தன் இருப்பிடம் திரும்பும்பொழுது லக்ஷ்மணன் எதிர்ப்படுகிறான். பிறந்தது முதல் பிரியாமல் இருக்கும் லக்ஷ்மணனைக் கண்டதும் பட்டாபிஷேகச் செய்தியைத் தந்தை கூறியதாகக் கூறுகிறான். அப்பொழுது ராமன் ! லக்ஷ்மணா ! நான் இந்நாட்டுக்கு அரசன் என்றால் இளவரசன் நீதான் என்று சகோதர பாசத்தால் தூண்டப்பட்டுச் சொல்கிறான். லக்ஷ்மணன் அது பற்றி பதில் ஏதும் கூறவில்லை. பட்டாபிஷேகம் நின்று விடுகிறது. யாவும் தலைகீழாகிவிடுகிறது. இன்று ராமன் அரசனாகி விட்டான். இளவரசுப் பொறுப்பினை யாருக்கு அளிப்பது என்பதில் ராமனுக்கு சந்தேகம் ஏதுமிருக்கவில்லை. பரதன் தான் இளவரசுப் பதவியில் இருக்க வேண்டியவன். ஆனால் தான் முன்பு **லக்ஷ்மணனிடம் சொல்லியிருந்த வார்த்தையை லக்ஷ்மணன் மறந்திருந்தாலும் ராமன் மறந்துவிடவில்லை. அன்று ராஜ்யம் கைக்கு வராதபொழுது நீயே இளவரசன் என்று கூறிய ராமன்**

இன்று ஆட்சிக்கு வந்து அரசுமுழுக்க ராமன் பொறுப்பில் இருக்கிறபொழுது ராமன் நம்மை மறந்துவிட்டானே என்று ஒருக்கால் லக்ஷ்மணன் நினைத்துவிட்டால் !! அது ராமனுக்கு உறுத்தலாக இருந்திருக்கிறது. எனவே அயோத்யா காண்டத்தில் நடந்ததை மறவாமல் ராமன் லக்ஷ்மணனிடம் இன்று ஆட்சியில் இளவரசனாக இருக்கும்படி கேட்கிறார்.

ஸ்ரீராமன் பல்லாண்டுகள் நெறி தவறாது ஆட்சி செய்தபொழுது உரிய காலத்தில் தேவையான மழை பொழிந்து பூமி செழிப்புற்று மக்கள் மகிழ்ச்சியுடன் வாழ்ந்தனர் என்றவாறு கூறப்படுகிறது.

श्रीः

।। आर्यारामायणम् ।।

।। प्रथमः सर्गः ।।

।। श्री गणेशाय नमः ।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।।

यत्सेवानिरतानामीप्सितलाभः पदे पदे सिध्येत् ।
तं प्रणमामि गणेशं नन्दनमनुकूलमादिदम्पत्योः ।। 2

प्रणमामि तामपि गिरं यस्यां भक्तिं निरन्तरां कुर्वन् ।
मूकोऽपि वाक्पतित्वं सम्प्राप्य सभासु रञ्जयेत्प्राज्ञान् ।। 3

प्रणमन् प्रथमकवीन्द्रं कृष्णेन्द्रसरस्वतीमुनीन्द्रं च ।
अभिवन्द्य चाखिलगुरू**नार्यारामायणं** प्रवक्ष्यामि ।। 4

कथितेऽपि रामचरिते कविभिर्वाल्मीकिकालिदासाद्यैः ।
अनुयामि तत्पथमहं गरुडगतं वर्त्म किं त्यजन्ति खगाः ।। 5

स्खलितानि सन्ति यद्यपि तानि सहध्वं बुधाःप्रबन्धेऽस्मिन् ।
पदविक्षेपदशायां स्खलितानि शिशोर्हि सम्मदायैव ।। 6

अस्ति हि जगति प्रशस्ता विस्तारितसकलवस्तुसद्भावा ।
पुण्या पुरी सुपूज्या परैरयोध्येति सिद्धशब्दार्था ॥ 7

यत्र महीसुरसन्ततरचिताध्वरजातधूमसन्दोहैः ।
पूरितनयनसरोजा देवा निन्दन्ति नूनमनिमिषताम् ॥ 8

स्फटिकमणिगोपुराणां महसा ध्वान्ते निराकृते यस्याम् ।
चरति निशि शीतधामा चकोर कैरवविकासनाय परम् ॥9

यत्राभिसारिकाणां बहुलक्षणदासु सञ्चरन्तीनाम् ।
विघ्नाय दीपकृत्यं दधति प्रासादरत्नजालानि ॥ 10

यत्र ध्रुवं वधूनां कबरीभारै र्निर्जितकलापाः ।
अद्याप्यरण्यभूमौ विचरन्ति व्रीळया मयूरगणाः ॥ 11

यस्यां विलासिनीनां सौधतलेषु निशि सञ्चरन्तीनाम् ।
वक्त्रेन्दुषु निजकान्तं सम्मीलितं रोहिणी गवेषयते ॥ 12

यत्र सुदृशां विशङ्के लोचनयुगलेन कुवलयं विजितम् ।
नोचेत्कथमलिनादै रोदिति मकरन्दबाष्पभरितं तत् ॥ 13

यत्र वरवर्णिनीनां सरूपताकथनजात दोषेण ।
नाकनलेनेक्षणानां नियतं सत्राशिसङ्गमो जातः ॥ 14

पत्रपलाशाः सुदृशां कण्ठकलस्वान लब्धये यस्याम् ।
नवचूतपल्लवानलसविधेषु पिकास्तपश्चरन्तीव ॥ 15

मरकतमणिमयतुङ्गप्रासादमहः प्रोरोहजालानि ।
यत्र तृणाङ्कुरबुध्या खादितुमिच्छन्ति कमलबन्धुहयाः ॥ 16

स्नानावगाहिनीनां स्त्रीणामुत्तुङ्गकुचभराक्रान्त्या ।
उत्कूलवारिपूरा सरयूर्यस्या यिहानिमालेयः[1] (?) ॥ 17

एषा तरङ्ग हस्तैर्मुक्ता फलजालमालतीकुसुमैः ।
यस्याःकरोति पूजां फेनहसापङ्कजेक्षणा नुकलम् ॥ 18

तामध्युवास राजा दशरथनामा जगत्सु विख्यातः ।
इक्ष्वाकुवंश भूषो शेषप्रतिमानिजभुजादण्डः ॥ 19

शासति धरामशेषां शौर्यनिधौ सद्गुणालये यस्मिन् ।
कठिन्यं कुचयुगले कार्श्यं मध्ये च कातराक्षीणाम् ॥ 20

स विजित्य सकलशत्रून् साम्राज्यं प्राप्य धर्मतो रक्षन् ।
सकलाः प्रजाः प्रजेशश्चिरन्तनानामुवाह सत्कीर्तिम् ॥ 21

तस्य सुरराजकीर्तेस्तिस्रस्तन्व्यो बभूवुरतिशस्ताः ।
कौसल्या कैकेयी जगति सुमित्रेति नामतः प्रथिताः ॥ 22

काले गतेऽपि बहुले न तास्वपत्यं गुणोत्तरं लेभे ।
तत आरभत मखाग्र्यं हयमेधं माधवस्य[2] परितुष्ट्यै ॥ 23

---

1. सरयूर्यस्या हि हानिमातनुते ॥

2. परितुष्टये मधुघ्नः ॥

तस्य विभण्डकपुत्रः पुत्रीयामिष्टिमध्वरस्यान्ते ।
पुत्रार्थिनो महात्मा शान्ताभर्ता मुदा समारेभे ॥ 24

तत्रान्तरे क्रतुभुजो दशवदनोपप्लुता मुराराते: ।
अन्तिकमुपाययुस्ते पयोमुखं चातका यथा तृषिताः ॥ 25

प्राप्य क्षीरनिधिं ते पुंसः परमस्य गगनवन्नीलम् ।
गात्रं शीकरजालैस्तारकितं अनारतं प्रकुर्वन्तम् ॥ 26

तस्मिन् क्षणे सुपर्वसु दशमुखवीर्येण विगतविभवेषु ।
गतवत्सु तेषु सविधं दिष्ट्या निद्रां जहौ मुरारातिः ॥ 27

अप्राकृतं पुमांसं भद्रकरं मद्रकादि गीतिनुतम् ।
अद्राक्षुरमरनिकरा निद्रामुद्राविदूरनयनयुगम् ॥ 28

कल्लोलमालिकन्याकुचयुगलीकुङ्कुमाङ्कितोरस्कम् ।
प्राचीनवाचि विनुतं पन्नगराजन्यभोगपर्यङ्कम् ॥ 29

मञ्जीरमणिगणरुचा गात्रप्रभया नखालिकान्त्या च ।
[1]शोणाविकन्यका(?)सुरतटिनी[2]पुरश्रियं वितन्वन्तम् ॥30

भावयन्तमनिशं करुणाभरितेनालोलनयनयुगलेन ।
कैरवविकासहेतुं कामपि कान्तिं च कमलजीवातुम् ॥ 31

समशय्याभुजङ्गपुङ्गवफणावलीरत्नकान्तिसंवलनैः ।
उत्पलनीले स्वाङ्गे शङ्कां सन्ध्यातपस्य रचयन्तम् ॥ 32

---

1. शोणाद्रिकन्यकया

2. पूर

वाग्देवतामरालीकेलीभवनायमानवदनाब्जम् ।
आत्मभुवमादिमगिरां जन्मगृहं नाभि पङ्कजे दधतम् ॥ 33

अक्षीणफलदमव्ययमगोचरात्मानं अजमतीतगुणम् ।
शरणमखिलामराणां जननजरामरणहरणचरणयुगम् ॥ 34

कल्पावसानसमये स्वल्पीकृतगात्रमप्रमेयगुणम् ।
अल्पतपसामगम्यं कल्पकशाखासमुल्लसद्बाहुम् ॥ 35

कालाम्बुवाहसुषमाहङ्कृति हुङ्कारधुर्य संहननम् ।
करिवरविमोचनचरणं करुणावरुणालयं महीरमणम् ॥ 36

प्रणिपत्येत्थं तस्मै दानवहन्त्रे दयालवे देवाः ।
हर्षात्तुष्टुवुरेनं वाक्यैर्विविधोक्तिचातुरीधुर्यैः ॥ 37

चण्डकरकोटिभासुरमणिकुण्डलमण्डितोरुगण्ड विभो
अण्डजकुलेशसेवित भुवनकरण्डायितोदर नमस्ते । 38

सुरसिन्धुसूतिकागृह वामाङ्घ्रिसरोज वामन वरेण्य
विश्वत्राणपरायण विश्वाधिक पालयालय दयायाः ॥ 39

सच्चिन्मय विबुधार्चित सच्चित्त सरोजषण्डमार्ताण्ड
अच्युत मङ्गलदायक सच्चरित त्वां भजामहे शौरे । 40

वक्षोगतलक्ष्मीपद लाक्षारसपूरशोणहार विभो ।
शिक्षाकराऽसुराणां रक्षास्मान् फुल्लपुण्डरीकाक्ष । 41

शास्त्रे दैत्यकुलानां भर्त्रे दुग्धाम्बुराशिकन्यायाः ।
पात्रे समस्तजगतां धात्रे धरणेर्नमोस्तु ते विष्णो ॥ 42

स्तुत्वेति तं मुरारिं कुशलप्रश्नेन तत्कृतेन सुराः ।
सम्फुल्लहृत्सरोजा व्यजिज्ञपन् रावणान्महाभीतिम् ॥ 43

उक्त इति तैर्मुरारिर्वाचा गम्भीरयाब्रवीदेतान् ।
धिक्कृतमेघस्वनया [1]न्यक्कृततडिता भुजङ्गनिःस्वनया(?) ॥44

जनामि वःपरिभवं रचितं दशकन्धरेण घोरतरम् ।
यागादिसत्क्रियासु प्रत्यूहं चापि भूतले देवाः ॥ 45

तप्त्वा तपः सुघोरं पद्मभुवःप्रीतये पुरा सोऽयम् ।
तस्मादलभत दिव्यैरवध्यतां युद्धदुर्मदः क्रूरः ॥46

इत्यार्यारामायणे बालकाण्डे प्रथमःसर्गः ॥

---- ❖ ----

1. न्यक्कृततडिदाभदन्तनिःसृतया ।

।। द्वितीयः सर्गः ।।

न प्राप्तवान्नरेभ्यो दशवदनो वध्यतामहङ्कारात् ।
अतो दशरथसूनुर्भूत्वा तं झटिति नाशयिष्यामि । 1

यूयमपि भवथ तूर्णं भूमौ भल्लूकवानरांशैश्च ।
इत्युक्त्वा त्रिदिवेशान् अन्तरधादब्धिकन्यकानाथः ।। 2

इत्युक्तमच्युतेन श्रुत्वा वचनं श्रवः सुधाधारम् ।
निर्वृतिमभ्युपेत्य सर्वे नाकमगुः साकममरराजेन ।। 3

उदतिष्ठदथ हुताशात् अनन्तरं काम्यंकर्मणो नृपतेः ।
पुरुषः पायसपूर्णां पात्रीमादाय शातकुम्भमयीम् ।। 4

पुंसे प्रणम्य तस्मै प्राजापत्याय पार्थिवो भक्त्या ।
आदत्त हेमपात्रीं अङ्गीकृत्य स्वयम्भुवो वाचम् ।। 5

व्यभजत पयश्चरुं तं कोसलकेकयतनूजयोर्भूपः ।
ते च तदैव सुमित्रां स्वार्धांशाभ्यामुभे अयोजयताम् । 6

ताश्च बिभरांबभूवुः क्रमेण विष्णवंशगर्भितानर्भान् ।
तत्तेजसापि वृद्धाः क्ष्मापतेः प्रीतिमावहन्नक्ष्णोः ।। 7

आपाण्डुगण्डभागान्यधिकश्वसनानि विशदनयनानि ।
वदनानि वीक्ष्य तासां क्षितिपो नान्तं जगाम स प्रीतेः ।। 8

निर्भरगर्भश्रान्ता लघ्वाभरणाम्बरस्रजस्तन्व्यः ।
विजहुः स्थिरासिकायां सखीषु शय्यासु भोजनेषु रतिम् ।।9

*मेषमुपेयुषि पूषणि कौसल्या तासु मासि वैजनने[1]।
अभिमतमसूत सूनुं दानववनदहनमक्षतैश्वर्यम् ॥ 10

तस्मिन्प्रजातमात्रे कल्पद्रुमकुसुमवृष्टयः पेतुः ।
नेदुर्दिव्यमृदङ्गाः प्रसेदुराशामुखानि निखिलानि ॥ 11

मन्दं ववुः समीराः शान्ताः सदनेषु जज्वलुर्ज्वलनाः ।
महतां मनांसि च तदा शरज्जलानीव निर्मलान्यासन् ॥ 12

रम्यं सुतस्य रूपं दृष्ट्वा भूपो वसिष्ठसम्मत्या ।
राम इति नाम चक्रे संसाराब्धिं तरन्ति यत्स्मरणात् ॥ 13

कैकेय्याश्च ततोऽभूत् भरतो नाम प्रतापसम्पन्नः ।
तनयो विनीतवेषो भ्रातुर्ज्येष्ठस्य सम्मतः स्वगुणैः ॥ 14

लक्ष्मणशत्रुघ्नाख्यौ सुषुवे पुत्रौ यमौ सुमित्रापि ।
निघ्नौ निरन्तरं यौ अग्रजयोरव्ययगुणगणप्रवणौ ॥ 15

---

* रामजननविषये वाल्मीकिमतमेवं भवति - चैत्रे मासे नवम्यामिति ॥
भोजचम्पूग्रन्थरीत्या तु - सूर्ये मेषमासं गते सति रामजननमभूदिति ।
एतद्ग्रन्थकारस्तु भोजराजमतरीतिमभ्युपैति - इति निदर्शनम् ॥

रामनामकरण विषये कालिदासः रघुवंशे -

राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥ इति

तद्रीतिमालंब्य एतद्ग्रन्थकारोऽपि संसारवारिधितरणोपायतया राम इति नाम चक्रे इति कथयति ।

1. वैजनन - Last month of Pragnancy.

जातेषु तेषु राजा तत्तत्काले स जातकर्मादि ।
कृत्वा कर्म समस्तं चिराय समवाप पुत्रसौख्यानि ॥ 16

अवतरति दशरथगृहे धरणीभारापनुत्तये विष्णौ ।
अवतेरुरथ सुरगणाः कपि-ऋक्षाणां कुलेषु विविधेषु ॥ 17

सम्प्राप्तषोडशाब्दे रामे राजीवलोचनेऽमुष्मिन् ।
आनेतुमेनमागाद्विश्वामित्रः स्वसत्ररक्षायै ॥ 18

अभ्युद्गम्य मुनीन्द्रं सद्भक्त्या सत्सु वत्सलो राजा ।
अर्घ्यं तमर्घ्यपूर्वं सपर्यया पर्यपूजयद्धीमान् ॥ 19

अद्य मम जन्म सफलं त्वद्दर्शनतस्तपोनिधे धीर ।
अभ्यागमस्तवायं सिध्यै कार्यस्य कस्य मे ब्रूहि ॥ 20

इति वदति भूमिपाले कुशलं पृष्ट्वा स तस्य सम्राजः ।
स्वागमनकारणं तत्तस्मै भूपाय सम्यगाचख्यौ ॥ 21

स वसिष्ठेन समेतस्तस्मै मुनये सलक्ष्मणं रामम् ।
प्रददौ प्रभाववेदी परमर्षेः कौशिकस्य करूणाब्धेः ॥ 22

सह लक्ष्मणेन रामः पितुराज्ञां शिरसि पुष्पवद् धृत्वा ।
प्रणिपत्य तच्चरणयोः छायेव रविं तमन्वियाय मुनिम् ॥ 23

अङ्गं जनपदमाप्त्वा सरयूं समतीत्य सम्भृतस्नानः ।
प्रदिदेश दाशरथ्योः स मुनिर्विद्ये मुदा बलातिबले ॥ 24

तावपि तयोः प्रभावाद्धतश्रमौ गत इवाध्वगमनेऽपि ।
न ग्लानिमश्नुवातां न क्षुत्पीडां तथैव न पिपासाम् ॥ 25

देशान् मलद-करूशान् प्रविश्य भीमे महाटवीमध्ये ।
पुरतो भयं प्रभूतं मुनिराचख्यौ महीपतनयाय ॥ 26

शृणु राम यक्षतनया कुम्भजशापेन राक्षसी भूमौ[1] ।
तस्यां दिवं गतायां सद्यः कुसुमानि पेतुराकाशात् ॥ 27

तां लीलयैव निहतां दृष्ट्वाऽभिष्टुत्य राघवं मुनिराट् ।
तस्मै भृशाश्वदत्तान्यस्त्राणि दिदेश देवकार्यार्थम् ॥ 28

अथ वामनाश्रमपदं प्रविश्य तत्र प्रसन्नधी रामः ।
मुनिभिर्महानुभावैः कृतपूजः कार्यगौरवात्प्रययौ ॥ 29

सिद्धाश्रमं प्रविष्टे तस्मिन् रामे सलक्ष्मणे शूरे ।
उपचक्रमेऽथ यष्टुं स महर्षिः सर्वदेवसन्तुष्ट्यै ॥ 30

सत्रे प्रवर्तमाने द्वित्रेष्वादौ दिनेषु यातेषु ।
वृत्रारिशत्रवस्ते तत्र प्रत्यूहमाययुः कर्तुम् ॥ 31

---

1. अत्रेत्थं वक्तव्यमस्ति। श्लोकार्थः अपूर्ण इव भाति। अतः अत्र योजनीयतया एवं लिख्यते –

वनमिदमखिलं या खलु मुनिजनरहितं स्वकर्मणा विदधे ।
तामद्य ताटकाख्यां सहसा विनिहत्य पालयर्षिकुलम् ॥
निजघान ताटकां तां रामः सम्प्राप्तगुरुजनादेशः ॥

ससृजुर्लोहितवर्षं सिषिचुर्धाराभिरग्निगर्भाभिः[1] ।
चकृषुः सभासदस्ते ममृदुर्वेदिं च राक्षसा घोराः ॥ 32

रक्षःकृतं स रामो वैकृतमभिवीक्ष्य कोपसम्पन्नः ।
मारीचाय महास्त्रं वायव्यं धनुषि सन्दधे धीरः ॥ 33

अस्त्रेण तेन विद्धो मारीचो वारिराशिजलमध्ये ।
निपपात तं पतन्तं जलमानुषमेव मेनिरे खचराः ॥ 34

भूयस्तमपि सुबाहुं विशिखैर्विनिहत्य रक्षसां मध्ये ।
दत्वा बलिं खगानां सिद्धाश्रमशान्तिमातनोद्रामः ॥ 35

विनिवारिते विघाते मखस्य रामेण मनुजसिंहेन ।
क्रतुशेषमृत्विजस्ते क्रमेण सम्यक्समापयामासुः ॥ 36

अथ गाधिनन्दनोऽसाववभृतमवसाय्य **मुनि**वरानखिलान् ।
विधिवदभिभूज्य विद्वान् विससर्ज प्रीतिमुद्वहन् महतीम् ॥37

इत्यार्यारामायणे द्वितीयःसर्गः ॥

❖❋❖

---

1. अग्निगर्भा - Water.

॥ तृतीयः सर्गः ॥

कतिपयदिनावसाने दाशरथिभ्यां स कौशिकः साकम् ।
जनकमखवीक्षणार्थं जगाम शिष्यैः समन्वितो मिथिलाम् ॥1

देशानतीत्य सुबहून् स्ववंशतद्वंशसम्भवाश्च कथाः ।
कथयन् स राघवाभ्यां क्रमेण गङ्गामदर्शयद्विपुलाम् ॥ 2

निर्णिद्रनलिननिकरां निगमनुतां निर्जरापगां नित्याम् ।
निरयाब्धितारणतरीं निर्मललहरीं रघूद्वहोऽद्राक्षीत् ॥ 3

तुङ्गतरङ्गप्रसरां हंसकुलाक्रान्तसैकतोत्सङ्गाम् ।
मङ्गलपयःप्रवाहां गङ्गां प्रणनाम राघवो भक्त्या ॥ 4

अधिरुह्य नावमग्र्यां गाधिसुतोऽगाधवारिपूरां ताम् ।
सह रामलक्ष्मणाभ्यां ततार योगीव संसृतेर्लीलाम् ॥ 5

तत आगत्य विशालां विश्वामित्रःसराघवस्ताभ्याम् ।
निवसन्निशामनैषीत् तन्नाथेनाभिपूजितः सम्यक् ॥ 6

प्रातर्विबोध्य रामं सन्ध्यां समुपास्य राजपुत्राभ्याम् ।
अभिवन्दितः प्रतस्थे गाधिसुतो गौतमाश्रमं श्रीमत् ॥ 7

रामस्य पाजरजसा विमुक्तशापाथ गौतमस्य वधूः ।
पाषाणभावमुक्ता प्रतिपेदे स्वं पुनर्वपुर्भव्यम् ॥ 8

रामाद्विमुक्तशापा गौतमपत्नी सराजपुत्राय ।
आनीय पाद्यमर्घ्यं विश्वामित्राय सत्कृतिं चक्रे ॥ 9

आमन्त्र्य तामथ मुनिर्मिथिलोपवने महर्षिगणसेव्यम् ।
जनकस्य देवयजनं प्रतिपेदे भाविकार्यसंसिद्ध्यै ॥ 10

तस्मिन् जनकपुरोधा गौतमपुत्रो मुनिः शतानन्दः ।
सत्कारमग्र्यमकरोत् सराजपुत्राय गाधितनयाय ॥ 11

तस्मात्प्रगृह्य पूजां तत्रैवोपास्य पश्चिमां सन्ध्याम् ।
सह तैर्मुनिर्न्यवात्सीत्कथयन्मुनिभिः कथां मुनीन्द्राणाम् ॥ 12

निर्वर्त्य पूर्वसन्ध्यां प्रातर्जनकं महीपतिं द्रष्टुम् ।
प्रविवेश गाधिसूनुर्मिथिलां सहरामलक्ष्मणाभ्याम् ॥ 13

अभिगम्य जातहर्षो जनकःकुशिकान्वयं मुनिं नत्वा ।
सदसि सुधर्मासदृशे निवेशयामास विष्टरे महिते ॥ 14

पृष्ट्वाऽनामयमखिलं जनकायावेद्य तौ च दाशरथी ।
धनुरारोपणकुतुकं रामं कथयाम्बभूव तस्मै सः ॥ 15

जनको मुनिवरवचनात् कन्याशुल्कं धनुःसमानीय ।
बहुपुरुषवर्यधार्यं तस्मै रामाय दर्शयामास ॥ 16

रामः कौशिकवचनादेशं धनुरेत्य चाञ्जलिं कृत्वा ।
मन्मथ इवेक्षुचापं तच्चापं लीलयैव जग्राह ॥ 17

कृत्वाऽथ धनुरधिज्यं रामे मौर्वीं प्रकर्षति प्रबले ।
मध्येऽभज्यत भीमं तत्स्वयमेवामरैरनुद्धार्यम् ॥ 18

निर्घातपातसदृशं धनुषो भग्नस्य भैरवं निनदम् ।
आकर्ण्य भयमवापुस्त्रैलोक्यस्थानि सर्वभूतानि ॥ 19

बलिभिर्दशमुखमुख्यैरनमितपूर्वं महीपतिप्रवरैः ।
तद्वीक्ष्य रामभग्नं जगाम जनको मनोरथस्यान्तम् ॥ 20

श्रुतरामरूपवंशा श्रुत्वा रामस्य कर्म तच्चापे ।
प्रजहर्ष जनकतनया दिष्ट्या सदृशं वरं प्रपन्नेति ॥ 21

जनकः प्रशस्य रामं दशरथमानेतुमथ शतानन्दम् ।
प्रजिघाय सोऽप्ययोध्यां त्रिचतुरदिवसैरवाप कुतुकेन ॥ 22

प्रत्युद्गम्य मुनिं तं पप्रच्छागमनकारणं भूपः ।
जनकस्य स प्रतिज्ञां तस्मै रामस्य कर्म चाचख्यौ ॥ 23

श्रुत्वा मुनिवरवचनं स सदृशसम्बन्धसम्भृतप्रीतिः ।
निरगात्तदैव नगरात् सकोशदण्डः स्वसम्पदः प्रथयन् ॥24

स समासदाद मिथिलां प्रभूतरथहस्तिवाजिसम्पन्नः ।
जनकोऽभिगम्य तममुं जन्यगृहे* सद्व्यवेशयत्प्रीतः ॥ 25

जनककुशध्वजतनयाः स्वसुतानां दशरथोऽथ निर्णीय।
गोदानादि स तेषां क्रमाद्वसिष्ठेन कारयामास ॥ 26

---

* जन्यगृह – National or That whiich is created , or a place fit for Dasaratha.

कार्तान्तिकोक्तसमये सीतां रामोऽथ विधिवदुपयेमे ।
सौमित्रिरूर्मिलायाः पाणिं जग्राह जनकतनयायाः ॥ 27

भरतः कुशध्वजसुतां अतनोद् गृहिणीं च माण्डवीं नाम्ना ।
शत्रुघ्नोऽपि सुरूपां तदनु श्रुतकीर्तिमुदवहद्विधिना ॥ 28

निजसम्पदोऽनुरूपं पाणिग्रहणं विधाय स सुतानाम् ।
निरगाज्जनकविसृष्टो वधूवरैः सार्धमधिकसौभाग्यैः ॥ 29

तत आययौ महात्मा शम्भुधनुर्भङ्गसम्भृतक्रोधः ।
पथि दशरथस्य भीतिं जनयन् जमदग्निनन्दनो रामः ॥ 30

क्षत्रकुलधूमकेतुं तं भूपो वीक्ष्य वेपमानाङ्गः ।
कृत्वा पुरो वसिष्ठं सत्कारं तस्य कल्पयामास ॥ 31

न्यक्कृत्य तं स रामं दृष्ट्या ज्वालासमत्विषा पश्यन् ।
उद्यम्य परशुमुग्रं वीरो विक्रम्य तर्जयन्नाह ॥ 32

शैवं धनुः पुराणं भङ्क्त्वा महतीं ममाहरः कीर्तिम् ।
सज्यं कुरु मम चापं सज्ये त्वस्मिन् कृती भवान् लोके ॥ 33

इति वदति जामदग्न्ये स चापमादाय सविनयं रामः ।
नमयामास विनम्रे तस्मिन्नम्रः स जामदग्न्योऽपि ॥ 34

सन्धाय धनुषि बाणं रामो रामस्य वचनमकर्ण्य ।
मन्त्रेण योजयित्वा स्वर्गद्वारं रुरोध तस्यैव ॥ 35

जमदग्नितनयतेजसि धनुषा सह वैष्णवे समाविष्टे ।
शुशुभेऽधिकं स रामो निदाघसमयागमे यथा भास्वान् ।।36

संस्तुत्य परशुरामस्तं रामं राक्षसान्तकं प्रीतः ।
तपसे ययौ तदानीं महेन्द्रशैलं महर्षिगणसेव्यम्* ।। 37

आलिङ्ग्य पुत्रमग्रजमधिकप्रेम्णा शिरस्युपाघ्राय ।
स पुरीं ततः प्रतस्थे नृपतिः पूर्ण मनोरथं लब्ध्वा ।। 38

सीतावलोकिनीनां सुदृशां नेत्रोत्पलालिमालाभिः ।
आबद्धतोरणां तां अविशदयोध्यां स कोसलाधीशः ।। 39

प्रासादेषु नवेषु प्रति नवदयिता समागमप्रीताः ।
प्रीतिं परां वितेनुः पितुस्सुतास्ते परस्पराभिमताः ।। 40

इति श्री आर्यारामायणे तृतीयः सर्गः ।।

।। बालकाण्डः समाप्तः ।।

---

1. दाशरथी रामः तद्वैष्णवंधनुः परशुरामेणदत्तं आदाय किमकरोत् ? तदादायैव अयोध्यां गतो वा ?नोचेत्तस्य धनुषो वृत्तान्तः कः ? इति नात्रोपवर्ण्यते ।।

॥ चतुर्थः सर्गः ॥

अथ राजनन्दनेषु प्राप्तविवाहेषु वर्धमानेषु ।
भरतं सुतं भगिन्याः स्वपुरीं नेतुं युधाजिदभ्यागात् ॥ 1

अभ्यागताय तस्मै नरपतिरधिकं चकार सत्कारम् ।
स च दशरथं सपुत्रं दृष्ट्वा सम्मुमुदे परप्रीत्या ॥ 2

कैकेयीमपि भगिनीं बहुधा सत्कृत्य सम्पदनुरूपम् ।
तस्यै स भूषणानि प्रादाद्वासांसि च प्रशस्तानि ॥ 3

स्थित्वा कतिपयदिवसान् दशरथमामन्त्र्य तां च कैकेयीम् ।
भरतं च तदनुमत्या सानुजमादाय निर्ययौ नगरात् ॥ 4

तस्मिन् गते तु रामः पितृभक्तिप्रवणमानसो नित्यम् ।
सकलाः प्रजा गुणैःस्वैर्निवसन्नगरेऽनुरञ्जयाञ्चक्रे ॥ 5

रामे प्रजानुरागं राजा समुदीक्ष्य हर्षसम्पन्नः ।
आत्मानमपि जरन्तं युवराजं तं प्रचक्रमे कर्तुम् ॥ 6

आहूय सोऽथ सचिवान् तैःसह सम्मन्त्र्य कुलगुरोःसविधे ।
रामाभिषेकयोग्यान् सम्पादयितुं न्ययुङ्क्त सम्भारान् ॥ 7

ते च तथेति तदाज्ञां प्रतिपद्य तथैव सकलसम्भारान् ।
आनेतुमात्मपुरुषान्दत्वा वित्तं प्रचोदयामासुः ॥ 8

रामाभिषेकवार्तां रम्यां श्रुत्वा श्रवःसुधाधाराम् ।
आबालवृद्धमासन् हर्षाश्रुसमाकुलेक्षणाः सर्वे ॥ 9

केकयनृपस्य दासी [1]केकयान्मन्थरा सहायाता ।
नगरे जनस्य हर्षं निशाम्य घोराशया विषण्णाभूत् ॥ 10

साभ्येत्य साश्रुनयना कैकेयीमाह मन्थरा कुब्जा ।
जानासि न किमपि त्वं च्यवते राज्यात्सुतस्तु ते मुग्धे ॥11

लोके प्रथा तु राज्ञः प्रेमपदं त्वमिति सा वृथा जाता ।
येन युवराजपदवीं कौसल्यासूनुरेव समुपैति ॥ 12

उक्तेति निजतनूजादधिकप्रेम्णो रघूद्वहे रामे ।
सरलं हृदयं बिभेद सा क्रूरा [2] . . . .॥ 13

स्नेहं तथाविधं तं सा मुक्त्वा राघवे वचस्तस्याः ।
सत्यमिति मन्यमाना कैकेयी कोपमवनिपे चक्रे ॥ 14

अवकीर्य भूषणानि क्रोधागारं प्रविश्य कोपान्धा ।
शिश्ये विहाय शयनं क्षितितल एव प्रभूतनिःश्वासा ॥ 15

राजा तु यौवराज्ये रामं स्थापयितुमुत्सुकः प्रीत्या ।
सदसि वसिष्ठसमक्षं तमेनमाहूय वाचमित्यूचे ॥ 16

---

1. Name of a country should be used in plural. केकयात् (singular) is not proper.

2. सा क्रूराशयाऽभवदिष्ट्या ॥ अथवा सा क्रूराशयाथ कैकेय्याः । इति पाठः संगतो भाति ॥

शृणु पुत्र रामभद्र श्वः पुष्यस्तत्र यौवराज्ये त्वाम् ।
अभिषेक्ष्यामि वसिष्ठाज्ञियमं परिगृह्य वस दिवारात्रम् ॥ 17

इत्युक्त्वा स विसृष्टः पित्रा मात्रे प्रियं समाख्यातुम् ।
तस्याः प्रविश्य भवनं प्रस्तुतमस्यै निवेदयामास ॥ 18

श्रुत्वाभ्युदयगिरं तां पुत्रं परिरभ्य मूर्ध्न्युपाघ्राय ।
कौसल्या ससुमित्रा हर्षादानर्च देवताः सर्वाः ॥ 19

सचिवान् विसृज्य सर्वान् राजा सिंहासनात्समुत्थाय ।
अभ्येत्य भवनमग्र्यं कैकेय्यास्तत्र तां स नाद्राक्षीत् ॥ 20

तत्र प्रियामपश्यन् रागात्सन्तप्तमानसः कामी ।
कुत्र स्थितेति सुमुखी प्रेष्यां पप्रच्छ पार्थिवस्तस्याः ॥ 21

क्रोधभवनं गतेति प्रेष्या तस्मै व्यजिज्ञपद्राज्ञे ।
कारणमनाकलय्य व्यथितो भूपस्तदाविशद्भवनम् ॥ 22

कनकलतामिव पतितां भूमौ शोकातिरेकतो व्यथिताम् ।
पृथ्वीतले शयानां प्रियामपश्यत्स पार्थिवः खिन्नः ॥ 23

उत्तिष्ठ किन्नु शेषे को वा प्रेयसि तवाप्रियं कृतवान् ।
तं ब्रूहि तस्य शीघ्रं सम्प्रति सवसूनसून् हरिष्यामि ॥ 24

इति वदति भूमिपाले निःश्वसती सा विवृत्त्य कोपान्धा ।
आसुरसमरेऽयाचत पूर्वं दत्तं वरद्वयं प्रमदा ॥ 25

एकेन कौसलेयो वनाय निर्यातु तापसो भूत्वा ।
अन्येन नन्दनो मे नाथ प्राप्नोतु यौवराज्यपदम् ॥ 26

तामशनिपातसदृशीं वाचं श्रुत्वा महीपतिस्तस्याः ।
छिन्नस्तरुरिव मूले भूमौ निपपात मोहमापन्नः ॥ 27

उपलभ्य चेतनां च पुनरूपचारैर्विचिन्त्य रामगुणान् ।
मनसि नृपोऽथ मनोज्ञांश्चुकोप तस्यै कृतागसेऽनीशः ॥28

कुलनाशिनि कैकेयि केनेत्थं वदसि दुर्वचः क्रूरम् ।
रामं गुणाभिरामं त्यक्त्वा जीवामि कथमहं क्रूरे ॥ 29

तव यदि वचनाद्रामं विसृजेयमद्य गहनाय ।
अयशो न मुञ्चति त्वां मामप्याचन्द्रतारकं भूमौ ॥ 30

यदि वा सुखाभिलाषो यदि मां जीवन्तमिच्छसि चिराय ।
यदि वा सुतस्य सौख्यं चिकीर्षसीदं त्यजाशु दुर्व्यसनम् ॥ 31

इति वदति दशरथे सा तमाबभाषे पुनश्च सङ्क्रुद्धा ।
दत्तं वरद्वयं मे क्लिश्यसि दातुं त्वमद्य किन्न्वद्य ॥ 32

वेलामिवाम्बुराशिर्नात्येति भवान् कदापि सत्यगिरम् ।
अद्य यदि लङ्घयति तां विधिर्बलीयान्ममेति मन्येऽहम् ॥ 33

आश्रुतवराप्रदानात् दत्ताऽभरणात्प्रपन्नसन्त्यागात् ।
आशाया विहतेरप्यधमां गतिमेव यान्ति सुकृतोऽपि ॥ 34

सत्यव्रताभिसन्धिं सत्यं स्वर्गाधिरोहिणीमाहुः ।
तत्सत्यं कुरुवचनं मा गा निरयान्बहूनसत्येन ॥ 35

दत्तौ पुरा मम वरौ रामस्नेहाद्ददासि चेन्नैव ।
कस्त्वामसत्यसन्धं सत्सु श्लाघेत राघवं राजन् ॥ 36

न ददासि यदि वरौ मे किं बहुना पश्यतस्तवैवाहम् ।
पीत्वा विषमतिघोरं प्राणांस्त्यक्ष्यामि दुर्लभान् भूयः ॥ 37

तस्यां तथा वदन्त्यां लज्जामपहाय दुर्मनस्कायाम् ।
दातुं वरौ यदा तु नेशोऽभूद्धर्मसंशयापन्नः ॥ 38

बहुभिर्द्रविणविशेषै . . . . [1]
[2] . . . . तदा सा न जहौ निजमाग्रहं विधेः बलात् ॥ 39

रामाभिषेकविघ्नादस्तं हर्षे प्रयाति लोकस्य ।
कालनिशीथिनीमिव तां दृष्ट्वा राजा विमोहितः शश्वत् ॥ 40

दुःखेन तप्यमानो दौर्जन्यं मनसि चिन्तयंस्तस्याः ।
किंकर्तव्यपश्यन् राजा शोकात्समासदच्छयनम् ॥ 41

इति श्रीआर्यारामायणे चतुर्थः सर्गः ॥

---

1. प्रायततैतां नृपः प्रसादयितुम् इति अथवा एतत्सदृशं वचनान्तरं वा सङ्गच्छेत ॥

2. कैकेयी च ।

।। पञ्चमः सर्गः ।।

अत्र सर्गादौ केचन श्लोकाः न दृश्यन्ते । तत्र वर्ण्यमान-वृत्तान्तस्त्वेवं भवति । कैकेयीगृहे विषादवशङ्गतं दशरथं द्रष्टुं आगताय रामाय कैकेय्या पूर्वं दशरथप्रतिश्रुत वरद्वयनिर्यातनप्रार्थनाप्रासङ्गेन रामवनगमन - भरतराज्याभिषेकादिसर्ववृत्तान्तकथनं, सामोदं पितरं सत्यप्रतिज्ञं कर्तुं कृतनिश्चयेन रामेण जनन्याः कौसल्यायाः समक्षं भग्नराज्याभिषेकवार्तायाः निजवनवासवृत्तान्तस्य च कथनं - कौसल्यायाः परिदेवनं चेति । अत्र वकतव्याः श्लोकाः कतिचन न दृश्यन्ते - वैगुण्यं मास्तु इति कृत्वा स्वयमुल्लिखिताः श्लोकाः एवं-

[श्रुत्वा दुःखाविष्टं पितरं द्रष्टुं समागतो रामः ।
पप्रच्छ शोकहेतुं पितुः स्थितां तत्र मध्यमामम्बाम् ।। 1

पित्रा प्रतिश्रुतौ द्वौ समरे दैवासुरे वरौ पूर्वम् ।
एकेन भवतु राजा भरतश्चान्येन भवान् वनं व्रजतु ।। 2

समाश्चतुर्दशैवेत्येनमयाचे ततोऽतिदुःखार्तः ।
राम त्वयैव कार्यः जनकः सत्यप्रतिश्रवो भक्त्या ।। 3

श्रुत्वाऽथ मध्यमाम्बावचनं प्रोवाच राघवः श्रीमान् ।
राज्ये न मेऽभिलाषो भ्राता भरतः प्रशास्तु राज्यमिदम् ।।4

आपृच्छ्य मातरं मे सीतां चाद्यैव वनं प्रयास्यामि ।
इदमर्थमम्ब तातो दुःखं न करोतु तं समाधेहि ।। 5

एवं प्रशान्तमनसा रामो विनिवेद्य मातरं द्रष्टुम् ।
प्रययौ जननीभवनं प्रमुदितविप्रौघसंवृतद्वारम् ॥ 6

वत्सो ममाभिरामो भविता राजाऽभिषेचितः पित्रा ।
इति संप्रहष्टमनसा दानोद्युक्तां वचोऽवदद्रामः ॥ 7

अम्ब मम नाभिषेकः भरतस्यैवाभिषेचनं भविता ।
पित्राऽऽदिष्टो विपिनं वर्षाणि नव पञ्च संप्रयास्यामि ॥ 8]

तप्तत्रपुरससदृशां श्रवसोर्वाचं निशम्य कौसल्या ।
हाहेति वेपमाना मूर्छाक्रान्ता पपात वल्लीव ॥ 1

शनकैरुपेत्य संज्ञां आर्ता विललाप साऽथ कुररीव ।
हाराम कथमहं त्वाममित्रमध्ये विहाय जीवेयम् ॥ 2

त्वयि राम शासति भुवं सौख्यानि लभेय पुत्रलब्धानि ।
इति कृतमनोरथाहं विनाशिता हन्त हन्त कैकेय्या ॥ 3

तव लक्षणानि दृष्ट्वा सामुद्रविदः[1] पुरावदन्नेषः ?
सम्राड् भविष्यतीति व्यर्थास्तेषां बभूवुरपि वाचः ॥ 4

इति तस्यां विल्पन्त्यां क्रुद्धः सौमित्रिरब्रवीदेनम् ।
आर्य किमेवं कुरुषे व्यवसायस्ते न रोचते मह्यम् ॥ 5

कुद्धस्य कार्मुकस्य त्यक्त्वा धर्मं स्त्रिया वचः श्रुत्वा ।
त्यजतस्त्वामतदर्हं तस्य न कार्यं वचस्त्वया सत्यम् ॥6

---

1. सामुद्रिकालक्षणविदः यदवदन् एषः सम्राड् भविष्यतीति तेषां तद्वचनं व्यर्थमभवत् ।

कार्याकार्याविदुषो विहाय धर्मं च विचरतः स्वैरम् ।
उन्मार्गिणो गुरोरपि शिष्टिः कार्येति शास्त्रतो दृष्टम् ॥ 7

तच्छाधि वृद्धमेनं सज्जीभव सज्यमाशु कुरु चापम् ।
इति लक्ष्मणे सरोषं वदति तमेवं स सान्त्वयन्नाह ॥ 8

लक्ष्मण विमुञ्च रोषं पुंसां प्रत्यक्षदेवता हि पिता ।
तदतिक्रमेण दोषः सुमहान् देवाश्च न प्रसीदन्ति ॥ 9

अनतिक्रम्य तदीयं वचनं पूर्वे परं गताः श्रेयः ।
तस्माच्छिरसि तदाज्ञां धृत्वाद्यैवाभियामि गहनाय ॥ 10

पुत्रस्य निश्चयं तं सत्यं ज्ञात्वाब्रवीच्च कौसल्या ।
निवसेयमत्र नाहं त्वया सहैवाव्रजेयमिति दूना ॥ 11

रामस्तदाब्रवीत्तां मैवं वोचः(समंब कौसल्ये?)[1]
त्वय्यपि विनिर्गतायां मद्विरहे तस्य का गतिर्नृपतेः ॥ 12

इति परिसान्त्व्य मुहुस्तां मातरमामन्त्र्य पादयोः पतितम् ।
रामं प्रगृह्य दोर्भ्यामाशीर्भिः सापि योजयामास ॥ 13

निर्गत्य मातृभवनात्सीताप्रासादमाससादाथ ।
तां तत्र भूषयन्तीं भूषाभेदैरपश्यदप्रीतः ॥ 14

---

1. मातरं दृष्ट्वा "ममाम्ब कौसल्ये" इति नामग्रहणपूर्वकं संबोधनं पुत्रस्य न युज्यते, "समंबेति" शब्दस्य च वाच्यार्थः न सुगमः । अतः "वचस्तवायुक्तम्" इति तत्स्थाने निवेशनं क्रियते ॥

तस्यै निवेद्य सर्वं वृत्तान्तं चात्मनो वने वासम् ।
सीते चतुर्दशसमा मातुः सविधे वसेति निजगाद ॥ 15

सीतापि वचनशल्यं रामस्याकर्ण्य वचनमप्रीता ।
आत्मानमपि च नेतुं वचनैरनुकूलयाञ्चकारैनम् ॥ 16

सीतां सहैव विपिनं भर्त्रा यातुं कृतोद्यमां दृष्ट्वा ।
प्रणिपत्य लक्ष्मणस्तं प्रयाणमपि चात्मनो ययाचेऽथ ॥ 17

रामस्तथा वदन्तं लक्ष्मणमाश्वास्य बाष्पपूर्णाक्षम् ।
हातुं तमप्यनिच्छन् वाचा चासज्यमानयोवाच ॥ 18

लक्ष्मण विमुञ्च यात्रां त्वय्यायाते वनं मया सार्धम् ।
कौसल्या च सुमित्रा जीवेतां कथमुभे विनाऽऽवाभ्याम् ॥ 19

मत्प्रीतये खलु त्वं मया सहारण्यमिच्छसि प्राप्तुम् ।
प्रीतिस्तातेऽपि महती त्वयि स्थिते मे न मातृचिन्ता स्यात् ॥20

इति वदति रामभद्रे रुदन् स निःश्वस्य दीर्घमुष्णं च ।
प्रणिपत्य तच्चरणयोः प्रयाणमेवाभिरोचयाञ्चक्रे ॥ 21

तस्य प्रशस्य भक्तिं सुयज्ञनाम्ने वसिष्ठपुत्राय ।
शत्रुञ्जयं गजेन्द्रं करिसहस्रं ददौ स्वभूषां च ॥ 22

आकार्य तस्य गृहिणीं पतिव्रतां सर्वलक्षणोपेताम् ।
सत्कृत्य मातृवदिमां सीताभूषामदापयत्तस्यै ॥ 23

आत्मीयमर्थमखिलं रत्नानि चानुजलक्ष्मणस्यापि ।
राशीकृत्य वसूनि स्वाश्रितवर्गं समाजुहाव तदा ॥ 24

आगस्त्य कौशिकाभ्यां दत्वा रत्नं च विविधरत्नानि ।
अन्येभ्योऽपि यथार्हं प्रादाद्वसु सीतयैव सह रामः ॥ 25

रामस्य दानसमये त्रिजटो नाम द्विजोत्तमः कोऽपि ।
सह भार्यया समेत्य स्वं दारिद्र्यं न्यवेदयत्तस्मै ॥ 26

वृद्धस्य तस्य शक्तिं समीक्षितुं राघवो विहस्याह ।
शृणु विप्रवर्य वचनं मम यदि दारिद्र्यदुःखितोऽसि त्वम् ॥ 27

तिष्ठन्ति बहिरसङ्ख्या [1]दानायागत्य धेनवश्चित्राः ।
तासु क्षिपस्व दण्डं तन्मध्यगता दिशामि ते सकलाः ॥ 28

इति वदति रामभद्रे शाटीमाबध्य मध्यभागे सः ।
उद्यम्य वेणुदण्डं मध्ये चिक्षेप गोकुलस्य मुदा ॥ 29

क्षिप्तः स वेणुदण्डः सरयूतीरे पपात सत्वेन ।
तन्मध्यवर्ति धेनूस्तस्मै विप्राय राघवः प्रददौ ॥ 30

एवं धनं समस्तं सीतालक्ष्मणसमन्वितो दत्वा ।
रामो वनं यियासुर्लक्ष्मणमाहूय सस्मितमुवाच ॥ 31

---

1. दानाय आगत्य इति प्रयोगेऽस्वरसता प्रतीयते इत्यतः "दानायैवात्र" इति प्रयोगः उपपद्यते ।

2. सत्सु बहुसु वर्णनार्ह विषयेषु कवेरस्य त्रिजटदानप्रसङ्गे श्लोकपञ्चकग्रथनं विस्मयाय कल्पते ॥

जनकाय वरुणदत्ते धनुषी दिव्ये च वर्मणी च दृढे ।
खड्गौ चाक्षयबाणौ तूणौ चाचार्यगेहनिहितानि ॥ 32

समुपेत्य तस्य भवनं तानि समादाय तूर्णमुपयाहि ।
इति कथयति रघुवीरे तदाज्ञया लक्ष्मणस्तथा चक्रे ॥ 33

सीता प्रणम्य भक्त्या तानि समुद्वीक्ष्य तातदत्तानि ।
अभ्यर्च्य गन्धपुष्पैर्धनुषो माल्ये बबन्ध कुसुमानाम् ॥ 34

सह सीतयैव रामस्तस्या भवनाद्विनिर्ययौ सहसा ।
सौमित्रिरपि गृहीत्वा तमनुययौ चापचर्मखड्गादीन् ॥ 35

[1]रामवनवासवार्तां [2]श्रुत्वा घोराः सुदुःखिताः पौराः ।
अभ्येत्य राजवीथी [3]मपितुष्टुः सहकलत्रपुत्राद्यैः ॥ 36

रामं विमुक्तभूषं लक्ष्मणसहितं पदातिमायान्तम् ।
सीतां तमनु यान्तीं समीक्ष्य सर्वे मुमुचुरश्रूणि ॥ 37

पश्यन्पौरजनार्तिंताननुगृह्णन् विलोकितेनैव ।
प्रविवेश राजभवनं तेन सुमन्त्रेण मन्त्रिणा सार्धम् ॥ 38

स्थित्वा द्वारि सुमन्त्रं [4]शंसितमात्मानमागतं पित्रे ।
विससर्ज सोऽपि तस्मै रामागमनं निवेदयामास ॥ 39

---

1. रामवनयानवार्तामिति ।

2. श्रुत्वाऽङ्ख्या इति च कथनं युज्यते ।

3. अधितस्थुः इति प्रयोगः समीचीनः ।

4. दृष्ट्वा प्रोचे ममागमं पित्रे । ब्रूहीति सोऽपि तस्मै इति वचनं सुगमं प्रतिभाति ।

राजेत्युवाच सूतं प्रथमं शुद्धान्तवासिनीः प्रमदाः ।
आनाय्य राममानय पश्चान्मम मातृवत्सलं तनयम् ॥ 40

स च [1]रामशासनं तत्तथैव सम्पाद्य राजभवनं तत् ।
प्रावेशयच्च पश्चात् सीतालक्ष्मणसमन्वितं रामम् ॥ 41

पित्रे प्रणाममकरोत् लक्ष्मणजनकात्मजायुतो रामः ।
तस्मिन् प्रणमति राजा मूर्छामेव प्रतिक्रियामकरोत् ॥ 42

मूर्छामुपेयुषि नृपे हाहाशब्देन मूर्छितं भवनम् ।
तादृशमुपेत्य पितरं दाशरथी तौ समाललम्बाते ॥ 43

राजावरोधवनिताः पञ्चाशत् त्रिशतसङ्ख्ययोपेताः ।
रामं विलोक्य सहसा शोकादरुदन् वनाय सन्नद्धम् ॥ 44

सोऽपि प्रणम्य पितरं मूर्छाऽपगमे तमित्युवाचार्तम् ।
वस्तुं चतुर्दश समास्तपोवने तात देहि मेऽनुज्ञाम् ॥ 45

अन्वेति लक्ष्मणो मां प्रतिषिद्धापि स्नुषा च ते तात ।
अनुजानीहि तयोस्तन्मया सहैव प्रयाणमप्युभयोः ॥ 46

इत्थं वदति तनूजे भूपतिरित्याह मन्त्रिवर्यं तम् ।
प्रस्थापय सह सेनां रामेण यियासता वनं महतीम् ॥ 47

---

1. स च राजशासनं तत् - इति पाठः समीचीनः ।

रत्नान्यपि सुबहूनि द्रव्याण्यपि देहि भोगयोग्यानि ।
एतैः सहैव विपिने निवसतु रामश्चतुर्दशापि समाः ॥ 48

एवं वादिनि तस्मिन् रामो भूयो व्यजिज्ञपत्पितरम् ।
तपसे वनाय यातुः किं वसुभिः किं च तात वाहिन्या ॥ 49

रामे वदति तदैव कैकेयी वल्कलान्युपादाय ।
प्रादादपेतशङ्का रामाय लक्ष्मणाय सीतायै ॥ 50

रामोऽवस्त सहर्षं वल्कलयुगलं सहानुजेनैव ।
सीता तु वल्कले द्वे तदा गृहीत्वाश्रुलोचना तस्थौ ॥ 51

सीतामश्रुमुखीं तां वीक्ष्य वसिष्ठोऽपि [1]निनिद्य कैकेयीम् ।
उद्भाव्य कोपमुग्रं तामाहानार्यचेष्टितां दुष्टाम् ॥ 52

कैकेयि कुलविनाशिनि पापाचारे पतिघ्नि निर्लज्जे ।
कृत्वाप्येवमकृत्यं मर्यादायां न तिष्ठसि क्रूरे ॥ 53

तव दत्तेन वरेण प्राप्नोतु वनं रघूद्वहोऽद्यैव ।
सीता तु राज्यमखिलं स्थित्वात्रैव प्रशास्तु शान्तोक्त्या ॥ 54

इति निर्भर्त्स्य वसिष्ठः कैकेयीं जनकनन्दनीहस्तात् ।
आच्छिद्य वल्कले द्वे चिक्षेपाधोऽथ दुर्बलसंरम्भः ॥ 55

---

1. निन्द्येति ल्यबन्तस्य अनुपसर्गस्य प्रयोगश्चिन्त्यः । अस्तु विनिन्द्येति ।

रामस्तदातिधीरः शोकार्णवमग्नमानन्दमुखाब्जम् ।
प्रीतः समीक्ष्य पितरं बभाण वचनं कृताञ्जलिर्विनयात् ।।56

अज्ञातपूर्वशोकामम्बां मे प्रवयसीं च कौसल्याम् ।
पालय जनक दयालो पुरोग पुंसां नितान्तपुण्यकृताम् ।।57

इत्युक्त्वा पितरौ स प्रणम्य सहितोऽनुजेन जनकजया ।
आशीर्भिरेधितः सन् मातरमामन्त्र्य निर्गतो भवनात् ।।58

निर्याति रामभद्रे चुक्रुशुरन्तःपुरस्त्रियः सर्वाः ।
हारामभद्र पुत्रेत्युक्त्वा भूपतिरपि प्रचुक्रोश ।। 59

द्वारि सुमन्त्रः शीघ्रं राजनियोगेन रथमुपानीय ।
सीतालक्ष्मणसहितं रामं तत्राधिरोपयामास ।। 60

रामे वनाय यातुं रथमारूढे पुरौकसः सर्वे ।
अस्मान् विहाय गन्तुं नार्हसि नाथेति चुक्रुशुःकरुणम् ।। 61

आर्तस्वरमवरोधे निशमयतो द्वारि च प्रजाक्रोशम् ।
प्राप न मनो विकारं धीरोदात्तस्य तस्य दाशरथेः ।। 62

आश्वास्य तान् सुमन्त्रं प्राहाश्वांश्चोदयेति रघुवीरः ।
सोऽपि जनसङ्कुले तु शनकैर्वाहान् प्रचोदयामास ।। 63

रामं रथेन यान्तं पङ्क्तिरथो वीक्ष्य पथि जनाकीर्णे ।
हा कष्टमिति विनिन्दन्नात्मानमनु दुःखितः प्रययौ ।। 64

जरसा घनेन रुद्धे तमसेव महापथे महाराजः।
रथमनवलोकयन्रामस्य निवृत्य भवनमभ्यागात् ॥ 65

कक्ष्या व्यतीत्य बह्वीः कैकेयीभवनं प्रविश्य रुदन् ।
दुःखेन राघवस्य प्रासादं मातुराससादासौ ॥ 66

रामोऽपि पौरवर्गैः सकुटुम्बैरश्रुपूर्णदीनमुखैः ।
अनुगम्यमानपद्मा(द्यः) तमसातीरं समाससाद शनैः ॥ 67

तमसामुपेयिवांसं सत्वरमेनं वनप्रवेशाय ।
वीक्षितुमशक्नुवन् किल भास्वानपि शैलमासदच्चरमम् ॥ 68

सान्ध्यं विधिं च तस्यां निर्वर्त्य सहानुजेन रघुवीरः ।
शिश्ये रथे स तस्मिन् प्रजास्तरूणामधश्च पर्णेषु ॥ 69

इति श्रीआर्यारामायणे पञ्चमः सर्गः ॥

।। षष्ठः सर्गः ।।

रामो निशीथसमये पौरान्प्रसमीक्ष्य निद्रयाक्रान्तान् ।
कृपयाऽथ वञ्चयित्वा रथेन निरगात्सुमन्त्रसहितेन ।। 1

मार्गमपि मोहयित्वा विविधान् ग्रामानतीत्य वेगेन ।
सख्युर्गुहस्य नगरं समाससादाथ शृङ्गिबेराख्यम् ।। 2

प्रत्युद्गम्य गुहोऽपि रामं प्रणिपत्य स्नेहसञ्जातैः ।
शीताशीतैर्बाष्पैर्भुवं [1]निषिञ्चन्न्यवीविदत्तस्मै ।। 3

कैकेयीवरदानाद्राजा त्वां प्राहिणोद्यदि वनाय ।
मागा वनं सखेऽद्य मम राज्यं यत्तवैततत्सकलम् ।। 4

निवसन्मदीयनगरे सह मैथिल्या मयानुजेनापि ।
संसेव्यमानचरणः शाधि मदीयं समस्तमपि राज्यम् ।। 5

इति वदति सौम्यभावे गुहे सखायं प्रशस्य तं रामः ।
प्रोवाचेति न युक्तं स्थातुं पित्रे मया प्रतिज्ञाय ।। 6

यदि मे त्वं चिकीर्षसि पितुरश्वानां प्रदेहि वासादि ।
इति वदति रामभद्रे स तथेति चकार सर्वमह्नाय ।। 7

---

1. न्यवीविदत् - नि पूर्वकविद ज्ञाने इति धातोः णिचि लङि प्रथमपुरुषैकवचनान्तं रूपम् ।। स्वयं निवेदनेच्छुरपि विषयगौरवात् मन्त्रिमुखेन व्यज्ञापयद् इति भावः सुगमः ।।

प्रविश पुरमिति सख्या बहुशो विज्ञापितोऽपि न प्रविशन् ।
स समाससाद गङ्गां सवितापि तदैव चरमशैलाग्रम् ॥ 8

सन्ध्यामुपास्य सायं गङ्गाजलमेव केवलं पीत्वा ।
समुपेत्य वृक्षमूलं निषसाद महीतले तदा रामः ॥ 9

अथ लक्ष्मणेन रचिते स तृणैः शयने सहैव मैथिल्या ।
सुष्वाप तं सुमन्त्रो गुहश्च दृष्ट्वाश्रु मुमुचतुर्दीनौ ॥ 10

सौमित्रिरपि स चापं सज्यं कृत्वाविदूरतस्तस्थौ ।
सह तौ च तेन रामं विहाय निद्रां ररक्षतुःस्नेहात् ॥ 11

प्रातर्विबुध्य रामः सन्ध्यां समुपास्य जाह्नवीतीरे ।
आहूय गुहमवोचत् वटवृक्षक्षीरमाहरेति तदा ॥ 12

सोऽपि तदाज्ञां मूर्ध्ना प्राज्ञः प्रतिगृह्य निर्गतः शीघ्रम् ।
सङ्गृह्य वटतरूणां क्षीरं शोकेन राघवाय ददौ ॥ 13

तेन तदैव स रामो जटा बबन्धात्मनश्च सौमित्रेः ।
वीक्ष्य रुरोद सुमन्त्रो दाशरथी तौ तथाविधाकारौ ॥ 14

भरतं महिषीं च राज्ये कौसल्यां पालयेति मद्वाचम् ।
राज्ञे निवेदयेति ब्रुवन् सुमन्त्रं विसृष्टवान्रामः ॥ 15

तत आहूय गुहं तं तारय गङ्गामितीरिते तेन ।
सोऽपि स्वकीयपुरुषैः सुदृढां नावं तदा समानिन्ये ॥ 16

नावं समीक्ष्य सुदृढां जातप्रीतिर्गुहं समामन्त्र्य ।
आरोप्य जनकतनयां अनुजेन समारुरोह रघुवीरः ॥ 17

गङ्गां समुत्तरन्ती सीता कृत्वाञ्जलिं ययाचे ताम् ।
भद्रं भगीरथसुते मद्भर्त्रे देहि राघवायेति ॥ 18

मनसा शुभानि तस्यां ध्यायन्त्यां पत्युरेव मैथिल्याम् ।
नौरपि भागीरथ्यास्तीरं समवाप दक्षिणं तूर्णम् ॥ 19

रामोऽवतार्य सीतां स्वयमपि शनकैरवातरन्नावः ।
सौमित्रिणा सह मुहुः सुमन्त्रगुहयोः प्रपश्यतोरेव ॥ 20

उत्तीर्य जाह्नवीं तां धीरः सौमित्रिमब्रवीद्रामः ।
पुरतो वनं महदिदं त्वया मयाप्यवहितेन भवितव्यम् ॥ 21

याहि पुरतस्त्वमस्या सीतापि त्वानुयातु सौमित्रे ।
अहमपि धनुर्गृहीत्वा पश्चादनुयाम्यमू वने [1]रक्षन् ॥ 22

आकर्ण्य तस्य वचनं सधनुः सौमित्रिरग्रतः प्रययौ ।
तदनु च जनकतनूजा तामनु रामश्च चापमादाय ॥ 23

अवगाह्य मत्स्यदेशं विपिने गच्छन् विचित्रतरुषण्डे ।
चललक्षवेधचतुरश्चतुरो निजघान मार्गणैःस मृगान् ॥ 24

---

1. पश्चादनुयामि द्वौ युवां रक्षन् । इति पाठश्च सङ्गतः ॥

श्रान्तां समीक्ष्य कान्तां वासार्हमसौ वनस्पतिं दृष्ट्वा ।
मूले तस्य विशाले निशामनैषीत्सहानुजो रामः ॥ 25

निष्क्रम्योषसि तस्माद्यथापुरं मैथिलीं वने रक्षन् ।
पुत्र्योर्जह्नुसवित्रोः सङ्गमं समवाप राघवः सायम् ॥ 26

तत्राग्निहोत्रवेलाहुतभुग्धूमसुगन्धि शुभम् ।
आश्रममपश्यदग्रे भारद्वाजं महर्षिगणसेव्यम् ॥ 27

तस्मिन् हुताग्निहोत्रं प्रसन्नमासीनमृषिगणैःसार्धम् ।
सह सीतयानुजेन प्राणंसीद्राघवो भरद्वाजम् ॥ 28

ज्ञात्वा दाशरथी तौ स तयोश्चकार सत्क्रियामग्र्याम् ।
तेनाभिपूजितौ द्वौ तदाश्रमे रात्रिमत्यवाहयताम् ॥ 29

आमन्त्र्य तं मुनीन्द्रं तेनादिष्टेन वर्त्मना प्रातः ।
अभ्येत्य भानुतनयां वेणुभिरुडुपं सहानुजस्तेने ॥ 30

आरोप्य तत्र सीतां वस्त्राभरणायुधानि च शुभानि ।
पिटकखनित्रौ च दृढौ तेरतुराकृष्य राघवावुडुपम् ॥ 31

उत्तीर्य सूर्यतनयामेवं तौ वल्कले च परिधाय ।
भूयः प्रविश्य गहनं श्यामाख्यं वटमुपेयतुर्वीरौ ॥ 32

रम्ये वटस्य मूले वासं परिगृह्य जनकतनयायै ।
तत्पार्श्वविपिनभूरुहपुष्पाण्युपचित्य ददतुरग्र्याणि ॥ 33

सौमित्रिरथ गृहीत्वा खनित्रपिटकं प्रविश्य वनमध्यम् ।
द्रुतमानिनाय सरसान्यभ्यवहार्याणि कन्दमूलानि ॥ 34

अभ्यवहृत्य मनोज्ञान्यवहार्याणि तानि रसवन्ति ।
न्यग्रोध एव नीत्वा रात्रिं निरगुश्च चित्रकूटाय ॥ 35

आसाद्य चित्रकूटं तत्र भरद्वाजशासनात्कृत्वा ।
चित्राश्च पर्णशालाश्चिरमूषुश्चीरवासिभिः सार्धम् ॥ 36

उत्तीर्य सूर्यतनयां रामे प्रविशति महावनं वीरे ।
मन्त्री सुमन्त्रनामा शून्येन रथेन निववृते शोचन् ॥ 37

रामं विहाय विपिने समीक्ष्य पौराः सुमन्त्रमायान्तम् ।
शून्यां विधाय नगरीं रामगताशाश्चचुक्रुशुर्दुःखात् ॥ 38

पश्यन् पुरजनदुःखं प्रविश्य भवनं महीपतेः शोचन् ।
प्रणनाम तस्य राज्ञः पादावावेदयन्निजागमनम् ॥ 39

तं वीक्ष्य रामरहितं मूर्छां समवाप सपदि भूपालः ।
कौसल्या च सुमित्रा मूर्छितमवलम्ब्य मुमुचतुर्बाष्पम् ॥ 40

तत आश्वस्य स राजा सुमन्त्रमाहूय तं तदाऽप्राक्षीत् ।
रामस्य लक्ष्मणस्य च सीतायाश्चैव वृत्तमप्यखिलम् ॥ 41

शोकाकुलेन राज्ञा पृष्टस्तस्मै व्यजिज्ञपत्सोऽयम् ।
आरभ्य निर्गमनतो वनवासोदन्तमखिलमप्येषाम्[1] ॥ 42

---

1. . . . मखिलमेतेषाम् इति पाठः सङ्गतः ।

वनवासचरितमखिलं निशम्य तेषां स सूतवचनेन ।
अस्तं गते विवस्वति विसृज्य सूतं जगाद कौसल्याम् ॥ 43

कौसल्ये मम देहात्प्राणा निर्यान्ति नैव जीवामि ।
अतिरागचापलोऽहं [1]कीलोत्पाटीव वानरोऽभूवम् ॥ 44

रामं गुणाभिरामं राजीवाक्षं प्रसन्नवक्त्राब्जम् ।
द्रक्ष्यन्ति ये निवृत्तं तेदेवा[2] एव केवलं न नराः ॥ 45

अस्ति मम कारणं यत्पुत्रवियोगेन केवलं मर्तुम् ।
तच्छृणु समाहिता त्वं कौसल्ये मा कृथा वृथा शोकम् ॥46

सरयूतटे पुराहं मृगयामचरं वनेचरैः सार्धम् ।
[3]तस्या वनोपगूढे सलिलेऽश्रौषं समुत्थितं शब्दम् ॥ 47

[4]करिबृम्हितमथ मत्वा तं बाणं शब्दपातिनं चापे ।
सन्धाय तूर्णमसृजं तेन स विद्धस्तपस्विसूनुरभूत् ॥ 48

दृष्ट्वा तथाविधं तं निर्विण्णे मयि स चाह मां खिन्नम् ।
न ब्रह्महननदोषस्त्वं मा भैषीर्नविप्रसूनुरहम् ॥ 49

---

1. कीलोत्पाटिना वानरेणास्य साम्यं कथं सङ्गच्छते इति विषयो विमर्शमर्हति ॥

2. "द्रक्ष्यन्ति ये निवृत्तं विपिनात्ते सर्व एव धन्यतमाः" इति पाठः ।

3. रात्रौ . . . . .

4. कलशेन जलग्रहणकाले जायमानः शब्दः करिबृम्हितशब्देन कथं सङ्गच्छेतेति न प्रतीयते । करिणा शुण्डया जलग्रहणकाले योऽयं शब्दः भवति तेनैव अन्वेतुं युज्यते ॥ अत्र प्रयोगस्य साधुत्वे पाठका एव प्रमाणम् ॥

शूद्रायामहमासं वैश्यादत्रैव तावपि जरन्तौ ।
अन्धौ च तत्समीपं नय मामित्यब्रवीत्स धर्मात्मा ॥ 50

नीतोऽपि तत्समीपं तपस्विसूनुर्मया हतः स तयोः ।
आवेद्यात्मदशां तां स्वर्गमयासीत्समुद्धताक्षियुगौ ॥ 51

तत्पितरावतिदुःखात्पुत्रवियोगेन यास्यसि त्वं च ।
इति शप्त्वैव तदा मां जुहुवतुरग्नौ शरीरमतिवृद्धौ ॥ 52

इति कथयन्निजशापं कौसल्यायै स्मरन् सुतं राजा ।
भूपतिरशेत विवशः कौसल्यापि स्वमासदच्छयनम् ॥ 53

अथ मध्यरात्रसमये पुत्रवियोगेन दुःखितो राजा ।
निद्रामवाप महतीं(दीर्घां)मुनिदम्पतिशापसर्पदष्टःसन् ॥ 54

प्रातः प्रबोधसमये प्रबोधिका वीक्ष्य तादृशं नृपतिम् ।
हा हेति वेपमानाः कौसल्यायै निवेदयामासुः ॥ 55

कौसल्यापि गतासुं तं दृष्ट्वा मूर्छितापतद्भूमौ ।
आश्रयतरुविनिपाता वल्लीव स्रस्तभूषणप्रसवा ॥ 56

आपूरितं तदानीं अन्तः पुरमखिलमार्तशब्देन ।
तस्य[1] प्रतिश्रुतैव व्याप्तं सकलमपि हन्त साकेतम् ॥ 57

---

1. व्याप्तं सकलं नगरं हा हन्तोद्यत्प्रतिस्वनेनेव । अथवा
तस्य प्रतिस्वनेन . . . . ॥

प्रातः समेत्य सचिवा वसिष्ठमाहूय तस्य वचनेन ।
[1]आहरताहमनन्तं तैलद्रोण्यां निधापयामासुः ॥ 58

दूता वसिष्ठवचनात्तुरगानारुह्य पावनान् जवनान् ।
गाढं निगूढहृदयाः केकयनगरं समाययुस्त्वरया ॥ 59

भवनं प्रविश्य नृपतेर्भरतं नत्वा व्यजिज्ञपन् हृष्टाः[2] ।
निर्याहि राजपुत्र त्वां गुरुराह्वयति कार्यमस्तीति ॥ 60

दूतैः समीरितं तद्वचनं श्रुत्वा सुतोऽथ कैकेय्याः ।
आमन्त्र्य मातुलं तं तेन विसृष्टो[3] विनिर्ययौ नगरात् ॥ 61

गुरुवचनमनतिलङ्घ्यं मत्वा समतीत्य तातनगरीं ताम् ।
शून्यामतीव दृष्ट्वा विचिन्तयन्भूपतेरवाप गृहम् ॥ 62

कक्ष्या अतीत्य बह्वीः शून्यप्रायाः स शोभया हीनाः ।
अन्तस्तातमपश्यंश्चिन्ताक्रान्तो विवेश मातृगृहम् ॥ 63

---

1. रक्षायै राज वपुषः तैलद्रोण्यां निधापयामासुः ।
2. "पृष्टा" इति वा "वार्ताम्" इति वा "हृष्टा" इति पदस्य स्थाने प्रयोगः सङ्गतः भवेत् । आयोध्यिक वस्तुस्थितिकथनं मा भूदिति हेतोः आत्मनो मनोवृत्तिं अप्रकाशयन्तः व्यविज्ञपन् इति वक्तव्ये हृष्टाः इति पदसन्निवेशनं नार्हति । हर्ष प्रकाशने सति अवास्तविकवृत्तान्तकथनदोषः भवेत् ।
3. सहसौमित्रिः इति वचनं युक्तं भवेत् ।

अम्बां प्रणम्य मुदितां आलिङ्ग्याशीर्भिरेधितः स तया ।
भरतो विशङ्कमानो मातः क्वपिता ममेत्यपृच्छत्ताम् ॥ 64

सा चाह तं पिता ते तात स्वर्गं गतः कुतः क्लेशात् ।
क्लेशस्य कारणं किं रामविवासो विवासितः किमसौ ॥65

रामविवासनहेतुं पृच्छति तनये प्रहृष्टचित्ता सा ।
आत्मानमेव नियतं रामविवासस्य हेतुमाचख्यौ ॥ 66

आकर्ण्य मातृवचनं श्रवसोः शल्यं स वज्रपातनिभम् ।
हा तातेति क्रन्दन् अधः पपात प्रभूतशोकः सन् ॥ 67

मूर्छामवाप भरतो भूयः संज्ञामुपेत्य विललाप ।
मातरमेव विनिन्दन् भ्रातुः क्लेशान्विचिन्तयन् विपिने ॥68

निर्गत्य तद्भवनतो विमुखो मातुः सुदुष्टभावायाः ।
कौसल्याभवनमसौ प्रविवेश प्रबलशोकदीनात्मा ॥ 69

मलिना कृशा च दीना भरतं परिरभ्य पादयोः पतितम् ।
कौसल्या ससुमित्रा सानुजमश्रु प्रवर्तयामास ॥ 70

अथ मन्त्रिणश्च सर्वे पुरतः कृत्वा वसिष्ठमुपगम्य ।
भरतमभाषन्त तदा परलोकविधिं पितुः कुरुष्वेति ॥ 71

भरतो वसिष्ठवचनात् तैलद्रोण्यां स्थितं तमवतार्य ।
ऋत्विग्भिः सह सकलैः संस्कारं तस्य कल्पयामास ॥ 72

आशौचेऽथ निवृत्ते भरतस्तातस्य सद्गतिप्राप्त्यै ।
सत्कृत्य ऋत्विजस्तान् तेभ्यः प्रादाद्वसूनि विविधानि ॥ 73

रत्नानि बहुविधान्यपि दिव्याभरणानि पट्टवसनानि ।
प्रददौ महीसुरेभ्यो भरतः[1] सवसूनि मृदुतराह्मानि ॥ 74

इत्यार्यारामायणे षष्ठःसर्गः ॥

❖❋❖

1. "प्रददौ महीसुरेभ्यो गोभूमुख्यानि मृदुतराह्मानि" इति पाठः पौनरुक्त्य-प्रयुक्ताऽस्वरसतापहो भवेदिति मन्यामहे ।

।। सप्तमः सर्गः ।।

एवमनुजेन सार्धं पितुरुचितं पारलौकिकं कृत्यम् ।
कृत्वाऽवतिष्ठमाने भरते कुब्जाऽथ मन्थराविरभूत् ।। 1

मूलमनर्थस्येयं शत्रुघ्नायेति दर्शितां द्वास्स्थैः ।
केशेषु तां गृहीत्वा स चकर्षान्तःपुरे हन्तुमनाः ।। 2

क्रोशन्तीमतिविहितां तां हन्तुं शत्रुघ्नमुद्यतं दृष्ट्वा ।
गर्हेत राघवस्त्वामिति तं भरतो निवारयामास ।। 3

प्रातश्चतुर्दशेऽहनि पौराः सर्वे गुरुं पुरोधाय ।
अभ्येत्य मन्त्रिभिः सह भरतं विज्ञापयाम्बभूवुस्ते ।। 4

रामो वनाय यातो राजा दिष्टान्त मुपगतो दैवात् ।
राज्यमराजकमधुना त्वं नो राजाभिषेचयात्मनम् ।। 5

इति तैरुदीरितं तद् वचनं श्रुत्वा विहस्य भरतोऽपि ।
तानाह नार्हथैवं वक्तुं जीवति चिराय रघुवीरे ।। 6

[1]परिवेत्ता न भवेयं न मातृवचनं च पालयेयमहम् ।
अद्यैव याहि गहनं राममिहानेतुमार्यमनुनीय ।। 7

उक्त्वेति शिल्पिवर्गं वर्त्म समीकर्तुमादिशत् प्रथमम् ।
पश्चात्स्वयमपि निरगाद् गुरुणा सहितः सुतोऽथ कैकेय्याः ।। 8

---

1. परिवेत्ता - A youngar brother married before the elder.

आनेतुमेव रामं भरते सपुरोहिते विनिर्याते ।
तेन सह मन्त्रिवर्याः पौरश्रेष्ठाश्च निर्ययुः सर्वे॥ 9

नव वारणसहस्राण्यश्वानां लक्षं रथसहस्राणि ।
षष्टिस्तमनुययुः पथि भरतमसङ्ख्याः पदातयः प्रान्ते ॥ 10

तं मातरोऽनुयातास्तिस्रश्चतुरन्तयानमधिरूढाः ।
अन्याश्च मातृसदृशो रामं प्रययुस्समुत्सुका द्रष्टुम् ॥ 11

एवं स राजसूनुः सेनां कर्षन् अतीत्य गहनानि ।
रजसा दिशस्तिमिरयंस्त्रिदशनदीतीरमाससाद शनैः ॥ 12

सेनां गुहोऽपि दृष्टवा ध्वजेन निश्चित्य भरत इत्येव ।
रामाभियायिनं तं मत्वा ज्ञातीनुवाच संरम्भात् ॥ 13

कैकेयीवचनेनासौ त्यक्त्वा राज्यं तपस्विवेषेण ।
रामं वनाय यातं हन्तुं भरतोऽभ्युपैति सैन्येन ॥ 14

नावः पञ्चशतान्यपि यूयं पालयत नाविकैः सार्धम् ।
अहमपि तस्य चिकीर्षां ज्ञात्वा तस्याः प्रतिक्रियां करवै ॥ 15

एवं वदन् प्रियसखो रामस्य गुहो मधूनि मूलानि ।
दत्वोपायनमस्मै प्रणनाम निवेदितः सुमन्त्रेण ॥ 16

प्रणतं निषादराजं भरतः परिगृह्य पाणियुगलेन ।
आस्रैस्तमभ्यषिञ्चद्रामस्य सखेति गाढमालिङ्ग्य ॥ 17

आर्योदन्तमशेषं कथयेत्युक्तो गुहो विशुद्धं तम् ।
ज्ञात्वा प्रियोक्तिपूर्वं तस्मै सर्वं निवेदयामास ॥ 18

श्रुत्वा गुहस्य वचनं दृष्ट्वा रामस्य तृणमयीं शय्याम् ।
भरतो रुरोद दुःखात् तादृशमेनं स सान्त्वयामास ॥ 19

प्रातर्गुहोऽपि नावः शतानि पञ्चापि नाविकैः सार्धम् ।
आनाय्य तं ससैन्यं ताभिर्गङ्गां च तारयामास ॥ 20

गुहदर्शितेन भरतो गत्वा मार्गेण दूरमध्वानम् ।
आश्रममतीव रम्यं प्राप भरद्वाज मुनिवरस्याग्र्यम् ॥ 21

दूरे निवेश्य सैन्यं गुहं पुरस्कृत्य पादचारेण ।
प्राप च विनीतवेषो भरतस्तस्य प्रभाववित्सविधम् ॥ 22

सोऽपि वसिष्ठं दृष्ट्वा प्रत्युत्थानं चकार भरतोऽपि ।
प्रणनाम तस्य पादौ सोऽपि यथार्हं तयोश्च सत्कारम् ॥23

भरतो व्यजिज्ञपदमुं ज्यायान् भ्रातास्ति क्व महाबाहुः ।
इति तद्वचो निशमयन् भरतं प्रत्याह स च भरद्वाजः ॥ 24

यदि भवसि शुद्धभावो रामे राजीवलोचने ज्येष्ठे ।
कथयामि वासभूमिं कैकेयीतनय तस्य करुणाब्धेः ॥ 25

इति वदति मुनिवरेण्ये रुदन् स भूयो व्यजिज्ञपदमुष्मै ।
आर्यमनुनीय राज्ये स्थापयितुं यामि तव पदेन शपे ॥ 26

मुनिरेवं निगदन्तं ज्ञात्वा पुनराह शुद्धमायातम् ।
निवसति स चित्रकूटे सौमित्रिकृतासु पर्णशालासु ॥ 27

सह सीतया वसन्तं श्वस्तं द्रष्टासि तापसं जटिलम् ।
उक्त्वेति तं ससैनिकं आतिथ्यार्थं निमन्त्रयाञ्चक्रे ॥ 28

स ततः स्वमग्निशरणं प्रविश्य दध्यौ विसुद्ध आचम्य ।
आतिथ्यकरणहेतोरनीकिनीसहचरस्य नृपसूनोः ॥ 29

शक्रादिलोकपालानखिलान् सस्मार नन्दनं च वनम् ।
दिव्या नदीश्च सर्वा निवेशकरणाय विश्वकर्माणम् ॥ 30

आगत्य विश्वकर्मा प्रासादांस्तत्र निर्ममे चित्रान् ।
सर्वत्र कल्पवृक्षाः प्रादुरभूवन् सभाम्बराभरणैः ॥ 31

नद्यश्च सार्वलोका स्वादुदध्याज्यदुग्धवाहिन्यः ।
पायसकर्दमशबलाः सैन्यानां विस्मयावहास्तूर्णम् ॥ 32

शक्रादिलोकपालैः प्रहिता दिव्यासनाः समापेतुः ।
कैलासशैलसदृशाः कौबेरैरन्नराशयः क्लृप्ताः ॥ 33

भरतस्य सैनिकास्ते वस्त्राभरणैर्विभूषिताश्चित्रैः ।
भुक्त्वा यथेष्टमन्नं रात्र्यां तत्रोषुरप्सरःसहिताः ॥ 34

*भरतोऽपि सौधराजिषु दिव्यस्त्रीणां विलोकयन् लास्यम् ।
अभ्यवहृत्य यथेच्छं विस्मय(स्मित)चित्तो निनाय तां रात्रिम् ॥35

---

1. अस्मिन् प्रकरणे भरद्वाजः भरतं परीक्षितुमेवैवं विविधदिव्योपचारान् कल्पयमास । भरतस्तु रामचरणैकप्रवणः नैतेषूपचारेषु मनःसन्दधे, स दिव्ययोगिवद् भोगाऽनासक्त एवावर्ततेति अन्यत्र वर्णितं परामर्शाय कल्पते ॥

प्रातः कृताग्निहोत्रं प्राप्य भरद्वाजमृषिवरं नत्वा ।
तेन विसृष्टस्तूर्णं प्रययौ भरतः स चित्रकूटाय ॥ 36

अभ्येत्य चित्रकूटं द्वरे विनिवेश्य वाहिनीं सकलाम् ।
प्रययौ गुहेन सहितः स पादचारेण राममन्वेष्टुम् ॥ 37

आकर्ण्य सैन्य कलकलमथसौमित्रिः समुन्नतं सालम् ।
आरुह्य कोविदार ध्वजं समुद्वीक्ष्य राघवमुवाच ॥ 38

आर्य धरित्रीमखिलं तनयः सम्प्राप्य हन्त कैकेय्याः ।
त्वां हन्तुमुद्यतोऽसौ मातुर्वाक्यात्ससैन्यआयातः ॥ 39

पश्य रघुवीर सैन्यं भरतस्य गजाश्वरथसमाकीर्णम् ।
हत्वा ससैनिकममुं *व्याडेभ्यो विभज्य दास्यामि ॥ 40

उक्त्वेति तीव्ररोषः सालादवरुह्य धन्व जग्राह ।
तूर्णमधिरोप्य मौर्वीं तद्घोषेणाऽवृणोद्दिशः सकलाः ॥ 41

आलोक्य राघवस्तं लक्ष्मणमतिरोषभीषणमुवाच ।
लक्ष्मण विमुञ्च चापं कोपं संहर कुतो भयं भरतात् ॥ 42

अभ्येत्य मातुलकुलात् साकेतं मत्प्रवृत्तिमाकर्ण्य ।
अनुनीय मां निनीषुः पुरीं समभ्येति पुरुषसिंहोऽसौ ॥43

इति वदति रामभद्रे प्रकृतिं प्रतिपद्य कार्मुकं मुक्त्वा ।
प्रणिपत्य तस्य पदयोः विनयोपेतोऽस्य पार्श्वतस्तस्थौ ॥44

---

1. व्याड – A Carnivorous animal

भरतस्ततो विचिन्वन् गुहेन सहितः स चित्रकूटवने ।
रामस्य पर्णशालामद्राक्षीद् धूमराजिचिह्नेन ॥ 45

दूरादुदीक्ष्य रामं तरुमूले सीतया सहासीनम् ।
सौमित्रि*सौविदल्लं गुहानुजाभ्यां सहानमद्भूमौ ॥ 46

उत्थाप्य तमपि रामो दोर्भ्यां प्रणयेन गाढमालिङ्ग्य ।
अङ्के निवेश्य कुशलं सहावरोधस्य पितुरथाप्राक्षीत् ॥ 47

ज्यायसि पृच्छति कुशलं दीर्घं निःश्वस्य विनमयन्वदनम् ।
अश्रूणि पातयित्वा स पितुः प्राप्तिं दिवः समाचख्यौ ॥ 48

अशनिनिपातप्रतिमं वचनं भरतस्य राघवः श्रुत्वा ।
सह लक्ष्मणेन शोचन् सद्यो निपपात मूर्छितो भूमौ ॥ 49

दुःखेन तप्यमानौ पतितं तमुदीक्ष्य भरतशत्रुघ्नौ ।
हाहेति रुरुदतुस्तौ श्वशुरं स्मृत्वा रुरोद सीतापि ॥ 50

अथ मन्त्रवित्सुमन्त्रः सचिवैः पौरैश्च साकमुपगम्य ।
प्रणनाम रामभद्रं समानदुःखः प्रवर्तयन् बाष्पम् ॥ 51

मन्दाकिनीमुपेत्य स्नात्वा रामस्ततः सहभ्रात्रा ।
पित्रे ददौ तिलजलं पिण्डान् बदरीफलैश्च वितताार ॥ 52

स्नात्वैत्य पर्णशालां तस्थुषि रामे सलक्ष्मणे सह तैः ।
गुरुरप्युपाययौ तं दशरथदारांस्ततः पुरोधाय ॥ 53

---

1. सौविदल्ल - an attendant.

प्रत्युत्थाय गुरुं तं प्रथमं प्रणनाम तदनु कौसल्याम् ।
कैकेयीं च सुमित्रां यथार्हमन्याश्च सविनयं रामः ॥ 54

कौसल्यापि सुतं तं प्रोषितमालिङ्ग्य पितृवियोगार्तम् ।
आघ्राय मूर्ध्नि रुदती गात्रं पस्पर्श पुत्रवात्सल्यात् ॥ 55

सौमित्रिरपि यथार्हं जननीः प्रणनाम राममनु सर्वाः ।
सीतापि तमनु सम्यक् श्वश्रूवर्गस्य सन्नतिं चक्रे ॥ 56

रामोऽथ मन्त्रिमुख्यान् पौरांश्च विसृज्य सहयवीयोभिः ।
सन्ध्यामुपास्य सायं शोचन् पितरं निनाय तां रात्रिम् ॥57

प्रातः सावरजोऽसौ पुण्यां मन्दाकिनीं नदीं गत्वा ।
समुपास्य पूर्वसन्ध्यां शनकैः प्रत्याययौ निजावासम् ॥58

पौराः समन्त्रिमुख्या गुरुं पुरस्कृत्य तत उपागम्य ।
तरुमूलवासिनोऽस्य प्रणिपत्य पदोरन्तिके न्यवसन् ॥59

प्राप्तेषु तेषु भरतः रामस्य निपत्य पादयोर्भक्त्या ।
बध्वाञ्जलिं व्यजिज्ञपत् अग्रे कृत्वा गुरुं महात्मानम् ॥60

अनुनीता मम माता राज्यं पालय समेत्य साकेतम् ।
शक्तस्त्वमेव वोढुं राज्यधुरं नाहमिति वदंस्तस्थौ ॥ 61

रामस्तमिति वदन्तं भरतं प्रत्याह सान्त्वयन्वाचा ।
पित्रा मम वनवासो दत्तस्तव तु राज्यमखिलं च ॥ 62

तस्मात्पितुर्वचोऽहं नातिक्रामामि धर्ममभिजानन् ।
त्वद्दत्तमनुभव त्वं मद्दत्तमिदं तथानुभोक्ष्येऽहम् ॥ 63

धर्म्यं वदन्निति वचो(वाक्यं) विससर्ज प्रीतिपूर्वकं भरतम् ।
स च पादुके ययाचे कर्तुं राज्याधिदेवते भक्त्या ॥ 64

बहुधा प्रशस्य भक्तिं भरतस्य तथाविधां च संप्रेक्ष्य ।
रामस्तथेति तस्मै प्रीतो दत्वा स पादुके पूज्ये ॥ 65

स ततः प्रणम्य रामं मूर्धनि विन्यस्य पादुके शोचन् ।
शत्रुघ्नेन समेतो निरगात्पौरैश्च मन्त्रिभिः शनकैः ॥ 66

आश्वास्य मातरं स्वां रामो विससर्ज पादयोर्निपतन् ।
सीता प्रणम्य रुदती तामनुवव्राज कतिपयपदानि ॥ 67

कैकेयीप्रमुखा अपि रामः सौमित्रिणा सह प्रणमन् ।
विससर्ज ता रुदत्यो निरगुः कौसल्ययैव सह शैलात् ॥68

भरतोऽधिरुह्य स रथं गुरुं पुरस्कृत्य मातृवर्गं च ।
सह सेनया निवृत्य प्राप च साकेतमाकुलप्रायम् ॥ 69

शोचन् प्रविशन्नगरं मातृः संस्थाप्य तत्र राजगृहे ।
सह मन्त्रिभिस्तदानीं नन्दिग्रामं ययौ स धर्मात्मा ॥ 70

तस्मिन् जटाः स बध्वा सिह्मासन एव पादुके भव्ये ।
संस्थाप्य सचिवपदवीं अवलम्ब्य ररक्ष रामराज्यं तत् ॥71

भरते निवृत्य याते साकेतं लक्ष्मणान्वितो रामः ।
आशङ्क्य जनसमागममाश्रममत्रेरवाप सह दारैः॥ 72

तत्र मुनिमत्रिमनघं प्रणम्य सस्त्रीकमर्चितस्तेन ।
तस्थौ तदनु च सीता तत्पत्न्याः पादवन्दनं चक्रे ॥ 73

आशीर्भिरेधयित्वा सीतामालिङ्ग्य गाढमनुसूया ।
पस्पर्श गात्रमस्या हस्तेन जरातिजातकम्पेन ॥ 74

तस्यै स्वभूषणानि प्रादादम्लानमनुपमं माल्यम् ।
अम्बरमतिविमलं सा दिव्यामोदाढ्यमङ्गरागं च ॥ 75

सीता विभूष्य सकलं तद्दत्तैर्भूषणादिभिर्गात्रम् ।
तां च प्रणम्य भूयस्तया विसृष्टा विनिर्ययावुटजात् ॥ 76

सा तटिद्दिवाभ्रबृन्दादुटजान्निर्गत्य रामपार्श्वस्था ।
विरराज विष्णुसविधे लक्ष्मीरिव सर्वलक्षणोपेता ॥ 77

अनसूयार्पितभूषां विलोक्य योषां विसिष्मिये रामः ।
सापि गृहवासतोऽपि प्रीतिं समवाप तत्र वनवासे ॥ 78

तत्र स रात्रिमुषित्वा सीतासौमित्रिसंयुतः प्रातः ।
भास्वानिवाभ्रबृन्दं रामः प्रविवेश दण्डकारणयम् ॥ 79

इति श्री आर्यरामायणे सप्तमःसर्गः ॥

॥ इति श्रीमदयोध्याकाण्डः समाप्तः ॥

।। अष्टमः सर्गः ।।

सह जनकजानुजाभ्यां प्रविश्य पुण्यं स दण्डकारण्यम् ।
तत्रापश्यदृषीणां प्रसन्नसलिलानथाश्रमाञ्छ्रीमान् ।। 1

एकत्र वेदघोषैः श्यामाकान् वल्कलाजिनैः पूर्णान् ।
क्रियमाणातिथिपूजानाह्रियमाणप्रसूनफलमूलान् ।। 2

आश्राव्यमाणविबुधान् संस्क्रियमाणचरुपुरोडाशान् ।
यज ये यजामह इति प्रचुरवचोमुखरशुककुलोपेतान् ।। 3

सिह्मशिशुवर्गकेसरकर्षणलीलानुषक्तमुनिडिम्भान् ।
नकुलमुखविहरदहिकुलजिह्वालेलिह्यमाननकुलाङ्गान् ।।4

गजकुलशुण्डादण्डप्रकृष्यमाणप्रचण्डहरिचण्डान् ।
गोभिर्विहारिणीभिः सहविहरद्भीषणाकृतिव्याघ्रान् ।। 5

दृष्ट्वाश्रमेषु मुनयस्तं सीतालक्ष्मणान्वितं रामम् ।
प्रत्युद्गम्य यथार्हं पूजां चक्रुः परेण हर्षेण ।। 6

[सार्धं तपश्च सर्वे चिरचरितं चापि मेनिरे भक्त्या ।]

---

1. अत्रैतत्पद्यार्थोऽनुसन्धेयः-

"अर्धावर्तितमन्त्रमर्धविरतस्वाध्यायमर्धोज्झित-
स्वाहाकारमथर्धमुक्तहवनातिथ्यादिसर्वक्रियम् ।
दृष्ट्वा पञ्चवटीजुषं यं ऋषयः सार्धं तपो मेनिरे
कन्दर्पायुतसुन्दरं मृगयते जातादरं मे मनः ।।"

रात्रिमपि तेषु नीत्वा तेभ्यो निर्याति रघुकुलप्रवरे ।
राहुरिव चित्रभानुं तत्र विराधो रुरोध तं मार्गे ॥ 7

स जहार जनकतनयां अतिमात्रं वेपमानगात्रलताम् ।
असुरः पुराप्रधृष्यां श्रुतिं यथा शोभनां स्वनाशाय ॥ 8

रक्षःकृतापराधं वीक्ष्योभौ रामलक्ष्मणौ क्रुद्धौ ।
ववर्षतुरजिह्मगवरैः धाराभिरिवाम्बुदौ नवौ शैलम् ॥ 9

स विसृज्य मैथिलीं तां शूलमुपादाय राघवौ हन्तुम् ।
अभिदुद्राव ततस्तद्रामश्छिच्छेद तस्य बाणाभ्याम् ॥ 10

छिन्नं विहाय शूलं ग्रहीतुमेवाभिविद्रुतं दोर्भ्याम् ।
अभ्याशमागतं तौ खड्गाभ्यां जघ्नतुर्विकोशाभ्याम् ॥ 11

अविचिन्त्य तत्प्रहारान् उभौ गृहीत्वा स बाहुयुगलेन ।
आस्थाय जवमुदग्रं दुद्रावारण्यमध्यमार्गेण ॥ 12

धावन्तं तमुदीक्ष्य प्राहेति लक्ष्मणं तदा रामः ।
येनैष याति पन्थाः सोऽयं नः काममेष यातु रयात् ॥ 13

तौ रक्षसा गृहीतौ सीता दृष्ट्वा भृशं रुरोदार्ता ।
हा राम लक्ष्मणेति क्रोशन्ती तीव्रशोकसन्तप्ता ॥ 14

तस्या निशम्य रुदितं सौमित्रिस्तस्य रक्षसो भीमम् ।
छिच्छेद स भुजदण्डं सव्यं दक्षिणमपि राघवस्तु खड्गेन ॥15

तं छिन्नबाहुयुगलं पतितं निष्पिष्य भूतलं नीत्वा ।
निक्षिप्य तस्य वचनात् प्रीतिं ययतुः समेत्य सीतां च ॥16

सोऽपि विमुक्तः शापात् गन्धर्वो राघवं प्रशस्याथ ।
मार्गं प्रदर्श्य तस्मै दिवं ययौ देवयानमधिरूढः ॥ 17

स ततः प्रविश्य विपिनं शरभङ्गस्याश्रमं ययौ श्रीमत्[1] ।
तेन सह संल्लपन्तं मुनिना शक्रं ददर्श लोकेशम् ॥ 18

उक्त्वा विधातृवचनं प्रत्युक्तस्तेन राममुपयान्तम् ।
दृष्ट्वा व्रजेयमिति तं पुनरामन्त्र्य दिवं ययौ वज्री ॥ 19

अनुजाय रामभद्रः प्रदर्शयन् शक्रमाश्रमं गत्वा ।
मुनये प्रणाममकरोत्तेन समेतः सहैव मैथिल्या ॥ 20

सत्कृत्य तमपि स मुनि सविधे तस्यैव पावके ज्वलिते ।
हुत्वा वर्ष्म विमानं प्रतिपद्यागात्स्वयम्भुवो लोकम् ॥ 21

तस्मात्सहैव मुनिभिः सपदि सुतीक्ष्णाश्रमं सह भ्रात्रा ।
अभ्याससाद तमृषिः प्रत्युद्गम्याभ्यपूजयत् प्रणतम् ॥ 22

तत्रैव वर्तमाने तस्मिन् रामे सलक्ष्मणे शूरे ।
मुनयः समायययुस्ते ये तत्र वसन्ति दण्डकारण्ये ॥ 23

---

1. श्रीमान् इति प्रयोगः राघस्य विशेषणवाचकत्वेन युज्यते । आश्रमशब्दस्य पुंस्त्वात् ॥

तेभ्यः प्रणम्य भक्त्या पूजां कृत्वा यथार्हमेतेषाम् ।
बद्धाञ्जलिः प्रहृष्टः पप्रच्छागमनकारणं रामः ॥ 24

रक्षांसि राम विघ्नं तपसः कुर्वन्ति घोररूपाणि ।
तानि जहि काननेऽस्मिन् इति तस्मै शशंसुरतिदूनाः ॥ 25

तेषां निशम्य वचनं रघुवीरः शूरसम्मतो धृतिमान् ।
स तथेति राक्षसवधं प्रतिजज्ञे स्वानुभावविन्महताम् ॥ 26

तत्रातिवाह्य रात्रिं सुतीक्ष्णमामन्त्रय निर्गते रामे ।
सीता प्रणम्य तस्मै प्राह प्रणयेन नीतितत्वज्ञा ॥ 27

नेतः पदमपि चलितुं युक्तं तव राम राक्षसा घोराः ।
विचरन्ति विपिनमध्ये वैरं सह तैर्विधेहि माऽकस्मात् ॥ 28

तस्यां तथा वदन्त्यां प्रशस्य रामोऽथ तामुवाचेदम् ।
सीते त्वयेरितमिदं युक्तं न स्थातुमत्र मम युक्तम् ॥ 29

प्रत्यज्ञायि मुनीनां महतां रक्षोवधो मया सविधे ।
अपि सौमित्रिमपि त्वां जह्यां न कृतां पुनः प्रतिज्ञाताम् ॥ 30

इति राघवो वदंस्तां पुनः प्रतस्थे धनुः समादाय ।
तमनु च जनकजातामनु सौमित्रिरपि वने धन्वी ॥ 31

गच्छन् महति तटाके श्रुत्वा सङ्गीतमुत्सुको दिव्यम् ।
स्थित्वा स विस्मितमना धर्मभृतं नाम मुनिमथाप्राक्षीत् ॥ 32

कस्येदमाश्रमपदं पुष्पिततरुषण्डमण्डितप्रान्तम् ।
मध्येजलं मनोहरसङ्गीतविमिश्रदिव्यतूर्यरवम् ॥ 33

वीक्ष्याश्रमस्य शोभां विस्मितचित्ते सलक्ष्मणे रामे ।
इति पृच्छति प्रवीरे सधर्मभृत्प्राह रामभद्रं तम् ॥ 34

मुनिरत्र माण्डकर्णिस्तपश्चचारातिदुःसहं द्युसदाम् ।
हन्तुं तपस्तदीयं पञ्चाप्सरसो न्ययुङ्क्त पुरुहूतः ॥ 35

ताभिर्वशीकृतोऽसौ क्रीडति सौधेषु वारिगूढेषु ।
तस्यायमाश्रम इति श्रुत्वा मुनितो विसिष्मिये रामः ॥ 36

स ततः प्राप मुनीनामाश्रममण्डलमखण्डचरितानाम् ।
तत्पूजितः समन्तात्सीतालक्ष्मणसमन्वितस्तस्थौ ॥ 37

एकत्र वर्षमेकं मासान् दश चाष्ट सप्त नव पञ्च ।
एवं क्रमेण निवसन् वर्षाणि दशात्यवाहायद्रामः ॥ 38

अथ कुम्भसम्भवमुनेराश्रमवासाय सानुजो गच्छन् ।
तद्भ्रातुराश्रमपदं मध्ये दृष्ट्वा विवेश तं द्रष्टुम् ॥ 39

तस्मै प्रणम्य भक्त्या प्रीत्या तेनापि सत्कृतः सम्यक् ।
रात्रिमपि तत्र नीत्वा प्रातरगस्त्याश्रमंप्रति प्रययौ ॥ 40

द्वार्याश्रमस्य तिष्ठन् आवेद्यागमनमात्मनः पूर्वम् ।
पश्चात्प्रविश्य सीतालक्ष्मणसहितो ननाम तस्मै सः ॥ 41

सोऽप्यर्घ्यपूर्वमस्मै पूजां कृत्वा ददौ प्रसन्नात्मा ।
खड्गं धनुश्च तूणावक्षयबाणौ शरं च रक्षोघ्नम् ॥ 42

प्रतिगृह्य तानि तस्मात् प्रणम्य तस्मै विधातृकल्पाय ।
आवासमात्मयोग्यं ब्रूहीति तं प्राह राघवो धृतिमान् ॥ 43

आचष्ट मुनिरथास्मै पञ्चवटीमेव राम गच्छेति ।
सोऽपि प्रणम्य तममुं तेन विसृष्टस्तदाश्रमान्निरगात् ॥ 44

तां प्रति गच्छन् मध्ये गृध्रं दृष्ट्वैकमद्भुताकारम् ।
रक्ष इति मन्यमानो रामः पप्रच्छ तमथ निःशङ्कः ॥ 45

कस्त्वं ब्रूहि यथार्थं रक्षश्चेत्त्वामहं हनिष्यामि ।
इति पृच्छति रघुवीरे धीरे प्रत्याह गृध्रराजस्तम् ॥ 46

रक्षो राम न चाहं किन्तु जटायुरिति विश्रुतो नाम्ना ।
तव तातस्य सखा च त्यज मयि यातुधानशङ्कां ताम् ॥ 47

उक्तं जटायुषेत्थं श्रुत्वा रामः पितुः सखायं तम् ।
सत्कृत्य पुत्रवदेनं तेन विसृष्टो जगाम पञ्चवटीम् ॥ 48

तामालोक्य मनोज्ञामगस्त्यकथितं वचः प्रशस्याथ ।
अनुजाय तत्र रुचिरं वासस्थानं प्रदर्शयामास ॥ 49

तत्र सुमित्रापुत्रश्चित्रां विततान पत्रशालां सः ।
अवलोक्य तां च रामस्तुष्टावालिङ्ग्य लक्ष्मणं प्रीतः ॥ 50

धर्मज्ञे च कृतज्ञे भावज्ञे भवति जीवति चिराय ।
न पितृवियोगजदुःखं मम तिष्ठति तात इत्यहं मन्ये ॥ 51

इति लक्ष्मणं प्रशंसन् सह मैथिल्या प्रविश्य ताः शालाः ।
तासु तया सह रेमे सौमित्रिर्द्वारपालकस्तस्थौ ॥ 52

प्रत्यहमुपास्य सन्ध्यां गोदावर्यां सहानुजो रामः ।
मृगयाविहाररसिको निनाय दिवसानि तत्र सुबहूनि ॥ 53

कतिपयदिनावसाने यवीयसी रावणस्य शूर्पणखाख्या ।
रम्यं विधाय रूपं कामार्ता रामसविधमभ्यागात् ॥ 54

दृष्ट्वा तपस्विवेषं काममिवाङ्गीकृतमभिरामम्[1] ।
रामं जलदश्यामं कामार्तोवाच मां वृणुष्वेति ॥ 55

तस्या निशम्य वाचं रामस्तां प्रत्युवाच कामपराम् ।
कामिनि ममास्ति कान्ता याहि मदनुजं स्त्रिया विरहितमिति ॥ 56

तथ्यमिति तस्य वचनं लक्ष्मणमभ्येत्य सा वृषस्यन्ती ।
भार्यां विधाय मां त्वं स्वैरं विहरेति रागतोऽवादीत् ॥ 57

तस्यां तथा वदन्त्यां सौमित्रिरुवाच पूर्वमार्यात्वे ।
गत्वा मामुपयाता तस्यैव भव प्रियेति साक्षेपम् ॥ 58

---

1. दृष्ट्वाऽङ्गीकृततापसवेषं काममिवाभिरामं तम् ॥ इति पद्यानुपूर्वी सङ्गता भाति ॥

तेन च निराकृता सा रामं पुनरासससाद तां दृष्ट्वा ।
सीता जहास तामपि सा भक्षयितुं समाद्रवत्क्रुद्धा ॥ 59

दृष्ट्वा तथाविधां तां सौमित्रिरुपेत्य खड्गमादाय ।
चिच्छेद कर्णनासं सा क्रोशन्ती विनिर्ययावुटजात् ॥ 60

अम्बरमुपेत्य घोरा प्रतर्जयन्ती रघूद्वहौ शूरौ ।
भ्रातरमवाप्य च खरं भूमौ निपपात विस्वरं रुदती ॥ 61

उत्कृत्तकर्णनासां प्रणतां दृष्ट्वाथ राक्षसोऽवादीत् ।
केनेमामसि नीता विकृतिं तं ब्रूहि शीघ्रमेवेति ॥ 62

तरुणौ तामरसाक्षौ तपस्विवेषौ च दशरथस्य सुतौ ।
ताभ्यां विरूपिताहं शूराभ्यां राक्षसान्तकारिभ्याम् ॥ 63

तस्या निशम्य वचनं खरः स सैन्यो विनिर्ययौ नगरात् ।
तस्य विनिर्गमसमये त्रिविधा बहवो बभूवुरुत्पाताः ॥ 64

तानपि नगण्य रोषात् रथं समारुह्य राक्षसैः शूरैः ।
त्रिशिरो दूषणमुख्यैस्तूर्णं समाससाद पञ्चवटीम् ॥ 65

रामो विलोक्य रक्षःसैन्यं भूषास्त्रकान्तिविस्फुरणम् ।
सहतटिदिवाभ्रवृन्दं सौमित्रिमुवाच कवचयन् गात्रम् ॥66

भवता विरूपितां तां पुरतो विनिवेश्य रक्षसां सैन्यम् ।
समुपैति तद्गुहायां सीतां संस्थाप्य तत्र गच्छेति ॥ 67

तत आह राक्षसांस्तान् दशरथनृपतेरहं सुतो रामः ।
दुष्टनिबर्हणार्थं निवसाम्यत्रैव दण्डकारण्ये ॥ 68

तद्यात दूरतो वो जिजीविषा यदि नचेत्समायात ।
उक्त्वेति धनुरधिज्यं कृत्वा ज्याघोषमातनोद्रामः ॥ 69

तं शब्दमशनिभीमं श्रुत्वाऽभिययुर्निशाचरा रामम् ।
शरनिकरान् विकिरन्तो धारा इव वारिदा महाशैलम् ॥ 70

असहायोऽप्यतिधैर्यात् प्रदर्शयन् हस्तलाघवं शूरः ।
सन्धाय धनुषि बाणान् रामो विव्याध राक्षसानखिलान् ॥ 71

केचिन्निकृत्तकण्ठाःपेतुः केचिद्विलूनबाहुयुगाः ।
केचिद्विदीर्णहृदयाः केचिन्मध्येषु दारिताः विशिखैः ॥ 72

एकस्यैव पदातेः बहुभिर्घोरैर्निशाचरैर्युद्धम् ।
दृष्ट्वा विमानसंस्था विस्मयमीयुःसुराःपरं गगने ॥ 73

रामेण हन्यमानं सैन्यं दृष्ट्वाऽथ दूषणो रोषात् ।
आरुह्य रथमुदग्रं विसृजन् शरनिकरमभ्यगाद्रामम् ॥ 74

तस्य जघान चतुर्भिः स रथाश्वान् सायकैःशिलानिशितैः ।
एकेन सूतमनयत्(महनत्) तमपि त्रिभिरन्तकान्तिकं रामः ॥ 75

निहतं निरूप्य रक्षस्त्रिशिरा रामेण दूषणं समरे ।
स्वयमप्युपाययौ तं शलभो ज्वालनमिव सायकान्विकिरन् ॥ 76

तमुदीक्ष्य जातहर्षस्त्रिशृङ्गमिव शैलमुत्स्मितो रामः ।
त्रिभिरर्धचन्द्रवदनैः बाणैश्छिच्छेद तस्य शीर्षाणि ॥ 77

तं वीक्ष्य संयति हतं खरः समादाय कार्मुकं शूरः।
जयिना रथेन शैर्यं प्रथयन्विकिरन् शरान् समभ्यागात् ॥78

प्रतिजग्राह शरैस्तं प्रदर्शयन् धैर्यमात्मनो रामः ।
युद्धं तयोरपश्यन्नद्भुतमाकाशचारिणः सिद्धाः ॥ 79

रामस्य मुष्टिदेशे चापं चिच्छेद राक्षसः क्रूरः ।
छिन्नं निरस्य तं पुनरन्यज्जग्राह कार्मुकं सोऽपि ॥ 80

विरथं चकार रामः खरमश्वान् सारथिं शरैर्हत्वा ।
विरथो धनुर्गृहीत्वा रामाय शक्तिंबली स चिक्षेप ॥ 81

अशनिमिव घोररूपां रामस्तामायान्तीं शरैर्निशितैः ।
विततान विहतवेगां मन्त्रैरिव पन्नगीं अतिक्रूराम् ॥ 82

ऐन्द्रेण सोऽपि विद्धःशरेण रामेण यमपुरं प्रययौ ।
त्रिपुरजये शरविद्धो विद्युन्मालीव शङ्करस्य पुरा ॥ 83

रामश्चतुर्दशैवं समिति सहस्राणि रक्षसां शूरः ।
अर्धाधिकेन हत्वा मुहूर्तमात्रेण विस्मितस्तस्थौ ॥ 84

निपापात पुष्पवृष्टिः तस्य तदा मूर्ध्नि रक्षसां हन्तुः ।
अमरा विमानसंस्थास्तुष्टुवुरेनं शतक्रतुप्रमुखाः ॥ 85

मुनिभिस्ततस्ततस्तैरुपेत्य रामोऽथ संस्तुतस्तुष्टैः ।
आश्रममवाप हृष्टो वार्धिं तीर्ण इव बाहुयुगलेन ॥ 86

रामे रणान्निवृत्ते सीतामादाय लक्ष्मणः सहसा ।
प्रविवेशचाश्रमपदं प्रीतस्तस्मात्स गिरिगुहाद्दुर्गात् ॥ 87

सीतापि सस्वजे तं रामं रक्षोगणान्तकं प्रीता ।
हत्वा रिपून् निवृत्तं शचीव देवेन्द्रमक्षतं जयिनम् ॥ 88

इति श्रीआर्यारामायणे अष्टमःसर्गः ॥

❖❀❖

।। नवमः सर्गः ।।

दृष्ट्वा खरं ससैन्यं रामेण हतं च रावणावरजा ।
लङ्कामुपेत्य सहसा पपात रक्षःपतेः पुरो रुदती ।। 1

उत्कृत्तकर्णनासामुदश्रुवदनामुदीक्ष्य शूर्पणखाम् ।
रक्षः पतिरतिरोषान्निःश्वस्याश्वास्य तां ततः प्राह ।। 2

को ब्रूहि कृष्ण सर्पं सुप्तं बोधयति हस्तिनं मत्तम् ।
को वा जिघृक्षति करं मृत्योरास्ये प्रसादयति को वा ।। 3

इति वदति दशमुखे सा तमाबभाषे स्वयं जनस्थाने ।
निहितं खरादि सैन्यं निहतं रामेण रक्षसां बलिना ।। 4

अहमपि विरूपितैवं तद्भार्यामुद्यतां तवाहर्तुम् ।
त्वद्बलमुपाश्रितास्ते निहताश्चाहं च हन्त नष्टेति ।। 5

इति निष्ठुरं वदन्त्यां तस्यां रामः क इत्यथाप्राक्षीत् ।
आकर्ण्य तस्य वचनं वर्णयितुं सा प्रचक्रमे तममुम् ।। 6

दशरथनृपस्य सूनुस्तपस्विवेषो मनोभवाकारः ।
श्यामो युवा धनुष्मान् निवसति सह कान्तया जनस्थाने ।। 7

तद्भार्या च तदर्हा रतिरिव कामस्य रूपसम्पन्ना ।
पद्मालयेव विष्णोः पर्वतराजन्यकन्यकेव विभोः ।। 8

सुतनूररालकेशी सुरसा परिपक्वचारुबिम्बोष्ठी ।
सुभुजा समुन्नतकुचा तनुमध्या पूर्णचन्द्रवक्त्रश्रीः ॥ 9

कनकरुचिराङ्गलतिका कम्बुग्रीवा तलोदरी श्यामा ।
विकचकमलेक्षणा सा न तादृशी देवलोकनारीषु ॥ 10

तस्यानुजश्च तद्वत् लक्ष्मण इति सर्वलक्षणोपेतः ।
छायेव पूर्वजं तं सततमनुसरति जातसम्प्रीतिः ॥ 11

कथयन्त्यामिति तस्यां कुपितो रामाय दशमुखः क्रूरः ।
रथमारुह्य तदानीं(तदैव) मारीचस्याश्रमं प्रति प्रययौ ॥12

सोऽप्यागताय तस्मै पूजां कृत्वा यथाविधि प्रीतः ।
आगमनकारणं तं पप्रच्छ निशाचराधिपः प्रणयात् ॥ 13

शृणु मारीच महाभयमुपस्थितं दशरथात्मजाद्रामात् ।
निहतास्तेन चतुर्दश समिति सहस्राणि राक्षसाःशूराः ॥ 14

खरदूषणौ च निहतौ त्रिशिराश्च महाबलो जनस्थाने ।
विनिकृत्तकर्णनासा यवीयसी मे कृता च शूर्पणखा ॥ 15

तस्य मयाऽपहतायां प्रेयस्यां सोऽपि मोक्ष्यति प्राणान् ।
तद्विरहेण जयो मे सुलभः स्यात्तेन भव सहायस्त्वम् ॥ 16

इति वदति राक्षसेन्द्रे सभयस्तमुवाच तदनु मारीचः ।
न भवामि ते सहायो जानन् रामस्य शौर्यमतिवेलम् ॥17

सिद्धाश्रमे पुरा मां वायव्यास्त्रेण सोऽक्षिपद्धार्धौ ।
मृगरूपेण जिघांसुं भूयोऽपि ततो दण्डकारण्ये ॥ 18

तस्माद्भयं महन्मे त्वमपि वृथा तेन मा कृथा वैरम् ।
क्रुद्धः स हन्तुमीष्टे रुद्र इवाशेषमपि जगद् दग्धुम् ॥ 19

तव सन्ति रावण गृहे सुदृशः सौन्दर्यविजितसुरकान्ताः ।
तासु रमस्व यथेष्टं न [1]नाशमुपयाहि रामवैरेण ॥ 20

अल्पामिषाभिलाषी मत्स्यो बडिशमिव मानुषीं काङ्क्षन् ।
रामस्य शौर्यजलधौ मग्नः प्राणान्न दुर्लभान् जह्याः ॥ 21

इत्युक्तवन्तमेनं निर्भर्त्स्य निहन्तुमुद्यतः क्रूरः ।
रक्षः पतिरतिरोषात् समीक्ष्य तं पुनरुवाच मारीचः ॥ 22

लङ्काधिराज भवता यदभिहितं नाथ तत्करोमीति ।
श्रुत्वा स तस्य वचनं तमेनमालिङ्ग्य रावणोऽवादीत् ॥23

भूत्वा कनकमृगस्त्वं मारीच मनोज्ञरूपसम्पन्नः ।
परिवञ्चयन् जनकजां स्वेच्छं सञ्चर समेत्य पञ्चवटीम् ॥24

कनकमृगतां प्रपन्नं दृष्ट्वा त्वां विस्मयान्विता नितराम् ।
एनं समानयेति प्रेम्णा वक्ष्यति महीसुता रामम् ॥ 25

---

1. नाशं यातासि रामवैरेण ॥ स्वान्तः पुरस्थवनिताः अतिक्रम्य रामस्त्रीपरिग्रह-प्रयत्ने कृते नाशं यास्यसि । अतः रामपत्नीं परिगृह्य नाशं नोपयाहि नष्टो मा भूः ॥

तस्या निशम्य वचनं रामस्त्वामनुगमिष्यति प्रसभम् ।
संस्थाप्य निधिमिवैनां लक्ष्मणसविधे विदेहराजसुताम् ॥ 26

दूरं नीत्वा तदानीं एवं मारीच वद वचोऽत्युच्चैः ।
रामवचनानुरूपं हा सीते लक्ष्मणेति घोरतरम् ॥ 27

तच्छ्रुत्वा जनकजया प्रचोदितो लक्ष्मणोऽथ दाशरथेः ।
अनुयास्यति तां पदवीं प्रेम्णा सम्भ्रान्तमानसस्तूर्णम् ॥ 28

मारीच जनकतनयां तस्मिन् समये सुखेन नेष्यामि ।
राहुरिव चन्द्रकान्तिं पौलोमीमिव सुपर्वलोकेशः ॥ 29

एवं कृते त्वयाऽहं राज्यस्यार्धं तव प्रदास्यामि ।
इत्युक्त्वा तेन समं रथमारुह्यासदज्जनस्थानम् ॥ 30

सरथो व्योम्नि स तिष्ठन् मारीचं प्राहिणोच्च पञ्चवटीम् ।
कनकमृगः स च भूत्वा सीतापुरतश्चचार मायावी ॥ 31

नवरत्नबिन्दुचित्रो मरकतमणिशृङ्गकान्तिकिम्मीरः ।
स तटिदिव मेघवृन्दं देहप्रभया वनं ततानासौ ॥ 32

तं वीक्ष्य जातकुतुका कुसुमापचयं वितन्वती विपिने ।
सीता स्वरेण महता राममुपाहूय सादरमवादीत् ॥ 33

पश्यार्यपुत्र चित्रं कनकमृगं कान्तिसम्पदोपेतम् ।
एनं गृहाण शीघ्रं क्रीडार्थं नो भवेत् गृहीतोऽयम् ॥ 34

तस्या मृगेऽभिलाषं रामो राजीवलोचनः श्रुत्वा ।
तत्र (दिष्ट्या) निधाय सुमित्रापुत्रं सधनुर्विनिर्ययौ सहसा ॥35

स मृगाः समीक्ष्य रामं उत्प्लुत्योत्प्लुत्य वेगतो धावन् ।
मेघेषु चन्द्रमा इव दृश्यादृश्यश्चचार गुल्मेषु ॥ 36

हस्तग्राह्य इवाभूत् रामे सविधं समी(मे)युषि सचापे ।
उत्प्लुत्य गगनमध्यं प्राविशदेतस्य पश्यतस्त्वरया ॥ 37

एवमतिदूरमेनं गत्या स निनाय वञ्चयन् विपिने ।
रामोऽपि मायिनं तं ज्ञात्वा विव्याध पत्रिणैकेन ॥ 38

तेन स विद्धस्तूर्णं विहाय मृगरूपमात्मरूपेण ।
निहतो जहावसूनपि हा सीते लक्ष्मणेति च क्रोशन् ॥ 39

आकर्ण्य तस्य शब्दं रामस्तं राक्षसं हतं दृष्ट्वा ।
मनसा स्मरन् जनकजां सौमित्रिं चापि निववृते विपिनात् ॥40

सीतापि रामवचनं मत्वा मारीचवाचमतिघोराम् ।
लक्ष्मणमुवाच रुदती रक्षोनिहतं पतिं विदित्वैव ॥ 41

गच्छ विचारय शीघ्रं लक्ष्मण रक्षोवशं गतो रामः ।
अश्रौषमशनिसदृशं हा सीते लक्ष्मणेति यच्छब्दम् ॥ 42

तस्या निशम्य वचनं सौमित्रिरुवाच सान्त्वयन् वाचा ।
मा रोदीः पतिदैवे रक्षोभ्यो नास्ति राघवस्य भयम् ॥ 43

शब्दः श्रुतस्त्वया यः सोऽयं केनापि तेन निहतेन ।
उच्चरित एव नायं रामस्य शपे च तस्य पादाभ्याम् ॥ 44

इति तथ्यमपि वदन्तं सौमित्रिमतथ्यवादिनं मत्वा ।
सीता विषण्णचित्ता स्त्रीचापलतो वचोऽब्रवीत्परुषम् ॥ 45

नाथस्य मे रघुपतेः सम्प्राप्ता विपदपीह सौमित्रे ।
तोषाय चेत्तव भृशं तस्य बत इमे वयं च किं कुर्मः ॥ 46

सौमित्रे मम हेतोः साकं समुपागतोऽसि रघुपतिना ।
कुलपांसनस्त्वमस्मिन् भ्रातुःस्नेहान्न कानने घोरे ॥ 47

अथवा प्रचोदितः किं त्वं कैकेयीसुतेन भरतेन ।
मामानेतुं नोचेत् करोष्युपेक्षां किमर्थमार्यकृते ॥ 48

व्यर्थं विधाय युवयोरीहां प्राणानहं विमोक्ष्यामि ।
गरलं निपीय घोरं नोचेत्पूरं प्रविश्य गोदायाः ॥ 49

इन्दीवरोपमरुचिं बन्दीकृतसकलकमलकान्तिमुखम् ।
आश्रित्य तादृशं पतिमन्यं प्राकृत इव कथं काङ्क्षे ॥ 50

त्यक्त्वा क्षणमपि भूमौ स्थातुं न सहे मनोभवं रामम् ।
सौमित्रे पुरतस्ते त्यक्ष्याम्यहमद्य तृणमिव प्राणान् ॥ 51

तस्या निशम्य वचनं परुषं सौमित्रिरब्रवीदेनाम् ।
ईदृशमेतन्न सहे श्रवसोरधुना प्रतप्तनाराचम् ॥ 52

वनदेवताश्च यूयं साक्षिण्यो भवत शङ्कतेऽसौ माम् ।
क्रूरे जनकतनूजे धिक्त्वां पातककरि प्रणश्येति ॥ 53

आकर्ण्य तस्य वचनं लक्ष्मणमाक्रुश्य बाष्पपूर्णमुखी ।
रुदती करकमलाभ्यां उदरं स्वं सञ्जघान सा रोषात् ॥54

इति तस्यां विलपन्त्यां कृताञ्जलिः किञ्चिदाबभाषे ताम् ।
परमो गुरुस्त्वमेव त्वमेव माता त्वमेव मे दैवम् ॥ 55

गच्छाम्यहं जनकजे किमर्थमेवं ब्रवीषि मामनघम् ।
पान्तु वनदेवतास्त्वां घोरा बहवो भवन्ति चोत्पाताः ॥56

इति परिसान्त्व्य विषण्णां सौमित्रिः शश्वदीक्षमाणः सन् ।
त्यक्त्वा तामथ पदवीं रामस्य जगाम *शङ्कितस्तस्मात् ॥57

परिगृहीतभिक्षुवेषो रक्षोराजोऽन्तरं ततो लब्ध्वा ।
प्रविवेश पर्णशालां क्रोष्टेव गुहां मृगेन्द्रनिर्मुक्ताम् ॥ 58

परिगृहीतभिक्षुवेषं रक्षोराजं समीक्ष्य सा सीता ।
पाद्यार्घ्यपूर्वमस्मै पूजां चक्रे यथाविधि प्रयता ॥ 59

कृतसत्क्रियः स सम्यक् समीक्ष्य निर्वर्ण्य जनकजारूपम् ।
प्रोवाच दुष्टभावो भावं जिज्ञासुरार्यभावायाः ॥ 60

क्लिश्यसि वने किमर्थं तपस्विनं पतिमुपेत्य कान्ते त्वम् ।
सुकुमारगात्रयष्टिः सुखोचिता सकललक्षणोपेता ॥ 61

---

1. शङ्कितः अतिष्टं आथङ्कमानः तस्मात् आश्रमात् रामपदवीं अनुसृत्यमात् ॥

धनदस्यावरजोऽहं रावण इति नाम मम जगत्प्रथितम् ।
मामङ्गीकुरु सीते भवेश्वरी त्वं समस्तवनितानाम् ॥ 62

इति वदति राक्षसेन्द्रे सीता तमुवाच पापिनं रोषात् ।
ईष्टे[1] दुष्ट पवित्रं स्प्रष्टुं हविरीश्वरार्पितं किं वा ॥ 63

इति निष्ठुरं वदन्तीं सीतां निर्भर्त्स्य रावणो रोषात् ।
प्रकृतिं निजामुपेत्य प्रायादाकृष्य तां बलात्पापी ॥ 64

हा राम लक्ष्मणेति क्रोशन्तीं वेपमानगात्रलताम् ।
आरोप्य निजरथं तां आकाशपथेन रावणः प्रययौ ॥ 65

अथ पक्षिराट् जटायुः सीताया रोदनध्वनिं श्रुत्वा ।
तां रावणं हरन्तं हठात्समुद्वीक्ष्य रोषतः प्राह॥ 66

रामस्य चोरयित्वा रेरे राक्षस पलायसे क्व वधूम् ।
तिष्ठ क्षणं शिरस्ते तालात्फलमिव निपातयिष्यामि ॥ 67

उक्त्वेति तस्य मार्गं रुरोध रक्षःपतेःस पक्षीन्द्रः ।
आदाय सोऽपि चापं शरानमुञ्चत्सहस्रशः खचरे ॥ 68

तानविगणय्य तूर्णं रथं समासाद्य राक्षसस्य करात् ।
आच्छिद्य चेक्षुभञ्जं बभञ्ज चापं जटायुरतिरोषात् ॥ 69

---

1. भवान् इति कर्तृवाचकं पदमध्याहार्यम् ।

सूतस्य तस्य शीर्षं तालात्फलमिव निपातयामास ।
वाहांस्ततोऽपि हत्वा रथं च वितथीचकार चरणाभ्याम् ॥70

ध्वजमपि बभञ्ज तूर्णं चित्रं छत्रं च चामरे च शुभे ।
विरथस्य तस्य बाहू तुण्डेनाखण्डयत् च खगराजः ॥ 71

बल्मीकादिव भुजगौ पुनरप्यग्र्यौ विनिर्गतौ बाहू ।
अथ रोषादस्य खगो गात्रं विददार नखरघातेन ॥ 72

विरथः सीतां भूमौ निधाय खड्गं विकोशमादाय ।
द्रुतमाससाद गृध्रं सोऽपि तुतोदास्य सर्वतो गात्रम् ॥ 73

विरथीकृतः स तेन प्रभूतरोषो निशातमुद्यम्य ।
असिनाच्छिनत्पदयुगं पक्षं च जटायुषो दशग्रीवः ॥ 74

दशमुखनिकृत्तपक्षो जटायुरपतत्क्षितौ विकी(शी)र्णाङ्गः ।
इन्द्राशनिहतपक्षः क्षितिधर इव जानकीमनो व्यथयन् ॥75

धरणीतले निपतितं धरणीकन्या धराधराकारम् ।
अद्राक्षीदरुणाक्षं क्षतजार्द्रायतविकीर्णपक्षयुगम् ॥ 76

बन्धुं स्वमिव सशोका तूर्णमभिद्रुत्य बाष्पपूर्णमुखी ।
परिरभ्य पाणिना तं रुरोद बहुशो विलप्य वैदेही ॥ 77

श्रुत्वा मदीयरुदितं त्रातुं समुपागतः खगेशो माम् ।
एष बली बत शेते निहतो भूमौ निकृत्तसर्वाङ्गः ॥ 78

भणितं निमित्तमशुभं भवता यत्पूर्वमनघ सौमित्रे ।
अधुना तत्फलमखिलं मयानुभूतं विपर्ययान्नियतेः ॥ 79

पापिनमन्तकसदृशं पुनरायान्तं ग्रहीतुमात्मानम् ।
दशकन्धरं जनकजा विलोक्य विललाप वेपमानाङ्गी ॥ 80

रक्ष रघुवीर मां त्वं विक्रोशन्तीं मामनाथवद्दीनाम् ।
वल्लीमिव वेपमानां आलिङ्गन्तीं पुनः पुनः सालान् ॥ 81

निर्भर्त्स्य मुञ्च मुञ्चेत्युक्त्वा पुनरपि दशाननः क्रूरः ।
आकृष्य मैथिलीं तां आकाशेनैव केवलमयासीत् ॥ 82

तस्यां प्रसभहृतायां वैदेह्यां तेन रक्षसा भुवनम् ।
सचराचरं तदाभूत् तमसाऽऽवृतमिव विमुक्तमर्यादम् ॥ 83

तस्मिन् ववौ न वायुः समये भानुः प्रभावहीनोऽभूत् ।
व्यथिता मुदिताश्चासन् मुनयः सञ्चिन्त्य भावियातुवधम् ॥ 84

पत्ररथहरिणनिवहा मृगेन्द्रसङ्घास्तदानुधावन्तः ।
गगनं निरीक्षमाणा सीताच्छायानुसारिणोऽभूवन् ॥ 85

रक्षोऽधिपेन नीतां ह्रियमाणां दिव्यचक्षुषा धाता ।
अभिवीक्ष्य वाचमूचे सुरकार्यं रचितमिति स हर्षेण ॥ 86

अञ्जनविनीलकायः किरणैररणिश्च तद्विभूषाणाम् ।
युक्तो राक्षसराजो रेजे घन इव तडित्स्वनोपेतः ॥ 87

माणिक्यभूषणरुचा संवलितो जनकराजतनयायाः ।
विरराज यातुराजो जङ्गमगिरिवद्दवाग्निकीलाभिः ॥ 88

ज्वलनोपमानि तस्या भूमौ निपतन्ति भूषणानि तदा ।
नाशाय राक्षसानां उल्कावृन्दानि निशि यथा रेजुः ॥ 89

पीताम्बरप्रभाभिः समावृतो राक्षसेश्वरस्तस्याः ।
ददृशे कृतान्तकारी दहनो ज्वालाभिरिव सुतीव्राभिः ॥ 90

स्तनभरमध्यात्तस्या हारलता निपतिता तदा ददृशे ।
कीर्तिरिव सा पतिता क्षणदाचरचक्रवर्तिनो मूर्ता ॥ 91

तस्या विधूयमानात् भूमौ निपपात नूपुरश्चरणात् ।
तद्विश्लेषणदुःखात् रुदन्निवाकाशमार्गतो विनदन् ॥ 92

धूसरमहनि सुधांशोर्मण्डलमपिपुण्डरीकमिव सायम् ।
रामं विना न रेजे धरणिसुताया मुखं तदा तस्याः ॥ 93

सा रावणेन सीता ह्रियमाणा ऋश्यमूकशैलाग्रे ।
पञ्चैकत्र निषण्णान् वानरमुख्यान् ददर्श सुप्रख्यान् ॥ 94

चिक्षेप चोत्तरीये बध्वाऽऽभरणानि तत्पुरः क्षिप्रम् ।
न विवेद तानि वेगात् क्षिप्तानि तया तु रावणो गच्छन् ॥95

विपिनानि भूमिधरानपि देशान् सुबहून् व्यतीत्य चाम्भोधिम् ।
उल्लङ्घ्य जातहर्षो लङ्कां समवाप रावणो वीरः ॥ 96

शुद्धान्तमेत्य चकितां प्रमदवने तामशोकवनिकायाम् ।
निक्षिप्य राक्षसीः स्वास्तद्रक्षायै नियोजयामास ॥ 97

मायामृगं स हत्वा मारीचं राक्षसान्तको रामः ।
आगच्छन् वनमध्यादायान्तं लक्ष्मणं ददर्शाग्रे ॥ 98

वीक्ष्यानुजं सशङ्को विह्वलचेता वने समायान्तम् ।
निर्भर्त्स्येति तमूचे कस्मादायासि जानकीं हित्वा ॥ 99

श्रुत्वा स तस्य वचनं भीतस्तस्मान्महेश्वरप्रतिमात् ।
तस्मिन् मृगानुसारिणि सीता यदुवाच तत्समाचख्यौ ॥100

तस्य स शृण्वन् वचनं पश्यन् घोराणि दुर्निमित्तानि ।
विपदमपि जनकजाया निश्चिन्वन्नापदाश्रमं रामः ॥ 101

तूर्णं स पर्णशालां प्रविश्य तत्र प्रियामपि न पश्यन् ।
चुक्रोश रामचन्द्रो हा सीते क्वासि किं करोषीति ॥ 102

ज्ञातुं मनो मदीयं गूढेत्यन्विष्य पर्णशालान्ते ।
निर्गत्य तत्परिसरे शोचन् विचिकाय जानकीं रामः ॥103

कुत्रापि जानकीं तां त्रस्तोऽपश्यन् स लक्ष्मणमवादीत् ।
कुसुमप्रिया प्रिया मे वनं प्रविष्टाऽथ तत्र किं नष्टा ॥ 104

स्नातुं जलं प्रविष्टा गोदावर्या हृता प्रवाहेण ।
अथवा लक्ष्मण सीता हृता हता वा निशाचरैर्घोरैः ॥ 105

इति शोचति रघुवीरे सौमित्रिः प्राह तं पुनः शोचन् ।
आर्य कुरु धैर्यमग्र्यं शोकः सर्वार्थनाशको नाम ॥ 106

सौमित्रिसान्त्वितोऽपि स्नेहाद्धिनिहन्तुं अक्षमः शोकम् ।
धावन् रयेण रामो बभ्राम वने भृशाकुलो दुःखात् ॥ 107

हरिणा वृका वराहाः करिणः सिह्माश्च वानाराः खचराः ।
सीता प्रिया क्व सा मे गिरयस्तरवश्च शंसथ क्षिप्रम् ॥ 108

उन्मत्तवत्स पृच्छन् सचेतनानिव विचेतनानखिलान् ।
विचचार विपिनमध्ये रामः सौमित्रिणा सह भ्रात्रा ॥ 109

अथ कुत्रचिज्जटायुषमपश्यदशनिहतपक्षमिव शैलम् ।
सोऽपि दशाननीतां सीतामाख्याय जीवितं विजहौ ॥ 110

पितरमिव तं गतासुं संस्कृत्य वितीर्य वारि नैवापम् ।
गच्छन् ददर्श पतितं मञ्जीरं पादतोऽथ मैथिल्याः ॥ 111

मणिगणकिरणच्छुरितं मञ्जीरमुत्प्रेक्ष्य मञ्जुलस्फुरणम् ।
हा मैथिलीति विलपन् आदाय हृदिन्यधत्त रघुवीरः ॥ 112

सीतां तेन विदित्वा नीतां चोरेण रावणेन तदा ।
यामीं दिशं प्रतस्थे रामो लक्ष्मणसमन्वितो विपिने ॥ 113

तत्र गिरिदुर्गवर्त्मन्ययोमुखी नाम राक्षसी काऽपि ।
अभ्येत्य दशरथसुतौ लक्ष्मणमालम्ब्य सस्मितमुवाच ॥ 114

एहि मया सह विहर त्वमत्र दुर्गेषु पर्वताग्रेषु ।
सौमित्रिरिति वदन्त्याः कर्णौ नासांस्तनौ च चिच्छेद ॥ 115

रामस्ततो विचिन्वन् भ्रात्रा सह मैथिलीं वने वितते ।
रक्षो ददर्श भीमं कुक्षिस्थमुखं महत्कबन्धाख्यम् ॥ 116

बाहू प्रसार्य मार्गं तिष्ठन्तं योजनायुतं रुध्वा ।
तं वीक्ष्य यातुधानं तस्थतुरेकत्र विस्मितस्वान्तौ ॥ 117

विच्छिन्नबाहुयुगलः पपात भूमौ सविस्तरं विनदन् ।
तस्यैव तौ च वचनात् गर्ते प्रक्षिप्य देहतुर्देहम् ॥ 118

तस्मिन् प्रदह्यमाने मेदोगन्धेन तद्वनं व्याप्तम् ।
स्थूलशिरसः स शापान्मुक्तो दनुजत्वमेत्य भूयोऽपि ॥ 119

आरुह्य देवयानं राममुवाच प्रियावियोगार्तम् ।
राम तव कार्यसिध्यै सुग्रीवं गच्छ तेन कुरु सख्यम् ॥ 120

उक्त्वेति नाकमगमद्रामोऽपि जगाम ऋश्यमूकाद्रिम् ।
स ततो ददर्श शबरीं तयापि भक्त्या प्रपूजितः सम्यक् ॥121

शरभङ्गवच्छरीरं विहाय सविधेऽस्य दिवमगात्सापि ।
स तदाश्रमान्मनोज्ञान्निर्गत्य विलोकयन् वनोद्देशान् ॥ 122

विरहिजनजनिकम्पां पम्पां समवाप जानकीजानिः ॥

इति श्री आर्यारामायणे नवमःसर्गः ॥

----❋----

॥ दशमः सर्गः ॥

अथताममरवधूनां क्रीडावापीमिव श्रियः सुभगाम् ।
जलचरविहङ्गकूजित सन्ततसन्धुक्षितस्मराग्निकणाम् ॥1

उत्फुल्लकमलकैरवकल्हारपरागपिञ्जरक्षीराम् ।
कमलमधुपानमत्त भ्रमरकुलारावमुखरितदिगन्ताम् ॥ 2

वनदेवताविहारप्रसरमृगनाभिसुरभिजलसेव्याम् ।
तटगततरुवरनिपतितकुसुमां गर्तोर्मिराजिरमणीयाम् ॥3

पर्यन्तविपिनभूरुहनिकरछायाविहारिमृगयूथाम् ।
चटुलशफरीविवर्तन संस्मार जनकनन्दिनीनयनाम् ॥ 4

शरदमिव हंससेव्यां तरुणीमिव चारुचक्रवाककुचाम् ।
कविसूक्तिमिव विचित्रां प्राज्ञसभामिव महाकविप्रचुराम् ॥5

श्रियमिव सरोजवसन्तीं सत्सम्पदमिव समस्तजनभोग्याम् ।
कुमतमिव कीर्तिहीनां चेतोवृत्तिमिव निर्मलां महताम् ॥ 6

रम्यां समीक्ष्य सरसीं रघुवीरो जानकीं स्मरन् मनसा ।
कन्दर्पानलतप्तो विललाप नियन्तुमक्षमः शोकम् ॥ 7

सरसिजसुगन्धिवदने चञ्चच्छफराक्षि चक्रवाककुचे ।
कलहंसकान्तगमने हा सीते प्रेयसि क्व यातासि ॥ 8

कलहंस कथय कान्तां गतिप्रिया ते प्रिया क्व याता मे ।
यदि कथयेस्तव राज्यं कलहंसनामहं प्रदास्यामि ॥ 9

यदि दृष्टा कथय त्वं पृथुस्तनी चक्रवाक मम कान्ता ।
तरुणीस्तनोपमानं तव सफलं भवति तत्कुचे दृष्टे ॥ 10

विलपन्निति रघुवीरः कुसुमसमृद्धि(द्ध)तरून् समीक्ष्य वने ।
दत्तक्षार इवासीत् क्षते वसन्तेन जनकीविरहे ॥ 11

लक्ष्मण पश्य समन्तात् सन्ततलक्ष्मीविजृम्भणं विपिने ।
मौनं त्यजन्ति मधुपा मकरन्दास्वादमेदुरामोदाः ॥ 12

विरहिजनहृदयदारणमसमशरक्ष्माप[1]काहली निनदम् ।
उच्चारयन्ति विपिने वनप्रियाः पञ्चमस्वरं मधुरम् ॥ 13

पम्पासरस्तरङ्गान् भिन्दन् मकरन्दसौरभोद्गारी ।
उपयाति मन्मथरथो मन्दं मन्दं च मलयपवमानः ॥ 14

विविधकुसुमप्रसूतां मकरन्दधुनीं मधुव्रता मत्ताः ।
प्रतरन्ति पुष्पनौभिः कान्ताभिः सह कुतूहलात् कान्ताः ॥ 15

माकन्दमञ्जरीषु च्योतन्मकरन्दबिन्दुनिकरासु ।
आलीना मधुपावलिरिषुधिरिवा भाति मदनविशिखानाम् ॥16

---

1. पञ्चशर = मन्मथ, क्ष्मापस्य = अधीशस्य ।

द्रुतकनककान्तिचोरैराकीर्णः कर्णिकारवनपुष्पैः ।
आभाति भूधरोऽयं पीताम्बर इव हरिर्घनश्यामः ॥ 17

[1]कङ्केलयः समन्तात् पल्लवपुष्पैः परिस्फुरद्रागैः ।
मदनहुताशनज्वालाशङ्कां जनयन्ति विरहिणां अधुना ॥18

आभान्ति विपिनमध्ये किंशुककुसुमानि गाढरागाणि ।
विरहिहृदयावदारण संसक्तासृज इव स्मरस्य शराः ॥ 19

तिलको वनस्पतीनां तिलको विकचत्प्रसूनगुच्छश्रीः ।
तापयति हन्त भूयः सीताविरहेण तप्यमानं माम् ॥ 20

विपिने लताः समस्ताः सौमित्रे पुष्पपल्लवप्रचुराः ।
अनुकुर्वन्त्यभिरामं सीताया रत्नमयविभूषायाः ॥ 21

अस्मिन् वसन्तमये पम्पातीरे यदि प्रिया सविधे ।
स्पृहयामि नालकायै नायोध्यायै न चामरावत्यै ॥ 22

भद्रमभिगच्छ भरतं तस्मै चाख्याहि मम दशां कष्टाम् ।
लक्ष्मण जीव चिरं त्वं नाहं जीवामि मैथिलीविरहात् ॥ 23

इति वदति रघुवीरे सौमित्रिस्तं स सान्त्वयन्नूचे ।
शोचन्ति खलु कुपुरुषा भवद्दशा विपदि नैव दाशरथे ॥24

---

1. कङ्केलि – वृक्षविशेषः । Kalidasa mentions the tree in his literature and says it flowers only in Sarad.

उत्साहेन महान्तो महतीं विपदं तरन्ति मतिमन्तः ।
त्वमपि विहाय शोकं[1] सोत्साहो नैव(?)समीहित प्राप्त्यै ॥ 25

इति लक्ष्मणे ब्रुवाणे शोकं विनियम्य धैर्यमालम्ब्य ।
तेन सह काननं तत् पश्यन्नामश्चचार तत्रैव ॥ 26

अथ ऋश्यमूकशिखरे निवसन् सूर्यात्मजः सहामात्यैः ।
अद्राक्षीदभिरामौ सकार्मुकौ रामलक्ष्मणौ तरुणौ ॥ 27

दृष्ट्वा दाशरथी तौ वालिप्रहितौ तदेति मन्वानः ।
अधिगत्य शैलमन्यं तस्थौ तत्रात्ममन्त्रिभिः सार्धम् ॥ 28

आलोच्य स स्वसचिवैर्विचारवन्तं ततो हनूमन्तम् ।
प्रजिघाय कार्मुकधरौ तपस्विनौ कौ इमौ इति ज्ञातुम् ॥ 29

परिगृह्य भिक्षुवेषं पवनसुतः सोऽथ राघवौ गत्वा ।
सविनयमुवाच वचनं तपस्विनौ कौ युवां धनुष्पाणी ॥ 30

यद्यश्विनौ भवन्तौ न तौ स्पृशेतां भुवं पदा देवौ ।
यदि वाऽथ पुष्पवन्तौ न सहचरेतां दिवानिशेशानौ ॥ 31

इति पृच्छत्यनिलसुते रघुपतिवचनेन लक्ष्मणोऽवादीत् ।
भिक्षुं तमग्र्यवेषं विचक्षणं वाक्यचातुरीधुर्यम् ॥ 32

---

1. सोत्साहो याहि समीहितप्राप्त्यै ॥ इति
यतस्व धृत्या समीहितप्राप्त्यै इति वा पाठः सङ्गतो भाति ॥

दशरथस्य नृपस्य तनयौ आवामिह रामलक्ष्मणौ नाम्ना ।
प्रथितो ममाग्रजोऽयं गाम्भीर्यौदार्यमुख्यगुणधामा ॥ 33

कैकेयीवरदानात् राजा प्रास्थापयद्वने वस्तुम् ।
रामं गुणाभिरामं भार्यामस्याहरद्दशग्रीवः । 34

तद्गतिमसौ विचिन्वन् विपिने दृष्ट्वा कबन्धनामानम् ।
राक्षसमहन् स शापान्मुक्तो दनुजत्वमेत्य निजगाद ॥ 35

राम तव कार्यसिध्यै सुग्रीवमुपेहि शीघ्रमेवेति ।
सुग्रीवसख्यमिच्छन् प्रापदसावद्य ऋश्यमूकाद्रिम् ॥ 36

इति लक्ष्मणेन कथितं मारुतिराकर्ण्य भिक्षुवेषं तम् ।
अपहाय प्रतिपद्य प्रकृतिं स्वां राघवं प्रणम्योचे ॥ 37

तपनभुवः सचिवोऽहं हनुमानिति नाम मम भुवि प्रथितम् ।
दृष्ट्वा वने भवन्तं हरिरस्मात् प्राहिणोत् भवत्सविधम् ॥38

सोऽपि भ्रातृविरोधात् भार्याविरही गिराविहैवास्ते ।
तेन सह कीशपतिना कुरुष्व सख्यं समानदुःखेन ॥ 39

इति हनुमदीरितं तद्वचनं संश्रुत्य राघवौ हृष्टौ ।
आरोप्य स्कन्धदेशे तदैव स निनाय रविभुवःसविधम् ॥40

अवतार्य दूरतस्तौ सुग्रीवमुपेत्य मारुतिः स तयोः ।
आवेद्यागमनहेतुं तावपि निन्ये समीपमात्मविभोः ॥ 41

स च तावुपेयिवांसौ सुग्रीवो रामलक्ष्मणौ दृष्ट्वा ।
उत्थाय जातहर्षो रामं परिषस्वजे स चाप्येनम् ॥ 42

स ततः पलाशबहुलां भङ्क्त्वा सालस्य पुष्पितां शाखाम् ।
रामाय विष्टरमदान्मारुतिरपि लक्ष्मणाय तच्छाखाम् ॥ 43

रामे निषेदुषि ततो मारुतिरुत्पाद्य काष्ठतो वह्निम् ।
उभयोर्न्यधत्त मध्ये तौ चक्रतुरग्निसाक्षिकं सख्यम् ॥ 44

सुग्रीवरामसख्ये सीताकपिराजराक्षसेन्द्राणाम् ।
सममस्फुरन् सरोरुहहेमाग्नि निभानि वामनयनानि ॥ 45

आनीय भूषणान्यपि सीताक्षिप्तानि सोत्तरीयाणि ।
रामाय रविसुतोऽदात् तानि समुद्वीक्ष्य सोऽपि विललाप ॥ 46

श्रुतरामशोकहेतुः सुग्रीवो वायुसूनुवचनेन ।
शोचन्तं रघुवीरं वाक्यैर्विविधैश्च सान्त्वयन्नाह ॥ 47

रघुवीर मुञ्च शोकं भवादृशा विपदि नैव शोचन्ति ।
आलम्ब्य धैर्यमग्र्यं निवसात्रैव प्रियामवाप्य सीताम् ॥ 48

इति कथयति हरिराजे तमब्रवीद्राघवः प्रसन्नात्मा ।
जानासि यदि निवासं रक्षोराजस्य कथय मे शीघ्रम् ॥ 49

इति पृच्छति रघुतीरे सुग्रीवः प्राह तं पुनः प्रणयात् ।
जानामि रावणमहं तस्याऽऽवासं तु नैव दाशरथे ॥ 50

यदि नयतु नाकलोकं यदि वा स्थापयतु नागलोके सः ।
तव [1]भार्यामचिरादपि मनुष्या वेदयानि तद्वार्ताम् ॥ 51

इत्थं वदति हरीन्द्रे रामः प्रेम्णा तमाह सुग्रीवम् ।
भ्रातृविरोधाद् दुःखं प्राप्तं भवतेति हनुमता कथितम् ॥ 52

वैरं च किंनिमित्तं भ्रात्रा तव कथय तमहमद्यैव ।
गमयिष्यामि यमान्तिकमजिह्मगै र्द्विर्न भाषते रामः ॥ 53

इति कथितं रघुपतिना वचनं संश्रुत्य वानराधीशः ।
प्रणिपत्य तस्य सर्वं वक्तुं प्रारभत वालिवृत्तान्तम् ॥ 54

कश्चन पुरा बलीयान् मायावी नाम दानवो दर्पात् ।
युद्धाय शक्रनन्दनं पुरं निरुध्याजुहाव रोषेण ॥ 55

आकर्ण्य तस्य वचनं वाली नगराद्विनिर्ययौ रोषात् ।
तमहं तदान्वगच्छं दृष्ट्वाऽऽवां सोऽपि झटिति दुद्राव ॥56

भीत्या बिलं प्रविष्टे तस्मिन्नसुरे महेन्द्रतनयो माम् ।
द्वारि निधाय बिलं प्राविशत्तमनु साहसाद्धीरः ॥ 57

द्वारि चिरकालमवसं बिलस्य तस्माद्विनिर्गतं भूरि ।
रक्तं सफेनबुद्बुदमद्राक्षं मांसकर्दमप्रचुरम् ॥ 58

निश्चित्य तेन निहतं वालिनमाहवविहारिणं शूरम् ।
शिलया [2]शैलमहत्या पिधाय तद्द्वारमागमं स्वपुरीम् ॥ 59

---

1. तव भार्यामचिरादहमन्विष्यावेदयानि तद्वार्ताम् इति समीचीनः पाठः ॥

2. भूरि महत्येति पाठः साधुः ।

दत्वा निवापसलिलं तिष्ठति मयि तत्र मन्त्रिणः सर्वे ।
सम्भूय माऽभ्यषिञ्चन् कपिराजपदे मामनिच्छन्तम् ॥ 60

वाली नियुध्य बलिनं वर्षान्ते तं बिलान्तरे हत्वा ।
व्यावृत्य बिलमुखस्थां शिलां च रोषेण चूर्णयामास ॥ 61

तस्मादुपेत्य नगरीं किष्किन्धां वीक्ष्य मां च राज्यस्थम् ।
चुक्रोध सोऽथ वाली तमहं प्राणंसिषं भयात्कुपितम् ॥ 62

भूतार्थवादिनं मां रोषादयथार्थवादिनं मत्वा ।
निरकासयत्स नगरात् स्वयमपि मामनु विनिर्ययौ रोषात् ॥63

भ्रान्त्वा महीमशेषां मतङ्गशापेन वालिनोऽगम्यम् ।
निशमय्य ऋश्यमूकं पवनतनूजादिहैव निवसामि ॥ 64

सम्पदि सन्ति समस्ता विपदि न कश्चिदिति विश्रुतं लोके ।
सम्पदि च विपदि चायं समो हनूमाननेन जीवामि ॥ 65

इति दुःखकारणं स्वं कथयति दिननाथनन्दने रामः ।
आश्वास्य तं सखायं प्रत्यज्ञास्तेन्द्रनन्दनस्य वधम् ॥66

रामस्य च प्रतिज्ञां श्रुत्वा संस्मृत्य वालिनश्च बलम् ।
ज्ञातुं राघवशक्तिं सुग्रीवः प्राह तद्बलमजानन् ॥ 67

शृणु रामभद्र शूर भ्रातुर्मम वालिनो बलं प्रथितम् ।
ज्ञात्वा तस्य बलं प्राक् पश्चाद्यत्नं कुरुष्व तद्धनने ॥ 68

अरुणोदये स वाली निर्गत्य चतुस्समुद्रतोयेषु ।
स्नात्वोदयात्पुरैव प्रातः समुपैति नित्यशःस्वपुरीम् ॥ 69

असुरः पुरा कदाचन दुन्दुभिरिति सत्वशौर्यदर्पेण ।
भूत्वा लुलायकायः किष्किन्धामेत्य वालिनमुवाच ॥ 70

त्वं बलवानिति लोके हिमवानाचष्ट तेन समुपागाम् ।
युद्धं प्रदेहि मह्यं भीतश्चेन्मामुपैहि शरणं त्वम् ॥ 71

इति बहु विकत्थमानं दुन्दुभिमभिवीक्ष्य रोषतो वाली ।
तेन सह युद्धमकरोत् बहूनि दिवसानि बलवता बलवान् ॥72

पर्वतमात्रशरीरं तं हत्वा दुन्दुभिं रणे वाली ।
चिक्षेप तस्य कायं योजनमात्रे सचापतदिहैव ॥ 73

तस्येदमस्थि सुमहत् पर्वत इव भाति पश्य रघुवीर ।
यस्य बलादति भीतौ बभूवतुर्वारिराशिहिमशैलौ ॥ 74

इत्थं कथयति रविजे पादाङ्गुष्ठेन राघवोऽपि हसन् ।
चिक्षेप कीकसं तत् क्षिप्तं निपपात योजने दशमे ॥ 75

पादाङ्गुष्ठमुखेन क्षिप्तेऽप्यस्थिन्यजातविश्वासः ।
भूयोऽपि राघवाय न्यवेदयद्वालिवीर्यमतिवेलम् ॥ 76

पश्य पुरतः सखे त्वं शैला इव ये समुन्नताः सालाः ।
एकेन पत्रिणैकं बिभेद तेषां स निजबलं प्रथयन् ॥ 77

इत्यपि कथयति रविजे सस्मितमादाय कार्मुकं रामः ।
कृत्वाऽऽततज्यमपि तत् तस्मिन् बाणं च सन्दधे सुदृढम् ॥78

विससर्ज सायकं तं सालान् भित्वा स सप्त सह शैलान् ।
प्रविवेश नाग(नाक)लोकं नाकेभ्यो रामबलमिवाख्यातुम् ॥ 79

तत्प्रत्ययप्रहृष्टं सुग्रीवं प्राह राघवो धृतिमान् ।
समुपैहि वानरपुरीं समाह्वयस्वाद्य वालिनं योद्धुम् ॥ 80

उक्त इति दाशरथिना सुग्रीवो निर्ययौ तदैव गिरेः ।
तमनुचचार धन्वी सलक्ष्मणःसोऽप्यवाप किष्किन्धाम् ॥81

द्वारि पुरस्य स तिष्ठन् जगर्ज युद्धाय क्लृप्तसन्नाहः ।
तं शब्दमसहमानो नगरान्निरगादतिक्रुधा वाली ॥ 82

युद्धमथाद्भुतमासीत् उभयोः सुरराजरवितनूभवयोः ।
मदहस्तिनोरिव वने करिणीहेतोर्जयैषिणोर्बलिनोः ॥ 83

तौ वीक्ष्य जातशङ्कः समानरूपौ महेन्द्ररवितनयौ ।
न मुमोच वालिनि शरं भ्रात्रोरुभयोः स भेदमविजानन् ॥84

वालिप्रहारभीतः सुग्रीवः सोऽथ निववृते शोचन् ।
रामोऽपि तमनुयातो लज्जितमेनं स सान्त्वयन्नूचे ॥ 85

शृणु सुग्रीव यतोऽयं न हतो वाली सरूपयोरुभयोः ।
अज्ञातरूप भेदात् नामोचि शरस्ततो मयाऽमोघः ॥ 86

लक्ष्मण कुरुष्व कण्ठे किञ्चिदभिज्ञानमस्य रविसूनोः ।
श्वः प्रातः समरमुखे ज्ञात्वैनं येन वालिनं हन्याम् ॥ 87

सौमित्रिरीरितं तद्रामेणाकर्ण्य रविभुवः कण्ठे ।
गजपुष्पिकामबध्नात् स्रगिव बभौ सा जयश्रिया निहिता ॥88

स तया व्यञ्जितभेदो निरगाद्युद्धाय वालिना भूयः ।
तमनुययुस्तत्सचिवा रामोऽपि सलक्ष्मणस्ततो धन्वी ॥ 89

समुपेत्य सूर्यसूनुः किष्किन्धाद्धारमद्भुताकारम् ।
प्रजगर्ज घन इव महान् अश्रौषीत्तस्य गार्जितं वाली ॥ 90

यान्तं पुनश्च रोषात् युद्धायोपेत्य वालिनं तारा ।
प्रोवाच नीतिनिपुणा तारापतिबिम्बराजमानमुखी ॥ 91

मागाः कपीन्द्र योद्धुं विना सहायं न योद्धुमागच्छेत् ।
आनाय्यावरजं तं योजय परिसान्त्व्य यौवराज्येन ॥ 92

इति तां नयाद्वदन्तीं वाली निर्भत्स्र्य कालपाशेन ।
आकृष्यमाणचेता भवनान्निर्गत्य गोपुरमवाप ॥ 93

भूयोऽपि युद्धमासीत् भ्रात्रोः सुमहज्जयैषिणोर्बलिनोः ।
शनिकुजयोरिव गगने मुष्टिभिरपि जानुभिस्तलैर्नखरैः ॥ 94

प्रबले वालिनि युद्धे सुग्रीवे हीयमानसत्वेऽपि ।
रामो वने निगूढो वालिवधायाशुगं मुमोच तदा ॥ 95

वक्षसि स तेन विद्धो वाली निपपात वज्रकल्पेन ।
इन्द्रध्वज इव मुक्तः शरद्व्यपाये श्रिया विमुक्तःसन् ॥ 96

वनमध्यादुपयान्तं रामं समुदीक्ष्य वानराधीशः ।
साक्षेपमेनमूचे कण्ठगतासुः शनैः शनैर्वाली ॥ 97

न प्राकृतोऽपि हन्याद्युद्धगतं पुरुषमन्यमन्येन ।
अप्राकृतमिव भावः सूचयति त्वां त्वया कृतं कर्म ॥ 98

कुर्वन्ति नैव शूरा विगर्हितं यत्त्वया कृतं कर्म ।
इत्युक्तवन्तमेनं रामः प्रोवाच वानराधीशम् ॥ 99

पितृवचनतोऽहमागां विपिनं भरतः प्रशास्ति तद्राज्यम् ।
दुष्टविनिबर्हणार्थं निवसाम्यत्रैव विविधमृगसेव्ये ॥ 100

एवं वने चरन्तं सुग्रीवो मामुपेत्य कार्यार्थम् ।
भार्यां ममापहार्षीत् भ्राता निष्कास्य मामपीत्याह ॥ 101

तेन भवन्तं हतवान् तवापि पापं वधाद्गतं वालिन् ।
यद्राजदण्डितानां पापं नास्तीति शास्त्रसिद्धान्तः ॥ 102

इति कथयति रघुवीरे तारा संश्रुत्य वालिनो हननम् ।
आगत्य राघवाग्रे शान्तमिवाग्निं ददर्श निजकान्तम् ॥ 103

हा नाथेति विलप्य क्षोण्यां निपपात वेपमानाङ्गी ।
पुत्रस्तामनु गत्वा पितरं दृष्ट्वाङ्गदोऽपि विललाप ॥ 104

स्वकृतेन तप्यमानः शोचन्तौ तौ समीक्ष्य सुग्रीवः ।
हा कष्टमित्यभीक्ष्णं शोकादश्रु प्रवर्तयामास ॥ 105

अस्तोन्मुखमिव भास्करं अम्बुधिमिव निस्तरङ्गमात्मपतिम् ।
वीक्ष्य विललाप नितरां तारा हारायिताश्रुजलधारा ॥ 106

रामं कार्मुककोटौ निहितभुजं वीक्ष्य शोकसन्तप्ता ।
प्रोवाच वालिना किं वीर कृतं ते निरागसं न्यवधीः ॥ 107

येन रघुवीर हतवान् शरेण घोरेण वालिनं बलिनम् ।
तेनैव मां जहि त्वं क्षणमपि सोढा न मे पतिर्विरहम् ॥ 108

इति तस्यां विलपन्त्यां कण्ठगतासुः समीक्ष्य तां वाली ।
आश्वास्य पुत्रमपि तं राघवहस्ते समर्पयामास ॥ 109

आहूय रविसुतं तं शोचन्तं सूनृतं वदन् वाचा ।
उन्मुच्य कनकमालां कण्ठात्तस्मै ददौ मुदा वाली ॥ 110

पश्यन् मुखं प्रियायाःपुत्रं तमपि प्रभूतशोकार्तम् ।
[1]रामेऽपि वीक्षमाणे वाली निमिमील लोचने नितराम्[2] ॥111

तस्य परलोककृत्यं तारेयो रामशासनादकरोत् ।
सुग्रीवोऽपि तदानीं भ्रात्रे नैवामम्बु वितताार ॥ 112

रामोऽभिषिच्य राज्ये सुग्रीवं तस्य मन्त्रिभिः सार्धम् ।
वालिसुतमङ्गदं तं युवाराजपदे नियोजयामास ॥ 113

इत्यार्यारामायणे दशमः सर्गः ॥

---- ❀ ----

1. "रामं च वीक्षमाणः" इति पाठः "स्वरससङ्गत" इति भाति ।
2. अपुरुन्मीलनायेत्यर्थे नितरामिति प्रयोगः ।

॥ एकादशः सर्गः ॥

समदृश्यन्त दिनाधिपसूनोरभिषेकमीक्षितुं किल ते ।
दिग्भ्यः समं कपिगणैर्विद्युद्वन्तो घनाघना गगने ॥ 1

रविजः समीक्ष्य जलदान् प्रविश पुरीमित्ययाचत सखायम् ।
तत्प्रार्थनापि महती सपदि गुहप्रार्थनेव सञ्जाता ॥ 2

जलधरसमयापगमे जनकसुतान्वेषणे [1]पुरा प्रयते ।
इति राघवस्य रविजः संविदमकरोदुपेयिवान् राज्यम् ॥3

स तथेति तस्य संविदमङ्गीत्यैव रविभुवो रामः ।
विससर्ज तं स चाशु प्राविक्षद्वानरैः सह स्वपुरीम् ॥ 4

समुपेत्य माल्यवन्तं रामोऽपि सहानुजेन शैलाग्र्यम् ।
तत्र विचित्य निवासस्थलं गुहां वीक्ष्य लक्ष्मणमुवाच ॥ 5

एषा गुहा विशालाप्यगोचरा वर्षवातशीतानाम् ।
द्वारि शिला च मनोज्ञा स्थातुं योग्या विभाति सौमित्रे ॥ 6

सुग्रीवदत्तसमयं प्रतीक्षमाणाविहैव निवसाव[2] ।
घोरे जलधरसमये वस्तुं विपिने न युक्तमन्यस्मिन् ॥ 7

---

1. पुरा प्रयते प्रयतिष्ये इत्यर्थे । The indeclinable पुरा used with a Present tense verb gives the sence of future.

2. लोटि - उत्तमपुरुष द्विवचनान्तः ॥

कैतकगन्धसगन्धा वान्ति समन्तात्कदम्बगन्धवहाः ।
विरहिजनहृदयदलनाः सुखिनामपि चित्तवृत्तिभेदकराः ॥8

घनमण्डलेऽतिगाढे विभाति चाखण्डलस्य कोदण्डम् ।
निजसमयकान्तगात्रे कृतं नवं प्रावृषेव नखचिह्नम् ॥ 9

आभान्ति शक्रगोपाः समन्ततः पश्य हन्त सौमित्रे ।
स्मरविद्धविरहिहृदयात् पतिता इव रक्तबिन्दवो भूमौ ॥10

नवकन्दलप्रसूनैर्नवनवसौभाग्यसम्पदुन्मेषैः ।
आभाति भूमिरेषा महती सरसीव विकचकल्हारैः ॥ 11

उन्मुच्य मौनि(न)मुद्रां शिखिनः केका वितन्वते केचित् ।
केचिच्च वीक्ष्य जलदानानन्दात्ताण्डवानि तन्वन्ति ॥ 12

विकसन्ति नीपविटपा कुटजा विकसत्प्रसूनसौरभ्याः ।
मालत्योऽपि मनोज्ञा विकसितकुसुमाः समन्ततो भान्ति ॥13

जम्बूफलानि पक्वान्यास्वाद्यास्वाद्य कोकिला विपिने ।
हर्षं परं प्रपन्नाः परितः कुर्वन्ति पञ्चमालापान् ॥ 14

परिणतफलावनम्रा पाण्डुछाया गिराविमे नम्राः ।
जनयन्ति शुकगणानां शोणमुखानां मुदं सदाराणाम् ॥15

भ्रमराः सरोजषण्डं विहाय विकसत्सु जातिकुसुमेषु ।
विहरन्ति मोदमाना विसृमरसौरभ्यवासिताशेषु ॥ 16

मलिनीकृतानि परितः ककुभां वदनानि [1]कालिकारोधैः ।
ककुभो विकासभाजो विशदीकुर्वन्ति कुसुमसम्पत्या ॥17

धारालवारिवाहैरन्धीभूते दिशां मुखे निखिले ।
विज्ञायते विभेदो दिवारजन्योः प्रबोधनिद्राभ्याम् ॥ 18

पूर्वं जलधरसमये गर्जन्तमाकर्ण्य जानकी सहसा ।
अभ्युद्द्रुत्य [2]सभीता गाढं परिरभ्य परिजहौ भीतिम् ॥19

गर्जन्ति सम्प्रति घनाः स्फुरन्ति परितश्च विद्युतो विविधाः ।
घोरे रावणगेहे तिष्ठत्यघुना कथं नु सा कान्ता ॥ 20

इति लक्ष्मणस्य पुरतो जलधरसमयस्य वर्णयन् स गुणान् ।
निवसन् गिरेर्गुहायां निनाय दिवसान् कथञ्चिदतिघोरान् ॥21

शरदाविरास शनकैः घनावली यत्र कुत्रचिल्लीना ।
अभिवीक्ष्य कुटजशोभां गाढं हसतीव काशकुसुमश्रीः ॥22

नद्य प्रसन्नसलिलाः हंसैराक्रान्तसैकतोद्देशाः ।
उत्फुल्लकुमुदकान्त्या द्विगुणितचन्द्रातपा निशीथिन्यः ॥23

मदमत्यजन्मयूराः समदाः सर्वे च सारसा आसन् ।
समुदश्च राजहंसा उभये स्वोद्योगसमयसम्पत्या ॥ 24

---

1. कलिकावरोधैः । 2. सभया – भीतेत्यर्थेऽयं प्रयोगः ।

गन्धगजमदसगन्धैर्गन्धैरुत्फुल्लकुसुमवृन्दानाम् ।
सप्तच्छदा वितेनुःसिन्धुरवर्यान् वने मदैरन्धान् ॥ 25

पाकात्पिशङ्गशोभा प्रविनम्राग्राश्च शालयः प्रथिताः ।
मुदमजनयन् शुकानां सह कान्ताभिस्ततस्ततो भ्रमताम् ॥26

अर्जुनविकारहारि प्रीतिकरः सकलधार्तराष्ट्रणाम् ।
राधेय इव स समयो भानोः शोभां प्रवर्धयन् शुशुभे ॥ 27

आग्रायणानि समन्तादातेनुः सोमपीथिनः सर्वे ।
गावः प्रभूतपयसः समये तस्मिन् समीहितैर्यवसैः ॥ 28

रामो विलोक्य विमलं नभः प्रसन्ना दिशश्च घनमुक्ताः ।
इति लक्ष्मणं स ऊचे सुग्रीवं याहि राज्यमदमत्तम् ॥ 29

वर्षासमयो व्यतीतः समयश्च स्वेन कल्पितः पूर्वम् ।
न विजानाति स मत्तः कृतघ्नमेनं वचो मम ब्रूहि ॥ 30

[1]वाली मया विनिहतो यातो मार्गेण येन सोऽद्यापि ।
जागर्ति मानुगास्तं तिष्ठ कपिश्रेष्ठ पालयन् समयम् ॥ 31

क्रुद्धस्य राघवस्य श्रुत्वा वचनानि लक्ष्मणस्तूर्णम् ।
उत्थाय कार्मुकं स्वं सज्यं कृत्वा जगाम किष्किन्धाम् ॥32

---

1. समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ।
न च सङ्कुचितः पन्था येन वाली हतो रणे । इति वाल्मीकिवचनमनुसरति पद्यमिदम् ॥

क्रुद्धं तमापतन्तं लक्ष्मणमभिवीक्ष्य वालिनः सूनुः ।
भीतः प्रविश्य भवनं सुग्रीवाय न्येदयत्सहसा ॥ 33

राज्यमदेन स मत्तस्तदुपरि तारारुमोरुभोगेन ।
तदुपरि च पानगोष्ठ्या शृण्वन्नपि तद्वचो न शुश्राव ॥ 34

कपयः समेत्य सर्वे सौमित्रिं वीक्ष्य भीषणं रोषात् ।
त्रासेन किलिकिलारवमातेनुस्तेन स विजहौ तन्द्राम् ॥35

तत एत्य तस्य सचिवौ आप्तौ प्लक्षप्रभावनामानौ ।
मत्तद्विपमिव तोत्रैर्वचनैरेनं वितेनतुः स्ववशम् ॥ 36

तत आकर्ण्य कपीन्द्रो ज्याघोषं लक्ष्मणस्य घोरतरम् ।
तत्रास तं भयार्तं मारुतिरित्याह सान्त्वया वाचा ॥ 37

कपिराज शृणु वचो मे समयमतीतं समीक्ष्य रघुवीरः ।
प्रणयेन सोऽपि कुपितः प्राहैषील्लक्ष्मणं गिरेर्भवने ॥ 38

तस्य कुरु कार्यसिद्धिं लक्ष्मणमभिगम्य सान्त्वय सरोषम् ।
एवं कृते भयं ते न भवेत्तस्मान्महेश्वरप्रतिमात् ॥ 39

वायुतनूभववचनं वालियवीयान्निशम्य सुप्रीतः ।
भीतः स्वयमभिगन्तुं तारां विससर्ज लक्ष्मणाभ्याशम् ॥40

मदविवशलोचना सा तारा ताराधिराजवक्त्रश्रीः ।
सविलासहंसगमना लक्ष्मणसविधं समाससाद शनैः ॥ 41

क्रुद्धस्य तस्य तारा पदयोः प्रणिपत्य सान्त्वयन्नूचे ।
सौमित्रे त्यज रोषं सुग्रीवो रामकार्यसन्नद्धः ॥ 42

दूता कुलाचलस्थानाह्वातुं प्रेषिताः कपीनखिलान् ।
तेऽप्यद्यैव श्वो वा सुगीवस्याज्ञया समेष्यन्ति ॥ 43

इति तारयानुनीतः कोपमहासीन्नरेन्द्रवरसूनुः ।
अथ तं विमुक्तकोपं भूयस्तारा व्यजिज्ञपत्प्रणता ॥ 44

ज्याघोषतस्तव विभो रामस्य सखा बिभेति कपिराजः ।
तमुपेत्य सान्त्वयतरां शीघ्रं कर्ता तवैष [1]सह भार्यम् ॥ 45

सरसं विनयसमेतं सौमित्रिस्तारयेरितं वचनम् ।
श्रुत्वा विवेश भवनं सुग्रीवस्य श्रिया समाक्रान्तम् ॥ 46

तत्र स ददर्श मध्ये वनितानां रविसुतं रुमासहितम् ।
तारागणस्य मध्ये राकाशशिनमिव रोहिणीसहितम् ॥ 47

तं पश्यतस्तदानीं सौमित्रेरजनि लोचनं रक्तम् ।
लक्ष्मणमवेक्ष्य रुष्टं सुग्रीवश्चासनात्समुत्तस्थौ ॥ 48

आश्रावयत्स रोषादग्रजसन्देशमथ रवेः सूनुः ।
लक्ष्मणवचः स शृण्वन् भीतश्चिच्छेद मदकरीं मालाम् ॥49

---

1. खलु कार्यम् or सहकार्यम् साहाय्यमित्यर्थे ।

तेन विमुक्तमदोऽसौ प्रकृतिं प्रतिपद्य लक्ष्मणमवादीत् ।
कोपं जहीहि लक्ष्मण न विस्मराम्येव रामकार्यमहम् ॥ 50

अद्यैवागमनावधिः कपीन्द्रनलनीलऋक्षसङ्घानाम् ।
आगच्छेयुरवश्यं ते सर्वे प्राक् दिवाकरास्तमयात् ॥ 51

इत्थं वदन् स लक्ष्मणमनुनीयारुह्य तेनसह तूर्णम् ।
चतुरन्तयानमग्र्यं जगाम रामान्तिकं च सुग्रीवः ॥ 52

दूरादुदीक्ष्य रामं यानादवरुह्य लक्ष्मणकपीन्द्रौ ।
प्रापतुरस्य समीपं पादौ जग्राह तस्य सुग्रीवः ॥ 53

प्रणतं तमथ स रामो दोर्भ्यां परिगृह्य गाढमालिङ्ग्य ।
पप्रच्छ कुशलमखिलं प्रणयात्कामं प्रसन्नचित्तः सन् ॥ 54

रामेण सह कपीन्द्रे सँल्लपति प्रेमगर्भितैर्वचनैः ।
दिग्भ्यस्ततः समस्ताः कपयोऽदृश्यन्त कोटिशो गगने ॥ 55

निवसन्ति ये प्लवङ्गा बलिनश्चतुरुदधिमध्यशैलेषु ।
ते सर्वेऽपि तदानीं सुग्रीवस्याज्ञया समापेतुः ॥ 56

परिगणयितुं न शक्या येषां सङ्ख्या चतुर्मुखेनापि ।
तान् वीक्ष्य रामभद्रः प्रीतः प्रशशंस सूर्यतनयं तम् ॥ 57

अथ तस्यैव स वचनाद्दिक्षु विचेतुं समन्ततः सीताम् ।
प्राहैषीत्पृथुकीर्तिः सुग्रीवः सत्यसङ्गरः कीशान् ॥ 58

प्राच्यां दिशि प्रवीरं विनतं विससर्ज कपिगणैः सार्धम् ।
वायुसुतमप्यवाच्यां सह वालिज नील जाम्बवत्प्रमुखैः ॥59

श्वशुरं कपिगणसहितं सुषेणमपि वरुणपालितामाशाम् ।
शतबलिमप्यथ बलिनं कपिभिः प्रजिघाय घनदगुप्ताशाम् ॥60

मासमकल्पयदवधिं सुग्रीवस्तीक्ष्णशासनस्तेषाम् ।
रघुनायकोऽपि रभसान्मारुतिमाहूय वाचमित्यूचे ॥ 61

शूरः समो न लोके भवता मतिमानपि मातरिश्वसमवेगः ।
वरमङ्गुलीयकमिदं जनकसुतायै दिशेरभिज्ञानम् ॥ 62

उक्त्वेति रामभद्रः प्रीत्या निजनाममुद्रितं प्रादात् ।
त्वां मारुतेऽस्मदीयं ज्ञास्यति सीता ह्यनेन चिह्नेन ॥ 63

आदाय तत्कपिवरो मूर्धनि विन्यस्य विनयसम्पन्नः ।
तस्य प्रणम्य चरणौ तेन विसृष्टो विनिर्ययौ सहसा ॥ 64

निर्गत्य तत इतस्ते विचित्य सर्वत्र जनकराजसुताम् ।
तत्रावधौ निवृत्ताः पश्चिमपूर्वोत्तरासु ये याताः ॥ 65

प्रस्थापितस्त्वाचीमङ्गदनलनीलजाम्बवत्प्रमुखैः ।
कपिभिर्युतो हनूमान् जनकसुतां तत्र तत्र विचिकाय ॥66

विपिनानि तत्र दुर्गाणि अद्रिगुहाश्चातिदुर्गमाः प्रविशन् ।
विचिकाय वीतभीतिः सीतां वातात्मजो विनालस्यम् ॥67

स ततः सह प्लवङ्गैःप्रविवेशान्यद्वनं महाघोरम् ।
मृगपक्षिसङ्गरहितं जलहीनं कन्दमूलफलशून्यम् ॥ 68

तत्रातपत्तपस्वी नाम्ना कण्डुर्महर्षिभिः सार्धम् ।
बालस्तस्य तनूजो नष्टोऽन्विष्टोऽपि नैव दृष्टोऽभूत् ॥69

तेन स रुष्टः शापं दत्वा तस्मै वनाय वनमन्यत् ।
तपसे जगाम शोकात् तच्छापादास्त तद्वनं शून्यम् ॥ 70

दृष्ट्वा कश्चन दैत्यं विपिने तस्मिन् महीधराकारम् ।
मत्वा रावणमथ तं वालितनूजस्तलेन निजघान ॥ 71

अङ्गदतलप्रहारात् घोरात् रक्तं तदागमद्भूरि ।
असुरः पपात भूमौ पर्वत इववज्रिवज्रपातेन ॥ 72

तस्मिन्नङ्गदनिहते बलिनःप्लवगा निरीक्ष्य तद्विपिनम् ।
अद्राक्षुर्जनकसुतां अन्विष्यन्तो मुहुर्न कुत्रापि ॥ 73

अथ विन्ध्यमभ्यगच्छन्नन्विष्यन्तो वनेषु विविधेषु ।
सीतां पिपासितास्ते तस्थुस्तस्यैव भूभृतः शिखरे ॥ 74

हंसान् जलार्द्रपक्षान् ऋक्षबिलान्निर्गतान् सह क्रौञ्चैः ।
दृष्ट्वा जगाद मारुतिरङ्गदनलनीलजाम्बवत्प्रमुखान् ॥ 75

अत्र जलमस्त्यवश्यं हंसा निर्यान्ति सारसैः सार्धम् ।
प्रविशामो बिलमेतत्पीत्वा जलमत्र विचिनुमः सीताम् ॥76

इत्थं वायुतनूजे कथयति विविशुर्बिलं तदा सर्वे ।
भास्वत्प्रकाशरहितं तमसाक्रान्तं समन्ततो घोरम् ॥ 77

एवं योजनमात्रं हस्तानालम्ब्य जग्मुरन्योन्यम् ।
दृष्ट्वा ततः प्रकाशं हृष्टा विविशुर्वनं महद्दिव्यम् ॥ 78

तस्मिन् काञ्चनवृक्षान् सरश्च कनकाम्बुजैः समाकीर्णम् ।
दृष्ट्वा तंत्र विमानं विस्मयमीयुः पपुश्च तत्र जलम् ॥ 79

श्रान्तिमपनीय तस्मिन् तपस्विनीं ते स्वयंप्रभां नाम ।
दृष्ट्वा प्रणेमुरस्यै सापि कपीन्वीक्ष्य विस्मितोवाच ॥ 80

के वा वानरवीरा यूयं प्राविशत किन्नु बिलमेतत् ।
नरवानरैरगम्यं कथयत मम कौतुकं महच्छ्रोतुम् ॥ 81

कथयन्त्यामिति तस्यां मारुतिराचष्ट मैथिलीहरणम् ।
सुग्रीवरामसख्यं सीतान्वेषणनिमित्तमागमनम् ॥ 82

पप्रच्छ तामपि पुनः का त्वं कस्येदमद्भुतं गहनम् ।
इति मातरिश्वतनये पृच्छति तस्मै स्वयंप्रभाऽऽचख्यौ ॥83

कश्चिदसुरः पुरासीन्मायावी विश्रुतो मयो नाम (नाम्ना) ।
तेन विनिर्मितमेतत्काननमखिलं च कनकवृक्षमयम् ॥ 84

अस्त्यप्सरस्सु काचन हेमा नामातिरूपसम्पन्ना ।
तस्यां मयमतिसक्तं शक्रो निजघान कुलिशघातेन ॥ 85

तस्मिन् हते वनमिदं हेमायै पद्मसम्भवः प्रादात् ।
तनया स्वयंप्रभायां जाता तस्यां तु मेरुसावर्णेः ॥ 86

तस्या वनमतिरम्यं रक्षामि सुवर्णवृक्षवल्लीभिः ।
तीव्रं तपश्चरन्ती कार्यं करवाणि कपिवराः किं वः ॥ 87

तथ्यं प्रियं वदन्तीमित्थं तां मरुतिःप्रणम्योचे ।
अस्मान् बिलादमुष्मान्निस्सारय कार्यसिद्धये शीघ्रम् ॥ 88

इत्थं वायुतनूजे कथयति तं सा स्वयंप्रभोवाच ।
यदि निर्गन्तुमपेक्षा सर्वे गाढं निमिलताक्षीणि ॥ 89

तस्या निशम्य वाचं पिदधुर्नयनानि करतलैःसर्वे ।
सापि तपसः प्रभावान्निर्गमयामास तान् बिलाद्धीमात् ॥ 90

इत्यार्यारामायणे एकादशःसर्गः ॥

------- ✦ -------

।। द्वादश : सर्गः ।।

आलोक्याथ कपीन्द्रान् वालिसुतः प्राह कालविन्मतिमान् ।
समयस्तु स व्यतीतो विन्ध्येऽस्मिन्नो विचिन्वतां सीताम् ॥ 1

तस्याः प्रवृत्तिशून्यान् समयं चातीत्य सन्निधिं प्राप्तान् ।
सुग्रीव उदग्रदण्डो यावद्धातयति नात्र सन्देहः ॥ 2

तस्मादिहैव सर्वे *शुद्धाः प्रायोपवेशनं कृत्वा ।
प्राणान् प्रियान् जहीमो यदि वो मम रोचते वचो ब्रूत ॥ 3

इत्यङ्गदेन भाषितमङ्गीकृत्य प्रशस्य तद्वचनम् ।
आप्लुत्य वारिधिजले कपयः प्रायोपवेशनमकुर्वन् ॥ 4

तत्र रघूदहवृत्तं कपिमुख्यानां विषादतो वदताम् ।
आकर्ण्य कलकलरवं गृध्रवरः कन्दरात्तदाभ्यागात् ॥ 5

अभिवीक्ष्य वानरवरान् जिघत्सुरिदमब्रवीत्खगाधीशः ।
आहारो रुचिरो मे चिरकालादागतः क्षुधाभाजः ॥ 6

एतान् क्रमेण भोक्ष्ये प्राप्तान् प्रायोपवेशनं कीशान् ।
अनुकूले सति दैवे सिध्येज्जन्तोः समीहितं प्रायः ॥ 7

श्रुत्वाङ्गदस्तदा तत् सन्नद्धोऽवोचदञ्जनासूनुम् ।
पश्य खगश्छलतोऽसावस्मान् प्राप्तः कृतान्त एव परम् ॥ 8

---

* कथयन्तो रामवृत्तं सर्वे ।

न कृतं राघवकार्यं सुग्रीवस्यापि वचनमस्माभिः ।
तूर्णमथाप्यतिघोरा विपदियमधुना कुतः समायाता ॥ 9

आकर्ण्याङ्गदवचनं प्रत्यूचुस्तं मरुत्सुतप्रमुखाः ।
युवराज मा वदैवं त्यक्तुं प्राणान् वयं हि सन्नद्धाः ॥ 10

यदि भक्षयति खगोऽस्मान् राघवहेतोः समुज्झितप्राणाः ।
झटिति जटायुरिवैते पुण्यान् लोकान् लभामहेऽज् वयम् ॥11

इति तैः समीरिते तन्निशम्य वचनं खगाधिपः प्राह ।
मयि मा रचय शङ्कां मन्यध्वं मां जटायुषोऽग्रभवम् ॥ 12

अवतारयत गिरेर्मां अहमपि साहायकं विधास्ये वः ।
इति निगदति खगराजे सर्वे सम्मन्त्र्य तेऽब्रुवन्नेवम् ॥ 13

एवं विचिन्त्य कीशाः शनकैरुद्यम्य शैलशृङ्गात्तम् ।
अनयन्नवनीमचिरात् अत्यद्भुतकायमाकुलस्वान्ताः ॥ 14

अथ तान् वीक्ष्य खगेन्द्रो बाष्पपरिप्लुष्टदीनवदनान् सः ।
मृतकल्पान् मृदुवाक्यैर्बहुशः परिमोदयन्नुाचोच्चैः ॥ 15

के यूयं कपिवराः कस्मात्प्रायोपवेशनं प्राप्ताः ।
राघवकथाप्रसङ्गे मरणं कथयथ जटायुषो भ्रातुः ॥ 16

राम इति को जटायुः केन हतः शंसतादितः सर्वम् ।
इति पृच्छते च तस्मै वालितनूजो न्यवेदयद् वृत्तम् ॥ 17

श्रुत्वाऽनुजस्य निधनं गृध्रस्तानाह वानरप्रवरान् ।
मां नयत वारिराशिं परलोकविधिं जटायुषःकर्तुम् ॥ 18

बहुलभरं तुमुलपार्श्वं सुग्रीवोल्लसितमपगतपतत्रम् ।
अब्धौ(ब्धिं) गृध्रवरं ते निन्युर्मन्दरमिवाचलं विबुधाः ॥19

नीतः स तैः समुद्रं स्नात्वा भ्रात्रे निवापमपि शोचन् ।
दत्वा तत्र स सीतां रावणनीतां तदा समाचख्यौ ॥ 20

सा कुत्रेत्यनु पृष्टस्तैरूचे दक्षिणाम्बुधेर्मध्ये ।
योजनशते त्रिकूटे लङ्कामधिवसति जनकराजसुता ॥ 21

तां प्रति गच्छत नगरीं तत्र द्रक्ष्यथ रघूद्वहस्य वधूम् ।
गुप्तां राक्षसगेहे प्रायः पतिनिहितभावपरिशुद्धाम् ॥ 22

मम पुत्रोऽत्र सुपार्श्वो ह्रियमाणां रावणेन तां सीताम् ।
हा राम लक्ष्मणेति क्रन्दन्तीं वीक्ष्य मम समाचख्यौ ॥ 23

अहमपि फणामि किञ्चन वचनं तथ्यं समस्तविस्मयदम् ।
शृणुत समाहितचित्ताः शूराः समरे प्लवङ्गमप्रवराः ॥ 24

सङ्क्रन्दनेन रचिते वृत्रस्य वधे पुरातिघोरतरे ।
अन्योन्यं बलदर्पात् जटायुरहमपि नभस्थलमवाप ॥ 25

अनुजो ममातिबलवान् शलभो ज्वलनमिव नभसि तिग्मकरम् ।
जाज्वल्यमानभासं तमुपेत्य तदातिखिन्नतां प्राप ॥ 26

आलोक्य तादृशं तं भ्रातृस्नेहेन गोपयन् गरुता ।
तीक्ष्ण[1]भयाद्दिवसपतेर्दग्धपतत्रोऽतिविह्वलोऽभूवम् ॥ 27

विन्ध्यगिरावहमपतं भूधर इव वज्रिवज्रपातेन ।
षड्दिवसापगमेऽहं संज्ञां शनकैरयासिषं दिष्ट्या ॥ 28

तत्र हि निशाकरमुनिं दृष्ट्वा प्राणंसिषं महात्मानम् ।
आलोक्य मामथ मुनिर्ध्यात्वा क्षणमात्रमब्रवीद्वचनम् ॥29

पक्षौ च ते मनोज्ञौ पुनरपि सुदृढौ चिरेण भवितारौ ।
गृध्र तथाप्यधुना त्वां कर्तुं पक्षयुतमाशु शक्नोमि ॥ 30

अश्रौषं पूर्वमहं सुमहत्कार्यं भविष्यति सुराणाम् ।
ध्यानाच्च दृष्टमधुना रामो भवितेति दशरथनृपालात् ॥31

भार्यां तस्य जनकजां बलवान् दशकन्धरो हरिष्यति ताम् ।
सा तद्दत्तं भोज्यं क्लेशान्नाङ्गीकरिष्यति तदात्वे ॥ 32

तस्यै जनकसुतायै त्रिदशैरपि दुर्लभं(?)मनोहारि ।
दास्यत्यमृतनिकाशं परमान्नं पाकशासनो भक्त्या ॥ 33

अग्रे तत्र गृहीत्वा पतिव्रता जनकभूमिपालसुता ।
बाष्पायमाणनयना पत्युश्चरणारविन्दसंस्मरणात् ॥ 34

यदि जीवति रघुवीरो मम जीवितनायकः सहभ्रात्रा ।
प्राप्तोऽथवाऽमरत्वं तस्य भवत्विति निधास्यति क्षोण्याम् ॥35

---

1. तीक्ष्णकरात् ।

एष्यन्ति तत इतस्ते(इतश्च)राघवदूता गवेषयन्तस्ताम् ।
तस्याः प्रवृत्तिमखिलां तेभ्यो निगदेति मां मुनिरवादीत् ॥ 36

दग्धं पक्षयुगं ते पुनरप्यङ्कुरमेष्यति तदेति ।
उक्त्वा स मां दयालुः स्वकीयमाश्रममगात् मुनिः प्रीतः ॥ 37

शाखामृगप्रवीरा भवदागमनं निरीक्षमाणोऽहम् ।
अब्दानष्टसहस्रं महता यत्नेन तीर्णवानधुना ॥ 38

सीता प्रवृत्तिमित्थं ब्रुवतो गृध्रस्य भास्करप्लुष्टौ ।
पक्षौ तदैव जातौ वरप्रदानान्निवशाकरस्य मुनेः ॥ 39

स प्रत्ययेन तेन प्रीतिं जनयन्कपिप्रवीराणाम् ।
आमन्त्र्य तानशेषान् प्रीतोऽथ जगाम गगननार्गेण ॥ 40

गृध्रस्य तस्य वचनं निशम्य सर्वे प्लवङ्गमप्रवराः ।
उत्थायाथ वितेनुः प्रीताः सर्वेऽपि किलकिलारावान् ॥ 41

आशां रवितनयेशां समीक्ष्य सीताप्रवृत्तिजाताशाः ।
कीशाः पिशङ्गकेशाः केशवपदमापुरुज्झितक्लेशाः ॥ 42

अभ्येत्य गगनमार्गेणोत्तरतीरमपि दक्षिणाम्भोधेः ।
तत्र निवासमकुर्वन् अङ्गदनलनीलजाम्बवत्प्रमुखाः ॥ 43

उल्लोलवीचिमालं घोरं सर्वे समीक्ष्य वाराशिम् ।
कपयो विषादमगमन् वालिसुतस्तानवेक्ष्य निजगाद ॥44

किं वानराः पयोधिं वीक्ष्यैव विषण्णतां परां प्राप्ताः ।
स्वां स्वां लङ्घनशक्तिं ब्रूथेत्येतान् बभाण तारेयः ॥ 45

आकर्ण्याङ्गदवचनं प्रत्यूचुस्तं प्लवङ्गमप्रवराः ।
कल्लोलिनीशतरणे निजनिजशक्तिं तदा विवृण्वन्तः ॥ 46

दशयोजनानि गजस्तरितुं शक्तोऽहमिति जगाद तदा ।
विंशतिमपि गवाक्षः शरभस्त्रिंशद्योजनप्लवने ॥ 47

चत्वारिंशतमृषभः प्लवनधुरीणः प्लवङ्गमाधीशः ।
अथ गन्धमादनोऽपि च पञ्चशतमद्रिराजसमसारः ॥ 48

मैन्दोऽपि महितसत्वः षष्टिं द्विविदोऽपि सप्ततिं वीरः ।
शूरस्तदनु सुषेणः सुग्रीवाज्ञाधुरन्धरोऽशीतिम् ॥ 49

अथ जाम्बवानवादीत् पूर्वं विष्णोस्त्रिविक्रमे समये ।
क्षोणीप्रदक्षिणं प्राक् कृतवांस्त्रिस्सप्तकृत्व एवाहम् ॥ 50

अधुना पश्यत हरयो वपुर्मदीयं जरावृतमथापि ।
लङ्घयितुमम्बुराशेर्नवतिं शक्नोमि योजनानि शनैः ॥ 51

तदनु च वालितनूजो दक्षःशतयोजनानि सन्तरितुम् ।
किन्तु पुनरागमविधौ शक्तो नैवाहमिति जगाद तदा ॥ 52

शाखामृगप्रवीरेष्वेवं कथयत्सु तत्र सकलेषु ।
भल्लूकचक्रवर्ती वक्तुमुपाक्रमत वायुजोदन्तम् ॥ 53

प्रयतेत यदि हनुमान् अस्मिन् कर्मणिकपिप्रवीरोऽसौ ।
सिध्येत्समीहितं नः शक्तोऽयं सप्तसागरांस्तरितुम् ॥ 54

बालः पुरा हनूमान् भानोरुदयन्तमम्बरे बिम्बम् ।
पक्वं फलमिति मत्वा जिघृक्षुरेतज्जगाम वेगेन ॥ 55

राहुरकाले भानुं ग्रसितुमुपैतीति शतमखो मत्वा ।
वज्रमपासृजदस्मै भग्नहनुस्तेन निर्गतासुरभूत् ॥ 56

प्रीत्यै प्रभञ्जनस्य प्रादादस्मै ह्यवध्यतामखिलैः ।
आयुश्च दीर्घमस्मै ब्रह्मा शक्रादिभिः सुरैः सार्धम् ॥ 57

उक्तं जाम्बवतेत्थं वचनं संश्रुत्य मारुतिर्वीरः ।
वारां निधिं तरीतुं व्यधत्त सन्नाहमखिलकपिमध्ये ॥ 58

सन्धुक्ष्यमाणशौर्यो जाम्बवता मारुतात्मजो धृतिमान् ।
ववृधे स वामन इव त्रिविक्रमक्रमणवर्धितोत्साहः ॥ 59

तत आरुरोह शैलं महेन्द्रमम्भोनिधिं तरीतुमनाः ।
आरूढवति हनूमति भुग्नोऽभूद्भूधरः स भारेण ॥ 60

आरुह्य तस्य शृङ्गं कपीन् समालिङ्ग्य जाम्बवत्प्रमुखान् ।
आपृच्छ्य तानशेषांस्तरितुं वार्धिं ततान सन्नाहम् ॥ 61

इति श्री आर्यारामायणे द्वादशः सर्गः ॥

॥ इति किष्किन्धाकाण्डः समाप्तः ॥

॥ त्रयोदशः सर्गः ॥

(सुन्दरकाण्डः)

ज्ञातुं ततः प्रवृत्तिं सीताया रावणेन नीतायाः ।
मारुतिरद्रितटस्थो दीर्घां दृष्टिं महोदधौ विदधे ॥ 1

सा दृष्टिरपि पिशङ्गी महोदधौ भाविसेतुबन्धाय ।
बद्धेव हेमरज्जुः बभौ महेन्द्रत्रिकूटयोः शिखरे ॥ 2

तत उत्पपात गगनं गिरिकूटान्मारुतिः स वेगेन ।
तस्योत्पतनरयेण क्षोणीं प्रविवेश सानुमान् सुमहान् ॥ 3

तस्य गुहासु निलीना मृगा मृगेन्द्राः शिलासु भग्नासु ।
निष्क्रमणमलभमाना नेदुर्भीताः समन्ततो घोरम् ॥ 4

सर्पा उदीर्णदर्पा प्रस्तरसन्धिषु विषक्तपुच्छाग्राः ।
विस्तृतफणा विरेजुः केतव इव भूमिभर्तुरुद्धोगाः ॥ 5

वायुजवेगजमारुतविकृष्यमाणाः समन्ततो वृक्षाः ।
गच्छन्तमनुययुस्तं सुहृदः सुहृदं विदेशमिव यान्तम् ॥ 6

उत्प्लुत्य भूधराग्रादुपेयुषि व्योम कपिवरे वीरे ।
तं वीक्ष्य जातहर्षाः किलिकिलिरावान् वनौकसस्तेनुः ॥ 7

लाङ्गूलं पृथुदीर्घं कर्षन् वेगेन पवनमार्गेण ।
गच्छन् पवनतनूजो गरुड इवाभान्महोरगाकर्षी ॥ 8

नयने सुवर्णवर्णे तस्य विनिर्यत्विषी खरे जाते ।
ज्वलनाविवोज्ज्वलन्तौ पर्वतशिखरस्फुरच्छिखा निकरौ ॥9

बाहू च तस्य भूमौ दीर्घौ वृत्तौ विरेजतुर्गगने ।
गरुडेन नीयमानौ पश्चास्याविव भुजङ्गमप्रवरौ ॥ 10

सीतान्वेषणहेतोर्वातोपमवेगमम्बरे यान्तम् ।
आलोक्य पवनतनयं तुष्टुवुराकाशगानि भूतानि ॥ 11

दशयोजनप्रवितता त्रिंशद्योजनसमायता महती ।
छाया तस्य च जलधौ वितता नौरिव ततान गच्छन्ती ॥12

रामस्य कार्यसिध्यै तरन्तमम्भोनिधिं हनूमन्तम् ।
दृष्ट्वा सागरवचनान्मैनाकः सानुमान् समुत्तस्थौ ॥ 13

तं वीक्ष्य वायुसूनौ विघ्नं मत्वोरसाऽभिहत्य रयात् ।
गच्छति तमाह स गिरिः शिखरे तिष्ठन् मनुष्यरूपेण ॥14

अलमन्यथा विचार्य त्वं मे मान्योऽसि वायुतनयत्वात् ।
त्वत्पित्रोपकृतोऽहं तस्माद्विश्रान्तये तवाभ्यागाम् ॥ 15

विश्रम्य मयि फलानि स्वादून्यास्वाद्य खेदमपनीय ।
गच्छेति तेन कथिते स्पृष्ट्वा मूर्धानमस्य स प्रययौ ॥ 16

वज्री विलोक्य तमिमं हिरण्यनाभं हनूमतः सुहृदम् ।
अभयं ददौ च तस्मै प्रीतः स्वैरं चरेति सप्रणयम् ॥ 17

तस्य प्रशस्य शौर्यं द्रष्टुं भूयोऽपि विक्रमं देवाः ।
गगनपथगमनविघ्नं कर्तुं सुरसां प्रचोदयामासुः ॥ 18

सुरसा द्विरसनमाता पर्वतमात्रं विधाय सा गात्रम् ।
भूत्वा राक्षसरूपा विदार्य वक्त्रं रुरोध तन्मार्गम् ॥ 19

मध्येपयोधि मूर्तं प्रत्यूहं वीक्ष्य मारुतिर्घोरम् ।
अवलम्ब्य धैर्यमग्र्यं मार्गं मुञ्चेति तामुवाचोच्चैः ॥ 20

तमुवाच सापि सुरसा सुरैः प्रदिष्टो भवान् ममाहारः ।
तत्प्रविश वक्त्रमध्यं विनिर्गमस्तेऽपि दुर्लभो भूयः ॥ 21

तस्यां तथा वदन्त्यां मारुतिरतिरोषभीषणाकारः ।
दशयोजनोच्छ्रितोऽभूद्विंशति योजनसमुच्छ्रिता सापि ॥22

पर्यायेण कपीन्द्रे विवर्धमाने तथैव सा ववृधे ।
समुदीक्ष्य तस्य वृद्धिं विस्मयमीयुः सुरा विमानस्थाः ॥23

शतयोजनोच्छ्रया सा यदा तु जाता तदाऽऽञ्जनेयोऽपि ।
सूक्ष्मं विधाय गात्रं प्रविश्य तद्वक्त्रमाशु निर्यातः ॥ 24

एवं विजित्य सुरसां तिष्ठन्तं वीक्ष्य मारुतिं देवाः ।
परितुष्टुवुस्तदैनं सा प्रीता मार्गमपि ददौ तस्मै ॥ 25

हिमसंहतिं मिहिरो व्युदस्य विघ्नं घनान्तरे हि गच्छन् ।
पद्भ्यां च तान्विकर्षन् सपक्ष इव पर्वतः सुरैर्ददृशे ॥ 26

अथ राक्षसी हनूमच्छायां जग्राह सिंहिका नाम ।
स च नैरिवाम्बुराशौ सम्मुखवातेन नियमितस्तस्थौ ॥ 27

स दिशो दशापि पश्यन् फणीव मन्त्रेण रुद्धसञ्चारः ।
छायां निरुन्धतीं तां समुत्पतन्तीं ददर्श वाराशेः ॥ 28

दृष्ट्वा तामथ रोषात् ववृधे घन इव स पूर्ववातेन ।
पातालभीषणास्या सापि तमत्तुं समापतत् त्वरया ॥ 29

तामत्तुमापतन्तीं विवृतास्यां वीक्ष्य मारुतिर्घोराम् ।
मारुतिमपेतभीतिं चुक्रुशुरम्बरचराणि भूतानि ॥ 30

स च बुद्धिमान् हनूमान् कुक्षेरन्तः प्रविश्य राक्षस्याः ।
नखरैर्वज्रसमानैर्विदार्यहृदयं विनिर्ययौ तस्याः ॥ 31

घोरां निशाचरीं तां निपात्य भूयोऽपि गगनमार्गेण ।
यान्तं तमाञ्जनोयं तुष्टुवुराकाशचारिणः सिद्धाः ॥ 32

विघ्नान् बहून्निरस्यन् शौर्यं बुद्धिं बलं च संप्रथयन् ।
गच्छन्नम्बरमार्गे दक्षिणतीरं ददर्श वाराशेः ॥ 33

तत्र गिरीनतिदुर्गान् वनानि विविधानि [1]वार्धिदाराणाम् ।
वदनानि प्रपश्यन् अचिन्तयन्मारुतिर्महावीरः ॥ 34

---

1. वार्धिदाराः नद्यः । तेषां वदनानि नदीमुखानि इत्यर्थः ।

एतादृशाकृतिं मां यदि पश्येयुर्निशाचरा घोराः ।
लङ्काप्रवेशनिघ्नं कुर्युरिति क्षिप्रमभजत प्रकृतिम् ॥ 35

अधिवेलमथ हनूमान् लम्बाख्यस्य क्षमाभृतः शृङ्गम् ।
तुङ्गं समाससाद शृण्वन् रम्याणि पक्षिविरुतानि ॥ 36

स्थित्वा तत्र मुहूर्तं वनानि पश्यन् विचित्ररूपाणि ।
अथ स त्रिकूटशिखरे ददर्श लङ्कां निशाचरेशपुरीम् ॥ 37

अवधीरितरविभासं हेमप्राकारशोभया शुभया ।
नवरत्नगोपुररुचा शतमखचापभ्रमं वितन्वानाम् ॥ 38

अभ्रंलिहैरमेयैः प्रासादैर्हेमरत्नचित्राङ्गैः ।
मध्यंदिनेषु ददतीं विश्रान्तिं मिहिररथतुरगाणाम् ॥ 39

सौधेषु यत्र रात्रौ क्रीडन्तीनां ध्रुवं मृगाक्षीणाम् ।
आलोक्य वदनशोभां प्रतिमासं क्षीयते क्षपानाथः ॥ 40

यस्याः सौधतलेषु प्रसरन्तं वीक्ष्य वासनायूथम् ।
नृत्यन्ति नीलकण्ठा निरन्तरं नीरदावलिभ्रान्त्या ॥41

मरतकशिलानिबद्धान् महोपलैरन्तरान्तरा खचितान् ।
यत्कुट्टिमप्रदेशान् क्रीडाहरिणा लिहन्ति वारिधिया ॥ 42

यस्यां विलासिनीनां वक्षोजाकारपरिणतिं लब्धुम् ।
अद्यापि वारिमध्ये तपश्चरन्तीव कमलमुकुलानि ॥ 43

तरुणीस्तनेषु यस्यां निहिताहाराः गनोहराकाराः ।
चरतां परितो मेरुं कान्तिं नूनं भजन्ति ताराणाम् ॥ 44

सौधाः सुधाधवलिताः स्फटिकशिलास्तम्भकान्तिसङ्क्रान्ताः ।
यस्यां शशिविशदज्योत्स्नाभ्रान्तिं दिवापि तन्वन्ति ॥ 45

अभितो विराजमानामारामैरमरतरुवनप्रतिमैः ।
गुप्तां राक्षसवीरैर्वीक्ष्य पुरीं तां स चिन्तयामास ॥ 46

एषा पुरी न शक्या प्रवेष्टुमपि मारुतेन मम पित्रा ।
कथमेनां प्रविशेयं कथं नु रामस्य कार्यमपि सिध्येत् ॥ 47

शतयोजनप्रमाणं वानरसेना कथं तरेद्वार्धिम् ।
अपि लङ्घनं पयोधेः सफलं मे स्यात्समीहितप्राप्त्यै ॥ 48

यदि वा जीवति सीता नवेति चिन्तातुरो हनूमान् सः ।
उत्तरगोपुरसविधे शेषं च निनाय वासरस्य सुधीः ॥ 49

अथ भानुरस्तशैलं जगाम मन्दतरकिरणसञ्चारः ।
जनयन् व्यथां सुमहतीं रथाङ्गनाम्नोःसमेधितप्रेम्णोः ॥ 50

कनकाम्बुजं किमेतद्गगननदीवारिपूरसञ्जातम् ।
आहोस्विदब्धिपतितं परिपक्वं गगनमातुलुङ्गफलम् ॥ 51

पश्चिमदिशाङ्गनायाः पुरःस्थितं पद्मरागमुकुरं किम् ।
मणिकुण्डलं किमथवा वारुण्याः कान्तिपूर विच्छुरितम् ॥52

इति मुग्धकाशशमिनीभिर्वितर्कितं भानुमण्डलं बहुधा ।
निपपात पश्चिमाब्धेः पयसि प्रथमानरागपरिवेषम् ॥ 53

अथ पश्चिमाम्बु राशेर्गगनोपघ्नं समाश्रयन्तीनाम् ।
विद्रुमलतावलीनां द्युतिरिव सान्ध्यस्तदोदभूद्रागः ॥ 54

चरमगिरिविपिनमध्ये सञ्जातस्य प्रभेव दावाग्नेः ।
अम्बरतले प्रसर्पन्सन्ध्यारागः समन्ततः प्रबभौ ॥ 55

सकलभुवनस्य जेत्रा मानवतीमान भङ्गकरणाय ।
मदनेन हूयमानज्वलनज्वालेव सा बभौ सन्ध्या ॥ 56

अथ तां निरस्य सन्ध्यां स्थानिनमादेश इव तमस्स्तोमः ।
तिरयन् दिशोऽजनि तदा जनयन्नभिसारिकामनोहर्षम् ॥57

उदभूत्ततः शशाङ्को विशदीकुर्वन् दिशोऽखिलाः किरणैः ।
कोककुलशोकदायी लोकस्य प्रीतिमावहन्नक्ष्णोः ॥ 58

तं वीक्ष्य जातकुतुको मारुतिरुल्लङ्घ्य सालवत्तुङ्गम् ।
मार्जारमात्रकायो लङ्कां प्रविवेश राक्षसैर्गुप्ताम् ॥ 59

नवरत्नतोरणवतीं मुक्तावैडूर्यचित्रितगवाक्षाम् ।
रत्नारोहणरुचिरां स्वर्णप्राकारराजिरमणीयाम् ॥ 60

प्रविशन्तमाञ्जनेयं लङ्का समुपेत्य राक्षसीभूता ।
पुरुषं प्रतर्जयन्ती जघान तामपि स वामहस्तेन ॥ 61

तस्य प्रहारभीता कथयित्वा सा स्वयम्भुवः शापम् ।
राक्षसविनाशपिशुनं ददावनुज्ञां पुरीप्रवेशाय ॥ 62

पश्यन् स राजमार्ग अतीव रम्याणि राक्षसगृहाणि ।
सुरयानमिव चित्रं भवनं प्रविवेश राक्षसाधिपतेः ॥ 63

दैर्घ्येण योजनमितं विस्तारेणार्धयोजनोपेतम् ।
सिह्मासनैः समन्तात् कुथाभि राशोभितं विचित्राभिः ॥ 64

सङ्गीतध्वनिमिश्रं तस्य स शुश्राव दिव्यतूर्यरवम् ।
नृत्यन्तीरभिरामा रामाश्च ददर्श रावणस्य गृहे ॥ 65

इत्यार्यारामायणे त्रयोदशः सर्गः ॥

॥ चतुर्दशः सर्गः ॥

अथ मध्यमधिवसन्तं नभसो घ्नन्तं निशामुखध्वान्तम् ।
ज्योत्स्नासुधां किरन्तं ददर्श धीमान् स यामिनीकान्तम् ॥1

विरहिजनं व्यथयन्तं सुखयन्तं सकलमपि जनस्वान्तम् ।
निजकान्तिं प्रथयन्तं चकोरहर्षं विशिष्य जनयन्तम् ॥2

कमलानि मुकुलयन्तं कैरवकोशानि झटिति दलयन्तम् ।
जलनिधिमुत्तटयन्तं द्रवयन्तं द्युतिभरेण शशिकान्तम् ॥3

कोकान्वियोजयन्तं सरभसमभिसारिका निरुन्धन्तम् ।
भुवनं प्रकाशयन्तं जयकालमिव स्मरस्य कथयन्तम् ॥4

साचिव्यं समुपेयुषि निशामये तत्र तत्र सञ्चिन्वन् ।
जनकतनयामपश्यन् अद्राक्षीत् पुष्पकं ततो दिव्यम् ॥5

निर्माय विश्वकर्मा प्रादात्पद्मासनाय यत्पूर्वम् ।
तस्माल्लब्ध्वा धनदस्तं जित्वा रावणेन चापहृतम् ॥ 6

तस्मादलभत धनदः तं जित्वा रावणेन चापहृतम् ।
जाम्बूनदेन रचितं रुचिरं सर्वत्र मणिमयस्तम्भैः ॥ 7

नवरत्ननिकरखचितं मुक्तावैढूर्य चित्रितगवाक्षम् ।
मरकतशिलानिबद्धैः स्वारोहं सर्वतश्च सोपानैः ॥ 8

उच्चावचैश्च रत्नैर्विराजमानाग्रमग्र्यतेजोभिः ।
पुण्यजनचक्रवर्ती मत्तो हस्तीव तत्र करिणीभिः ॥ 9

स विहृत्य कामिनीभिः शिश्ये श्रान्तस्तमन्वशेरत ताः ।
दीपप्रभाभिरभितो महतीभिर्दृश्यमान तद्रूपः ॥ 10

आरुह्य पुष्पकं तत्स्वर्गं मेने दशाननं चेन्द्रम् ।
निद्रावशेन विवशा निर्णिद्रसरोजराजमानमुखी ॥ 11

नलिनीरिवाम्बुमध्ये ददर्श वनिताः समन्ततः श्लिष्टाः ।
श्वासानिलेन चलितास्तासां कुचभूधरेषु वसनान्ताः ॥12

शोभां परामवापुर्भूमिधराग्रेषु केतुवसनानाम् ।
तासां कुचयुगमध्ये पुञ्जीभूता मनोहरास्ताराः ॥ 13

हारा विरेजुरभितो हंसा इव चक्रवाकमध्यगताः ।
लावण्यवार्धिभरिता नद्य इवाम्भोरुहेक्षणा रेजुः ॥ 14

सुप्तं वनितासहस्रं तारैर्हारैः समन्ततः कीर्णम् ।
सर इव सुप्तसरोजं *तत्पुरमाबभौ सहंसकुलम् ॥ 15

वदनानि किं बधूनां आहोस्विदमूनि चन्द्रबिम्बानि ।
इति तर्कयन् हनूमांस्तासां विचिकाय जानकीं मध्ये ॥16

अथ रावणस्य सविधे सौवर्णवज्रचित्रिते शयने ।
मन्दोदरीं प्रसुप्तां स ददर्श मनोज्ञरूपसम्पन्नाम् ॥ 17

पूर्णेन्दुबिम्बवदनां बिम्बोष्ठीं कम्बुचारुतरकण्ठीम् ।
कोमलभुजाभिरामां कोकप्रतिमानपीनवक्षोजाम् ॥ 18

तनुरोमराजिशोभां तलोदरीं निम्ननाभिसौन्दर्याम् ।
गगनोपमावलग्नां पृथुजघनामायतोन्नत श्रोणीम् ॥ 19

रम्भास्तम्भनिभोरूं शंबरारिपुकाहलोल्लसज्जङ्घाम् ।
पल्लवकोमलपादां सान्द्रज्योत्स्नासमुल्लसत्क्षौमाम् ॥ 20

---

1. पुरं – Female apartment.

निद्रानिमीलिताक्षीं निरन्तरश्वास वेमानकुचाम् ।
मुक्ताविभूषणवतीं साक्षादिव दुग्धवारिधेस्तनयाम् ॥ 21

तां वीक्ष्य जातहर्षः सीतां मत्वा रघूद्वहस्य वधूम् ।
आत्मीयजाति सदृशीमकरोच्चेष्टां स मारुतिर्बहुधा ॥ 22

अथ बुद्धिमान् हनूमान् विचार्य युक्त्या वितर्कगर्हितया ।
सुखिता च भूषिताङ्गी नैषा सीतेति निश्चिकायाशु ॥ 23

विचिता जनक तनूजा रक्षोराजस्य शोभने भवने ।
कुत्रापि नैव दृष्टा प्रायो निहता निशाचरैर्घोरैः ॥ 24

हन्त मम निष्फलोऽभूद्वारिधितरणे परिश्रमः सुमहान् ।
इति चिन्तयन् हनूमान् भवनप्राकारमारुरोह शनैः ॥ 25

तस्थौ तत्र मुहूर्तं परितो भवनं विलोकयन् भव्यम् ।
रक्षोबलेन महता कृतरक्षायोगमप्रमत्तेन ॥ 26

स ततो ददर्श विपुलामशोकवनिकां शुकास्यशोणाभाम् ।
सौधैः सुधाधवलितैः विराजितां विश्वकर्मणा रचितैः ॥27

परितः सुवर्णवृक्षैः सालैस्तालैस्तमालहिन्तालैः ।
पुन्नागसरलकेसर लिकुचाम्ररसाल चम्पकैः कीर्णम् ॥28

मुक्तासैकतनिश्रा मध्ये मध्ये सुनिर्मलमनोज्ञजलाः ।
सुवर्णकमलाभिरामाः सरसीश्च ददर्श मारुतिस्तस्याः ॥29

अभ्रंलिहाग्रशाखां स्वर्णमयीं तत्रशिंशुपां दृष्ट्वा ।
उत्प्लुत्य सालशाखां तूर्णं तामाप घनदलच्छन्नाम् ॥ 30

मारुतिवेगसमुत्थितमारुतचलिताः समन्ततो वृक्षाः ।
ववृषुः प्रसूननिकरं प्रीता इव तस्य पौरुषात्सर्वे ॥ 31

आसाद्य तामथ कपिः बहुचिन्तातन्तुजाल संस्यूतः ।
तत्रस्थ एव दृष्टया सीतां विचिकाय राघवस्य वधूम् ॥ 32

तस्मिन् वने मनोज्ञे कल्पद्रुमसुरभि वासनाकान्ते ।
कङ्केलिवृक्षमूले घोराः स ददर्श राक्षसीर्विविधाः ॥ 33

मध्ये ततः स तासां व्याघ्रीणामिव मृगीमतित्रस्ताम् ।
ध्यायन्तीं निजकान्तं चित्रगतामिव विनम्रवक्त्राब्जाम् ॥34

प्रतिपत्कलामिवेन्दोरग्नेर्धूमामिवावृतज्वालाम् ।
मणिमिव कर्दमपतितामवाप तोषं समीक्ष्य मारुतिः ॥ 35

इयमेव सा जनकजा ह्रियमाणा रावणेन या दृष्टा ।
विरहेण परिकृशामप्येनां न जहाति हन्त लावण्यम् ॥36

अति धीरः खलु रामो विरहेणास्या न मुञ्चति प्राणान् ।
मनुजेषु को नु जीवेत् एतादृश्याः स्त्रिया वियोगेन ॥37

एषा च तस्य योग्या भार्या रूपेण किञ्च धैर्येण ।
इति तर्कयन् हनूमान् जगाम पारं मनोरथाम्भोधेः ॥ 38

जनकात्मजा रजन्याश्चरमे यामे हनूमता दृष्टा ।
तत्रैव सोऽपि समये बुबोध दशकन्धरः स्मरन्सीताम् ॥39

परिचारिकाधृतानां समन्ततो गन्धतैलसिक्तानाम् ।
मणिदण्डदीपिकानां आलोकेनाययौ दशग्रीवः ॥ 40

काञ्चीकलापनिनदं कान्तानां तत्र तमनु यान्तीनाम् ।
मञ्जीरशब्दमिश्रं शुश्राव समन्ततो हनूमान् सः ॥ 41

कान्तावृतं समन्तात् काममिवाकारवन्तमभियान्तम् ।
अन्तिकमथो हनूमान् वीक्ष्य निलिल्ये स वृक्षशाखायाम् ॥42

स निलीन एव तस्यां रक्षोराजस्य चेष्टितं सर्वम् ।
अद्राक्षीदपि सीतां भीत्या तं वीक्ष्य वेपमानाङ्गीम् ॥ 43

आलोक्य रावणं तं सीता भीता विनम्रवक्त्राब्जा ।
ऊरुभ्यामुदरं स्वं कुचौ कराभ्यामजूगुपत्[1] गाढम् ॥ 44

रक्षः पतिरपि सीतां ददर्श विषमेषुपीडितस्वान्तः ।
रामं हृदा स्मरन्ती रुदतीमुपवासपरिकृशां मलिनाम् ॥45

क्षीणजलामिव तटिनीं नलिनीमिव तुहिन योगतः शोभाम् ।
वाणीमिवार्थहीनां श्रुतिमिव पाषण्डमण्डलक्लिष्टाम् ॥ 46

---

1. अजूगुपत् - "गुपूरक्षणे" इति धातोः लुङि अयं प्रयोगः ।

आयान्तमन्तिकतमं पङ्क्तिमुखं वीक्ष्य पापिनं क्रूरम् ।
तत्रास सा जनकसुता मृगीव शार्दूलमधिकदीनमुखी ॥ 47

दृष्ट्वा तथाविधां तां रक्षोराजो वचोभिरनुनीय ।
इत्थं जगाद वचनं क्लिश्यसि सीते किमर्थमेवं त्वम् ॥48

लङ्कापुरी ममेयं द्रष्टुमशक्या सुरासुरैरखिलैः ।
जलधिं विलङ्घ्य घोरं कथमेनामाप्नुयुर्नरः सीते[1] ॥ 49

रामो [2]नरः पतिस्ते राज्यभ्रष्टो विवासितो भ्रात्रा ।
निवसति वने तपस्वी तस्मिन्नाशां करोषि किं सीते ॥50

शक्रादयश्च सर्वे दिक्पाला मूर्ध्नि मम वहन्त्याज्ञाम् ।
कल्पद्रुमा वनेऽस्मिन् काङ्क्षितफलदाःसमन्ततो भान्ति ॥51

काञ्चनमये पुरीन्द्रे प्रासादा रत्ननिर्मिताः सर्वे ।
कान्ताः सहस्रशो मे भवने सुरनागवंशसम्भूताः ॥ 52

भूत्वा ममाग्रमहिषी सीते त्वं सर्वलक्षणोपेता ;
सौन्दर्य भूषितानां तासामीशा भवाशु सर्वासाम् ॥ 53

इति रावणे ब्रुवाणे तृणमन्तरतो निधाय सा सीता ।
निःश्वसती तमवोचत् पतिं स्मरन्ती प्रवेपमानाङ्गी ॥ 54

---

1. पुरुषवाचक-नृशब्दस्य प्रथमाबहुवचने रूपमिदम् ।
2. अकारान्तो नर शब्दः प्रथमैक वचनान्तः ॥

विश्रवसस्तनयस्त्वं पुलस्त्यपौत्रो महाकुलोत्पन्नः ।
तद्राक्षसेन्द्र युक्तं नैवं वक्तुं विपश्चिता भवता ॥ 55

रावण निहन्त्यवश्यं परवनितास्पर्शनं परंश्रेयः ।
आयुः श्रियं च कीर्तिं लोकानामपि सुकृतसञ्चितान् पुंसाम् ॥56

तस्मान्निवर्तय मनः परदारेभ्यः प्रसीद यातुपते ।
रामं प्रसादय मामपि स च ते श्रेयो विधास्यति प्रीतः ॥57

नो चेत्प्राप्स्यसि पदवीं निहतानां रक्षसां जनस्थाने ।
क्रुद्धः स रुद्रसदृशः प्रदहेत् सुरासुरं जगत्सर्वम् ॥ 58

वचनं निशम्य तस्या दशकण्ठः सपदि कुण्ठितोत्साहः ।
रोषारुणेक्षणःसन् आहूय तदा निशाचरीरखिलाः ॥ 59

यदि नैषा भवतीनां शृणुयाद्वचनं ततो विशस्यैनाम् ।
प्रातर्महाशनं मे प्रापयत क्षिप्रमिति विवेश पुरीम् ॥ 60

इत्यार्यारामायणे चतुर्दशः सर्गः ॥

॥ पञ्चादशः सर्गः ॥

तस्मिन् यातेऽतिघोरे राक्षस्यस्ताः परीत्य सीतां ताः ।
सामादिचतुरुपायैस्तस्या हृदयं प्रलोभयामासुः ॥ 1

स्थैर्यं जहौ न सीता वाक्यैर्विविधैः प्रलोभ्यमानापि ।
छिन्नापि चन्दनतरोः शाखा विजहाति किं निजामोदम् ।।2

वचनैरनेकभेदैः प्रतर्जनाभिश्च बहुविधाभिस्ताः ।
रामानुरागरूढं चेतस्तस्या न शेकुराक्रष्टुम् ।। 3

क्रुद्धा हि ताः समस्तास्तामत्तुं तामुपाययुः सीताम् ।
तां वीक्ष्य वेपमानां त्रिजटा सा झटिति वारयन्त्याह ।। 4

स्वप्नो मयाद्य दृष्टः शुभप्रदो जनकराजतनयायाः ।
रामं भूधरशिखरे गजाधिरूढं सहानयाऽद्राक्षम् ।। 5

दशकन्धरोऽपि दृष्टः स्वप्ने तैलानुलिप्तसर्वाङ्गः ।
रक्ताम्बरस्रगाशां यामीं गच्छन् स्त्रिया विकृष्टः सन् ।।6

सीता ततोऽनुनेया भर्तास्याः सकलरक्षसां हन्ता ।
तास्त्रिजटयेत्थं कथितं निशम्य भीतास्ततस्ततः शयिताः ।।7

दुःखेन वीतनिद्रा सीताऽशोकस्य साऽऽनतां शाखाम् ।
आलम्ब्य रामभद्रेत्याक्रुश्य रुरोद रावणाद्भीता ।। 8

सीतां महौषधिलतिकां रक्षोऽवग्रहसमागमग्लपिताम् ।
रामस्य मारुतिघनो ववर्ष गुणवर्णनाम्बुधाराभिः ।। 9

सीताराघवचरितं श्रुत्वा सर्वत्र निदधती दृष्टिम् ।
तं वीक्ष्य शिंशुपायाः शाखायां वानरं च तत्रास ।। 10

दुःस्वप्नदर्शनधिया तदाशशंसे स्वभर्तुरेव शिवम् ।
स्वप्नो न यन्न निद्रा विरहाद्रामस्य किन्नु मायेयम् ॥ 11

इति तर्कभाजि तस्यां अवसरमधिगम्य मारुतिः शनकैः ।
अवरुह्य शिंशुपायाः प्रणम्य दूरे कृताञ्जलिस्तस्थौ ॥ 12

तं वीक्ष्य वेपमाना सीता विललाप रावणं मत्वा ।
अपहरणे यतिरासीदधुनापि स वानरो बभूवेति ॥ 13

आत्मनिवारणबुध्या भयविवशां तामवेक्ष्य भावेन ।
मारुतिरुपेत्य तस्यै भर्तुरभिज्ञानमङ्गुलीयमदात् ॥ 14

तद्वीक्ष्य जातहर्षा सीता शङ्कां विहाय कपिवीरे ।
पप्रच्छ कस्त्वमिति तं स रामदूतं स्वमकथयत्तस्यै ॥15

त्वं वाजरोऽसि रामो नृपतिस्तस्याभवः कथं दूतः ।
इति तस्यां कथयन्त्यां वक्तुमुपाक्रमत रामदूतत्वम् ॥ 16

अस्ति प्रशस्तकीर्तिः सुग्रीवो नाम वानराधीराः ।
तस्य सचितो हनूमान्नामाहं मातरिश्वनः सूनुः ॥ 17

त्वां राक्षसाऽपनीतां सीतेऽन्विष्यन्सलक्ष्मणो रामः ।
समवाप ऋश्यमूकं तत्रासीद्रामरविजयोः सख्यम् ॥ 18

सख्युः प्रियं चिकीर्षन् सुग्रीवोऽत्युग्रशासनः प्लुवगान् ।
दिक्षु भवतीं विचेतुं मैथिलीं विससर्ज तेऽपि निर्याताः ॥19

अथ राघवस्तदानीं मयि नितरामेव जातविश्वासः ।
त्वत्प्रत्ययाय सीते ददावभिज्ञानमङ्गुलीयमिदम् ॥ 20

अहमङ्गदप्रधानैः कपिभिरवाचीं विचित्य सह वीरैः ।
सम्पातिगृध्रवचनात् विलङ्घ्य वाराशिमागतो लङ्काम् ॥21

रक्षोऽधिपस्य भवनं प्रविश्य रक्षोबलेन कृतरक्षाम् ।
अन्विष्य तत्र भवतीं सीतेऽपश्यन्निहाहमभ्यागाम् ॥ 22

आरुह्य शिंशिपतरुं अभितः पश्यन्नशोकतरुमूलम् ।
योगीव योगसिद्धिं त्वमद्राक्षं महाप्रयत्नेन ॥ 23

त्वद्विरहेण कृशाङ्गः कुशलं पप्रच्छ तव पतिः सीते।
लक्ष्मणकपीश्वरावपि प्रणम्य भवतीमपृच्छतां कुशलम् ॥ 24

इत्युक्तवति हनूमति सीता पप्रच्छ जातविश्वासा ।
कथमार्यपुत्र आस्ते किं मनुते किं करोति मद्विरही ॥25

सौमित्रिरपि स आस्ते कथमार्यं दुःखितं समीक्ष्य वने ।
पृच्छन्त्यामिति तस्यां पत्युरवस्थां पुनश्च तामूचे ॥26

विरहेण राघवस्ते प्रवृत्तिमपि तावकीमजानानः ।
शोचन्नुदश्रुपूरः सीते क्वासीत्यनुक्षणं रौति ॥ 27

आश्रयति मौनमुद्रां न पिबति नाश्नाति नैव निद्राति ।
सौमित्रिरपि कृशाङ्गः शोचन्तमनु शोचति प्रेम्णा ॥ 28

इत्थं कपिप्रवीरे सम्यग्वर्णयति राघवस्य दशाम् ।
श्रुत्वा जनकतनूजा दुःखादश्रु प्रवर्तयामास ॥ 29

तां कृशतराङ्गलतिकां तपस्विनीं वीक्ष्य मारुतिः शोचन् ।
तद्दुःखमसहमानो बद्धाञ्जलिराह सान्त्वयन् भक्त्या ॥ 30

विरहेण *तव पतिस्ते शोचति विरहेण तस्य भवती च ।
नल भैम्योरिव योगो युवयोरद्यैव भवतु वैदेहि ॥ 31

आरोह चरमगात्रं पतिव्रते त्वां वहन्नहं सीते ।
वार्धिं विलङ्घ्य घोरं रामाय त्वरितमर्पयिष्यामि ॥ 32

इति मारुतिं वदन्तं सीता प्राकृतं कपिं मत्वा ।
वोढा कथं भवान् मां अल्पशरीरोऽर्णवं तरन् घोरम् ॥33

इति सीतयेरितं तद्वचनं संश्रुत्य मारुतिर्वीरः ।
मत्वा नवं परिभवं ववृधे विन्ध्याद्रिरिव महाकायः ॥ 34

तं वर्धमानगात्रं ताम्राक्षं हेमपिङ्गलाक्षियुगम् ।
वज्रनिभभीमदंष्ट्रं विस्मयमगमत् विलोक्य वैदेही ॥ 35

कुवलयलसद्गुणानां पातिव्रत्यस्य पत्युरप्यर्हम् ।
वाक्यं जगाद सीता लोकहितं सर्वदेवतानुमतम् ॥ 36

---

* लाघवात् गुरुविरहेण पतिस्ते इति पाठः अपि समञ्जसो भाति । तव ते इति षष्ठयन्तद्वयस्य विरहेण इति पतिः इति भिन्नपदद्वयेनैव अन्वयात् नात्रानौचित्यमेव । गुरु विरहेण पतिस्ते इति कथनेऽपि ते इति षष्ठ्यन्तस्य आवृत्तस्योभयत्रान्वयः संभवति ।

अज्ञात्वा तव विभुतां अहमेतदवोचमञ्जनासूनो ।
उत्खाय शैलमेनं सराक्षसं वोढुमपि समर्थस्त्वम् ॥ 37

न ज्ञानतस्स्पृशेयं परपुरुषं रावणोऽहरत्पापी ।
विवशां भयेन पत्यौ विनिहितचित्तां बलादनिच्छन्तीं ॥38

यदि बुद्धिलाघवादहमागच्छेयं त्वया सहैव कपे ।
पाथोनिधौ पतेयं तव वेगात् स्थातुमक्षमा गात्रे ॥ 39

यदि दैवादनपायिन्युपयाता कपिवर त्वया साकम् ।
शङ्केत राघवो मयि तस्य क्रुद्धस्य वारिराशिरपि शुष्येत् ॥ 40

यदि मां कपे नयन्तं [1]पश्येयुस्ते निशाचरा घोराः ।
गगनपथगमन विघ्नं कुर्युस्तेनापि कार्यहानिःस्यात् ॥41

अतस्त्वया सह कपे नागच्छेयं त्वमेव गत्वाऽऽशु ।
रामं सानुजमानय कारय तेनास्य रावणस्य वधम् ॥ 42

अनला विभीषणसुता मातुर्वाक्येन मामुपेत्याह ।
दण्डेन साध्यमेनं रावणमन्येन केनचिदसाध्यम् ॥ 43

प्रतिपालयामि मासं मासादूर्ध्वं तु जीवितं जह्याम् ।
इति तस्यां कथयन्त्यां मारुतिराश्वास्य तां पुनरुवाच ॥44

---

1. त्वां पश्येयुर्निशाचरा घोराः इति पाठः युक्तो भाति ।

देवी विमुञ्च सोकं शीघ्रं रामो विलङ्घ्य वाराशिम् ।
सुग्रीव लक्ष्मणाभ्यां समुपेष्यति कीशसेनया साकम् ॥ 45

देवि त्वया यदुक्तं क्षत्रियया राघवस्य तदभिमतम् ।
रामस्य पादमूलं यास्याम्यद्युनैव देह्यभिज्ञानम् ॥ 46

इत्युक्तवति हनूमति सीता हृष्टा तमब्रवीद्भूयः ।
यच्चित्रकूटशिखरे काकेन कृतं तत्कथय तस्मै ॥ 47

वनवासप्रथमाब्दे कदाचिदुपविटपि चित्तकूटगिरौ ।
श्रान्तो ममार्यपुत्रो विन्यस्याङ्के शिरः स सुष्वाप ॥ 48

सुखसुप्त भाजि तस्मिन् कश्चन काकः समेत्य मांसार्थी ।
वक्षोरुहं व्यादारयदग्रनखैरथ विबोधितो नाथः ॥ 49

स विबुद्धो मां समीक्ष्य क्षतजाक्तां काकमपि पुरो हि भृशम् ।
रोषारुणेक्षणः सन् व्यसृजदिषीकास्त्रमल्पके तस्मिन् ॥ 50

सोऽस्त्रेण बाध्यमानः त्राणं लोकत्रयेऽप्यलब्ध्वैन्द्रिः ।
रामं शरणमुपागात् सोऽप्येकाक्षिव्ययेन तं विजहौ ॥ 51

लुप्ते कपोलतिलके स्वयमलिखत्तं रहो मनःशिलया ।
कपिवीर आर्यपुत्रे तस्मिन् कथयेदमप्यभिज्ञानम् ॥ 52

उक्त्वेति जनकतनूजा चूडारत्नं विसृज्य वस्त्रगतम् ।
रामाय देयमिति तं मारुतिहस्ते समर्पयामास ॥ 53

आदाय तं मणिवरं मारुतिरभियोज्य सम्यगङ्गुल्या ।
तस्यै प्रणम्य भक्त्या तया विसृष्टः कृताञ्जलिः प्रययौ ॥54

निर्गत्य तत्परिसरात् प्रमदं वनमीक्ष्य मारुती रोषात् ।
प्रबभञ्ज वृक्षषण्ढं पक्षिकुलक्लेशमाशु सञ्जनयन् ॥ 55

दृष्ट्वा वनस्य भङ्गं दुष्टा भीता निशाचरप्रमदाः ।
पप्रच्छुरेत्य सीतां कोऽयं प्लवगः किमर्थमायातः ॥ 56

ताः प्रत्युवाच सीता यूयं जानीथ रक्षसां मायाम् ।
अहिरेव वेत्यहिपदं भक्त्य एवैनमपि विदन्तीह ॥ 57

अथ प्रविश्य भवनं दशवदनाय न्यवेदयत्कोऽपि ।
कपिरेत्य सीतया सह सँल्लप्य वनं बभञ्ज तच्छूरः ॥ 58

वनरक्षिणश्च सर्वे निशाचरा रावणाय तच्चरितम् ।
आचख्युः स च कुपितः किङ्करान् प्राहिणोच्छतं शूरान् ॥59

तानागतानशेषान् वायुतनूजो निमेषमात्रेण ।
यात्वामिषं बुभुक्षोर्यमस्य जीवाहुतिं तदा चक्रे ॥ 60

तत उत्प्लुत्य स वेगात् चैत्यप्रसादतोरणे तस्थौ ।
तं वीक्ष्य यातुधाना प्रतिसूर्यं मेनिरे कपिश्रेष्ठम् ॥ 61

तत्र स्थितो हनूमान् आस्फोट्योच्चैः स्वनाम विश्राव्य ।
दाशरथिर्विजयते सुग्रीवश्चेत्यघोषयच्छूरः ॥ 62

श्रुत्वा तस्य निनादं शूरास्तद्रक्षिणः समापेतुः ।
परिघेण तेन तानप्यनयद्यमसदनमशनिकल्पेन॥ 63

परितो हरिर्हुताशं जनयित्वा चैत्यसौधमपिदग्ध्वा ।
विननाद सिंहराडिव लङ्कां शब्देन पूरयन् महता ॥ 64

श्रुत्वा राक्षसराजश्चैत्यप्रासादरक्षिणां निधनम् ।
कपिनिग्रहाय बलिनं प्रहस्तपुत्रं प्रचोदयामास ॥ 65

आयान्तं विकिरन्तं शरवर्षं जम्बुमालिनं बलिनम् ।
परिघेण तेन हत्वाऽगमयद्यमसदनमञ्जनासूनुः ॥ 66

निहतं प्रहस्तपुत्रं कपिना श्रुत्वा निशाचराधीशः ।
सप्तार्चिरुग्रभासो मन्त्रिसुतान् सप्त चोदयामास ॥ 67

तेऽपि शरान् विकिरन्तः चापानादाय सैनिकैःसार्धम् ।
आसेदुःस च तानप्यालोक्य ननाद सिंहवद्वीरः ॥ 68

तत उत्प्लुत्य स सालं महान्तमुत्खाय गरुडवद्गगने ।
विचरं श्चमूपतींस्तानननयत्तेनैव पञ्चतां पञ्च ॥ 69

आकर्ण्य राक्षसेन्द्रश्चमूपतीनां निबर्हणमरौषीत् ।
आदिक्षदमितसत्वं कुमारमक्षं प्लवङ्गशिक्षायै ॥ 70

स च शिरसा पितुराज्ञां वहन् ससैन्यो विनिर्ययौ सहसा ।
तं वीक्ष्य जातरोषो व्यवर्धतातीव मारुतिर्वीरः ॥ 71

अक्षोऽपि चापशिक्षालाघवमखिलं प्रकाशयन् बलवान् ।
शाखामृगप्रवीरं समासदत्सायकान् किरन् घोरान् ॥ 72

वृषभ इव वर्षबिन्दून् सहमानस्तस्य सायकाञ्छूरः ।
विरथं चकार मारुतिरक्षं विनिहत्य सूतमप्यश्वान् ॥ 73

विरथं ततो हनूमान् प्लवमानं योद्धुमश्मनेवाक्षम् ।
अक्षं तलप्रहारैर्मुष्टिभिरिति झटिति चूर्णयामास ॥ 74

विनिहत्य तस्य सैन्यं मुष्टिभिरपि जानुभिर्नखैर्दन्तैः ।
गमयित्वा यमसदनं तोरणमभ्येत्य तत्र निषसाद ॥ 75

अक्षं कुमारमाजौ निहतं श्रुत्वा हनूमता बलिना ।
रक्षः पतिरतिरोषात् इन्द्रजितं वीक्ष्य वाक्यमिदमूचे ॥ 76

त्वं मधवतोऽपि जेता तथापि यत्नं महान्तमास्थाय ।
युध्वा कपिप्रवीरं बध्वा मम शीघ्रमानय सकाशम् ॥ 77

प्लवग इति मावमंस्थाः खगराडिव सत्ववानयं सूनो ।
तस्मादुपायतस्तं गृहाण गच्छेति चोदयामास ॥ 78

प्रणिपत्य सोऽपि पितरं स्यन्दनमास्थाय शक्रजिच्छूरः ।
श्वसनसुतमाससाद प्रथयन् शौर्यं किरन् शरान् विविधान् ॥ 79

इन्द्रजितमापतन्तं वीक्ष्यहनूमान् च तोरणात्तस्मात् ।
उत्प्लुत्य गगनमार्गे तिष्ठन् युयुधे निजं बलं प्रथयन् ॥ 80

अस्त्रैरवध्यमखिलैस्तं मत्वा रावणिर्महासत्वम् ।
तद्वेगमसहमानो ब्राह्मेण बबन्ध तूर्णमस्त्रेण ॥ 81

स ब्रह्मणो हनूमान् संस्मृत्य वरं च मानयन् अस्त्रम् ।
तस्थौ निपत्य तूष्णीं तेन विमुक्तश्च तत्क्षणादेव ॥ 82

रक्षःपतिं दिदृक्षुर्विवक्षुरागमनमात्मनस्तस्मै ।
आत्मानमस्त्रबन्धात् मुक्तं ज्ञात्वापि बद्धवत्तस्थौ ॥ 83

इत्यार्यारामायणे पञ्चदशःसर्गः ॥

------ ------

॥ षोडशः सर्गः ॥

सिह्मासने निषण्णं स्फटिकमये पङ्क्तिकन्धरं हनुमान् ।
पुण्यसमूहे मूर्तममेयपापं तं ततोऽद्राक्षीत् ॥ 1

स्वं भर्त्सयितुमिव द्राक् रत्नस्तम्भेषु सदसि सर्वेषु ।
प्रतिबिम्बितमतिकोपं अक्षकुमारादिरक्षसां हननात् ॥ 2

कामक्रोधमदादिभिरसद्गुणैर्मूर्तिमद्भिरिव घोरैः ।
सचिवैः प्रहस्तमुख्यैः समन्वितं क्रूरकर्मनिष्णातैः ॥ 3

रक्षोभिरमितवीर्यैरुदायुधैः सेवितस्य तस्य विभोः ।
तेजः समीक्ष्य सुमहत् तादृङ् मनसा विचिन्तयामास ॥ 4

तेजोबलप्रधानैर्युक्तोऽयं राक्षसेश्वरो नीत्या ।
युक्तश्चेदयमेव त्रैलोक्यस्यापि नाथार्हःस्यात् ॥ 5

इति तं विचारयन्तं मारुतिमालोक्य राक्षसाधीशः ।
अशपत् यो रजताद्रौ किमेष नन्दीति तर्कयामास ॥ 6

अन्तिकमुपागतं तं वीक्ष्य स राषेण लोहिताक्षिश्रीः ।
सेनानायकमूचे कस्यायं क इति पृच्छ पृच्छेति ॥ 7

इति तद्रावणवचनं निशम्य सेनापतिः प्रहस्तोऽथ ।
तमुवाच मारुतसुतं यथार्थमावेदयेति कपिवीरम् ॥ 8

ब्रुवतः कपे यथार्थं न मृत्युरन्यथा भवेत् सोऽपि ।
इन्द्रस्य वाऽथ विष्णोर्दूतस्त्वमुपागतः किमर्थं वा ॥ 9

इति पृच्छति प्रहस्ते तमनादृत्यैव रावणमवादीत् ।
शक्रस्य नैव दूतो विष्णोर्नैवास्मि न च दिगीशानाम् ॥10

यस्यानुजेन बलिना विरूपिता राक्षसेन्द्र शूर्पणखा।
येन तव सैन्यमखिलं निहतं खरनायकं जनस्थाने ॥ 11

मायामृगशाखामृगराजौ यस्येषुपातमात्रमृतौ ।
सुग्रीवो रविसूनुः कपिराजपदे निवेशितो येन ॥ 12

तस्य मनुवंशकेतोः दशरथतनयस्य राघवस्य विभोः ।
दूतोऽहमाञ्जनेयः सीतामन्वेष्टुमागतो लङ्काम् ॥ 13

सीतान्वेषणहेतोः सुग्रीवेण प्रचोदिताः प्लवगाः ।
बहवश्चरन्ति भूमौ मत्तोऽप्यधिकाश्च मत्समाः सर्वे ॥ 14

तव भवने जनकसुतामहमद्राक्षं निशाचराधीश ।
पञ्चास्यामिव भुजगीमुपरुध्यैनां कथं भवान् जीवेत् ॥ 15

रामं प्रसाद्य शीघ्रं सीतामर्पय जिजीविषा यदि ते ।
नाप्यनुयास्यसि पदवीं निहतानां रक्षसां जनस्थाने ॥ 16

इति परुषं निगदन्तं वीक्ष्य हनूमन्तं अन्तिके सन्तम् ।
निर्भर्त्स्य राक्षसेन्द्रस्तस्यादिक्षत् वधाय रक्षांसि ॥ 17

अथ रोषारुणनयनं दोषाचरनायकं समालोक्य ।
अनुजस्तस्य महात्मा विभीषणो नीति तत्वविदवादीत् ॥18

राक्षसराज वधार्हा दूता न भवन्ति दण्डनीयास्ते ।
तस्मादादिश दण्डं दूते निहतेऽयशो महत्ते स्यात् ॥ 19

इत्थं विभीषणोक्तं निशम्य वचनं निशाचराधीशः ।
विनिवर्त्य हननबुद्धिं निशाचरानाह नीतिमवलम्ब्य ॥ 20

प्रेम प्लवङ्गमानां सर्वाङ्गेभ्योऽपि भवति लाङ्गूले ।
दत्वा तत्र हुताशं चारयतैनं पुरस्य वीथीषु ॥ 21

इति यातुधानराजे कथयति ते झटिति जीर्णवस्त्राणाणि ।
आनीय तस्य दीर्घं लाङ्गूलं सपदि वेष्टयामासुः ॥ 22

मारुतिरवर्धत ततो वस्त्रैः संवेष्टयमानलाङ्गूलः ।
तस्मिन् प्रवर्धमाने लाङ्गूलोऽपि व्यवर्धत तथैव ॥ 23

अथ नगरवासिनां ते प्रविश्य भवनानि सकलवसनानि ।
विधृतपरिधानवर्जं नीत्वा तैरप्यवेष्टयन् हृष्टाः ॥ 24

तैलमवसिच्य तस्मिन् अनलं प्रक्षिप्य दीपयामासुः ।
तत्सर्वं सहमानः कपिवीरः कार्यहेतवे तस्थौ ॥ 25

तस्मिन् प्रदह्यमाने शतशस्तं राक्षसाः कपिश्रेष्ठम् ।
आकृष्य राजवीथीमनयत्सह तूर्यशङ्खनादेन ॥ 26

स तथा विकृष्यमाणस्तूर्ष्णीं गच्छन् विचिन्तयामास ।
रात्रौ पुरीं न दृष्टां सम्यगिदानीं विलोकयामीति ॥ 27

तस्मिन् प्रचार्यमाणे लङ्कावीथीषु राक्षसैर्घोरैः ।
मारुतिवालदहनं सीता शुश्राव राक्षसीवदनात् ॥ 28

श्रुत्वा तदप्रियं सा दुःखेनानलमुपेत्य पतिदैवा ।
प्रज्वाल्य पूतचित्ता हनूमदर्थे तमर्थयामास ॥ 29

यदि दैवतं मम रामो यदि वा क्लेशात्समुद्धरेत्सोऽस्मात् ।
यदि वा पतिव्रताहं अग्ने भव तस्य हनुमतः शीतः ॥ 30

तस्यां तथा वदन्त्यां पवनः पुच्छाग्रमेत्य निजसूनोः ।
हिममिव तत्र न्यषिञ्चत् क्रमेण शिशिरीचकार तद्गात्रम् ॥31

पावकमात्मनि शीतं ज्वलन्तमभि वीक्ष्य पावकं पुच्छे ।
विस्मयगृहीतचेता वितर्कयामास मारुतिर्बहुधा ॥ 32

पुच्छे ज्वलन्नपि शिखी जनयति तापं न किञ्चिदपि गात्रे ।
रामस्य किं स महिमा अथवा महिमाभिरामकान्तायाः ॥33

इति चिन्तयन् हनूमान् विकृष्यमाणः स राक्षसैर्घोरैः ।
नगरीं परीत्य सर्वां प्राप पुरद्वारमद्भुताकारम् ॥ 34

स्थित्वा तत्र मुहूर्तं सूक्ष्मं गात्रं निधाय वेगेन ।
बन्धाग्निगाळ्य सद्यः पर्वतमात्रं पुनश्चववृधे सः ॥ 35

आदाय पूर्वपरिघं निशाचरांस्तेन रक्षिणो हत्वा ।
तत उत्प्लुत्य स वेगाल्लङ्कामुपचक्रमे हरिर्दग्धुम् ॥ 36

प्रथमं प्रहस्तभवने क्षिप्त्वाग्निं तदनु राक्षसगृहाणि ।
दग्ध्वा रावणभवनं तन्निःशेषयितुं विवेश दहनेन ॥ 37

एवं रावणनगरीं दग्ध्वाऽऽहुतिमग्नये हनूमान् सः ।
आलोकयन् समन्तादग्निज्वाला ननाद कपिसिह्मः ॥ 38

प्रासादजालमूले ज्वलनज्वालावलीभिराक्रान्ते ।
अग्रस्थिता निपेतुर्नार्यःपुण्यक्षये यथा स्वर्ग्यः ॥ 39

शूरा निशाचरवरा दारानादाय दारकैः सार्धम् ।
घोरस्य शोकवार्धेः पारं नापुर्विनिर्गता भवनात् ॥ 40

हा तात मातरग्रज हा कान्ते हा सुतेति विलपन्तः ।
पौरा निशाचरास्ते बभ्रमुरापत्तिमुपेत्य तत्प्रथमाम् ॥ 41

कालः किं कपिरूपी कल्पाग्निर्वाप्यनेन रूपेण ।
लङ्कां दहति समन्तादिति पौराश्चक्रुशुः पलाशगुणाः ॥ 42

पुच्छाग्निदह्यमानां हनूमतो वीक्ष्य विस्मिता लङ्काम् ।
त्रिपुरस्य हरशराग्निप्रदह्यानस्य सस्मरुर्देवाः ॥ 43

मरुता प्रसार्यमाणा स्थगयन्ती दिङ्मुखानि परिसान्द्रा ।
लङ्कादहनसमुत्था धूमा घनराजिरिव तदा रेजे ॥ 44

मुक्त्वा विभीषणगृहं दग्ध्वा सर्वाणि राक्षसगृहाणि ।
कृत्वा च सिंहनादं तोरणमभ्येत्य मारुतिः शुशुभे ॥ 45

पुच्छे ज्वलन्तमग्निं कच्छपमकरादितिमिङ्गिलाक्रान्ते ।
अच्छे वारिधितोये पुच्छं निर्वाप्य निर्वृतिं स ययौ ॥ 46

प्रलयहुताशनकल्पे पवमानसखे प्रवर्तितज्वाले ।
प्रदहति निशाचरपुरीं वीक्ष्य हनूमान् विचिन्तयामास ॥47

हन्त मम निष्फलोऽभूदायासःकिं कृतं मया कोपात् ।
कोपो ह्यनर्थमूलं तस्मात्कार्याणि हन्त नश्यन्ति ॥ 48

क्रुद्धः करोति पापं कार्याऽकार्ये च नैव जानाति ।
वेत्ति न वाच्याऽवाच्ये *. 49

हृष्टाः पवनजवचनात् अङ्गदनलनीलजाम्बवत्प्रमुखाः ।
सत्कृत्य तस्य शौर्यं पप्रच्छुस्तं प्लवङ्गमप्रवरम् ॥ 50

कथमम्बुधिमतरस्तं कथमविशस्तां निशाचरेशपुरीम् ।
विचिता कथं नु सीता भवता तस्यां कथं नु सा दृष्टा ॥ 51

पृच्छत्सु तेष्विति ततः पवनतनूजः प्रणम्य सीतायै ।
आरभ्य वार्धितरणात् तेभ्यो वृत्तान्तमकथयत्सर्वम् ॥52

श्वसनतनयस्य पौरुषमाकर्ण्याद्भुततरं कपिश्रेष्ठाः ।
शूरं तमथ समन्तान्प्रशशंसुःहृष्टमानसाः प्रीताः ॥ 53

तस्मै फलानि सर्वे ददुः समानीय कीशवर्याय ।
आस्वाद्य तानि मारुतिरम्बुधितरणे परिश्रमं विजहौ ॥ 54

---

* तस्मात्कोपं वदन्ति कार्यघ्नम् इति पादपूरणाय भवतु ।

இதற்கு மேல் சில செய்யுட்கள் மூலநூலில் காணப்படவில்லை. இங்குள்ள பகுதி:- லங்கையில் எல்லாப் பகுதிகளையும் கோபத்தால் எரித்து விட்டேனே. ஸீதாதேவி இருக்கும் அசோகவனமும் அல்லவா இத்தீயில் அகப்பட்டிருக்கும். தவறு செய்துவிட்டேனே என ஹநுமான் வருந்துவதாக அமைந்துள்ளது. 49வது செய்யுள் பாதியில் கோபம் கொண்டவனுடைய நிலையை வருணிக்கிறது. அடுத்துள்ள செய்யுள் அங்கதன் நளன் நீலன் ஜாம்பவான் முதலானோர் அனுமனை வரவேற்று உபசரித்து எவ்விதம் கடல்கடந்து லங்கை சென்றீர். ஸீதையைக் கண்டதெப்படி என்று கேட்பதாக உள்ளது.

श्रान्तिमपनीय नाम क्षणं स विश्रम्य वानरैः सार्धम् ।
रामाय सानुजाय प्रियमाख्यातुं ततः समुत्तस्थौ ॥ 55

प्रीत्या समीक्षमाणा अहमहमिकया प्लवङ्गमाः सर्वे ।
हर्षात्समुद्वहन्तः पवनसुतं समाययुस्त्वरया ॥ 56

अथ मधुवनं प्लवङ्गा मधुपटलाकीर्णममृतकल्पफलम् ।
दधिमुखबलाभिगुप्तं समीक्ष्य युवराजमङ्गदमवोचन् ॥ 57

युवराज देह्यनुज्ञां सुग्रीवाज्ञावनप्रवेशाय ।
आशात्र नः सुमहती मधूनि भक्षयितुममृतकल्पानि ॥ 58

तेषां निशम्य वचनं वालिसुतो वायुसूनुवचनेन ।
गतभीर्ददावनुज्ञां वनप्रवेशाय वानरर्क्षाणाम् ॥ 59

प्रविशत्सु तेषु च वनं वानर ऋक्षेषु दधिमुखः कोपात् ।
अभ्येत्य तानरौत्सीत् प्रहृत्य तं वानरा मधून्यपिबन् ॥ 60

सुग्रीवमातुलः स च वारयितुं तानशक्नुवन् शोचन् ।
रविसुतमेत्य कपिभिः कृतमात्मपराभवं समाचख्यौ ॥ 61

अथ लक्ष्मणः कपीन्द्रं पप्रच्छ क एष किं समायातः ।
इति पृच्छते हरीन्द्रो दधिमुखवचनं न्यवेदयत्तस्मै ॥ 62

प्रस्थापितास्त्ववाचीं पवनजयुवराजजाम्बवत्प्रमुखाः ।
अभ्येत्य मधुवनं मे प्रविश्य खादन्ति किल मधून्यधुना ॥ 63

तत्सर्वथा प्रवृत्तिः सीतायास्तैः प्लवङ्गमैर्लब्धा ।
नो चेत् कथं मदाज्ञामुल्लङ्घ्य मधूनि भक्षयेयुस्ते ॥ 64

इति कथयति कपिराजे रामोऽप्याकर्ण्य तस्य तद्वचनम् ।
आनन्दसिन्धुलहरीमग्नोऽभूत्तत्क्षणं सह भ्रात्रा ॥ 65

कृतकार्याः प्लवगास्ते दधिमुख गत्वा त्वमाशु तान् सर्वान् ।
अनुनीय मत्सकाशं प्रेषय गच्छेत्युवाच तं हरिराट् ॥ 66

शिरसा वहन् तदाज्ञां दधिमुख उपगम्य मधुवनं शीघ्रम् ।
प्रणिपत्य वालिसूनुं शशंस हरिराजशासनं तस्मै ॥ 67

आकर्ण्य तत्सहर्षो वालितनूजो बलाधिकः सहसा ।
समुपाजगाम सर्वैः हरिभिः सह मारुतिं पुरोधाय ॥ 68

समुपेत्य माल्यवन्तं दूरादालोक्य रामसुग्रीवौ ।
सहलक्ष्मणौ प्रणेमुः प्रहृष्टवदनाः प्रियं शशंसुस्ते ॥ 69

उपगम्याथ हनूमान् प्रणम्य रामाय मैथिलीदत्तम् ।
चूडामणिं मनोज्ञं दृष्टा सेतेत्यदादभिज्ञानम् ॥ 70

आदाय तं मणिवरं रामः सीतानुरागमिव मूर्तम् ।
हृदये निधाय रम्यं रुरोद तं वीक्ष्य लक्ष्मणोऽपि तदा ॥71

सुग्रीवसान्त्ववचनैः शोकं विनियम्य मारुतिं रामः ।
पप्रच्छ मे प्रियतमा प्राणसमा कुत्र मैथिली दृष्टा ॥ 72

किंरूपा किमवस्था किंवसना किं करोति किं मनुते ।
कथमास्ते मम दयिता किमाह सर्वं निवेदय हनूमन् ॥ 73

इति पृच्छति रघुवीरे पवनतनूजः प्रणम्य सीतां च ।
दृष्टा रावणगेहे प्रमदवनेऽशोक भूरुहो मूले ॥ 74

प्रतिपत्कलामिवेन्दोर्नलिनीमिव तुहिनसंहतिक्षीणाम् ।
सीतां कृशाङ्गलतिकां धृतैकवेणीमधोमुखीं दीनाम् ॥ 75

उपसृत्य तां प्रणम्य रहः प्रभो त्वत्स्वरूपकथनं च ।
निर्वर्ण्य भवदवस्थामदामभिज्ञानमङ्गुलीयं ते ॥ 76

आदाय साऽङ्गुलीयकमश्रूणि निपात्य शोकसन्तप्ता ।
दत्वा मणिमथ भवते त्वदभिज्ञानाय वाक्यमिदमूचे ॥ 77

वनवासप्रथमाब्दे कदाचिदुपविटपि चित्रकूटगिरौ ।
काकाधिपस्य शासनमिन्द्रतनूजस्य यत्कृतं भवता ॥ 78

लुप्ते कपोलतिलके स्वयमलिखद्यद्भवान् मनःशिलया ।
भवतैतदपि कथयेत्युक्त्वा विससर्ज मां ततः सीता ॥ 79

आदाय तं मणिवरं श्रुत्वाऽभिज्ञानवचममप्येतत् ।
आश्वास्य तां पयोधिं तीर्त्वा तव पादमूलमभ्यागाम् ॥ 80

इत्यार्यारामायणे षोडशःसर्गः ॥

------- *** ---------

।। सप्तदशः सर्गः ।।

श्रुत्वा प्रसन्नचेताः प्लवङ्गमानां प्रहर्षमावहन्नूचे ।। 1

धीरेण शौर्यनिधिना विना न पश्यामि कमपि यःप्रतरेत् ।
अम्बुधिमपारपारं सुरासुरैरपि च वीक्षितुमशक्याम् ।। 2

लङ्कां राक्षसनगरीं प्रविश्य जीवन् कथमुपायातः ।
सुग्रीव एव लोके सुभृत्यवान् येनहनूमता महतीम् ।।3

निस्तीर्णवान् प्रतिज्ञां रघुवंशोऽहं च रक्षितोऽनेन ।
इत्थं प्रशस्य सन्तं कपिगणमध्ये कपिप्रवीरं तम् ।। 4

आहूय विनयवन्तं रामः परिषस्वजे हनूमन्तम् ।
ध्यात्वा मुहूर्तमग्रे सुग्रीवस्योपशृण्वतो रामः ।। 5

भूयो मारुतिमूचे धैर्यवतस्तस्य पौरुषात्प्रीतः ।
दिष्ट्या त्वया हनूमन् बलिना सीताप्रवृत्तिरुपलब्धा ।।6

चिन्ता ममेति महती वानरसेना कथं तरेद्वार्धिम् ।
इति राघवं वदन्तं सुग्रीवः प्रोवाच वर्धयन् धैर्यम् ।। 7

मुञ्च रघुवीर चिन्तां रिपुक्षये यत्नवान् भव क्षिप्रम् ।
हृष्यति मनो मदीयं पश्यामि शुभाय तव निमित्तानि ।। 8

कपयस्त्वदर्थमेते प्रविशेयुर्हव्यवाहमपि दीप्तम् ।
सेतुं विधाय शैलैः प्रतरिष्यामः पयोनिधिं घोरम् ।। 9

शीघ्रं द्रक्ष्यसि लङ्कां राक्षसराजमपि समिति हन्तासि ।
रविनन्दनस्य रामः तथेति प्रतिगृह्य वचनमक्लीबम् ॥ 10

पुनरप्युवाच वीरं विचक्षणं मातरिश्वनः सूनुम् ।
सेतुं विधाय शैलैस्तपसा वास्त्रेण शोषयित्वा वा ॥ 11

वारां निधिंतरीतुं समर्थ एवास्मि नात्र सन्देहः ।
आचक्ष्व मम हनूमन् लङ्कायाः राक्षसेन्द्रगुप्तायाः ॥ 12

द्धाराणि कति कियन्तस्तानि च रक्षन्ति राक्षसाः शूराः ।
इति राघवेण पृष्टो रावणदुर्गस्य विस्तृतिं सर्वाम् ॥ 13

अकथयदथाञ्जनेयः दृष्टा लङ्का दशास्यसङ्गुप्ता ।
शृणु रामभद्र लङ्का त्रिकूटशैलस्य शोभने शिखरे ॥ 14

देवासुरैरशक्या समीक्षितुं का कथा प्रवेष्टुमसौ ।
प्राकारश्च समन्तात्सौवर्णो रत्नचित्रितस्तस्याः ॥ 15

तिरयति निजेन महसा दिवानिशं दिनकरेन्दुतेजांसि ।
द्धाराणि सन्ति तस्याश्चत्वारि महान्ति दृढकवाटानि ॥ 16

पाषाणयन्त्रवन्ति चाप्यसङ्क्रमाण्यरिभिरप्रधृष्याणि ।
कालायसेन रचितास्तेषु शतघ्न्योऽपि विनिहिता घोराः ॥17

प्राकारस्य समन्तात् परिघा वारिधिरिवातिगम्भीरा ।
जलदुर्गं गिरिदुर्गं वनदुर्गं तदनु कृत्रिमं दुर्गम् ॥ 18

परितः स्फुरन्ति लङ्कां त्रिदशैरपि यानि दुष्प्रवेशानि ।
रक्षोभिरक्षयबलैरन्तः सरथाश्वदन्तिभिर्निचिता ॥ 19

बहिरपि निशाचरबलैरुदायुधैः सर्वतोऽपि कृतरक्षा ।
रक्षति पूर्वद्धारं रावणवचनेन रक्षसामयुतम् ॥ 20

नियुतं निशाचराणां रक्षार्थं वसति दक्षिणद्धारे ।
प्रयुतं पुण्यजनानां निरन्तरं वसति पश्चिमद्धारे ॥ 21

रथगजतुरगयतानां अर्बुदमधिवसति चोत्तरद्धारम् ।
रक्षन्ति मध्यदेशं रक्षांसि बहूनि सायुधाश्वानि ॥ 22

एवं कृताभिरक्षा राक्षसराजेन सा पुरी लङ्का ।
अधिगत्य तामपि पुरीं भवत्प्रतापेन सङ्क्रमाद् भङ्क्त्वा ॥ 23

प्राकारानपि भित्वा हत्वा रक्षांसि निववृते यत्नात् ।
कृतमेकेन मयैवं बहवस्तिष्ठन्ति मद्धिधाः प्लवगाः ॥ 24

कुमुदो नलश्च नीलो मैन्द द्विविदौ गवाक्षगवयौ च ।
शरभश्च जाम्बवानपि कपिवीरा गन्धमादन प्रमुखाः ॥ 25

सर्वेऽपि दृष्टसाराः समरेष्वपराजिता महाशूराः ।
सर्वे गजायुतबला मनस्विनो मातरिश्वसमवेगाः ॥ 26

अयुत Ten Thousand नियुत A hundred Thousand प्रयुत a million अर्बुद one hundred millions पुण्यजन Demons (राक्षस).

सर्वे पौरुषवन्तः स्वामिनिदेशाभिलाषिणश्च सदा ।
लङ्कापुरीं विनष्टामवेहि निहतं च रावणं दुष्टम् ॥ 27

विजयप्रदे मुहूर्ते प्रस्थानं कुरु विपक्षविजाय ।
विजयप्रदानि भवतो दृश्यन्ते सर्वतो निमित्तानि ॥ 28

कथितं हनूमतेति श्रुत्वा वचनं रघूद्वहः प्रीतः ।
आहूय सूर्यतनयं सेनां प्रस्थापयेति निजगाद ॥ 29

श्रुत्वा स रामवचनं नीलं सेनापतिं समाहूय ।
आदिक्षदिति ससैन्यो गच्छ पुरस्ताद्विशोधयन् मार्गम् ॥30

रामोऽभिजिति मुहूर्ते ततः प्रतस्थेऽधिरुह्य वायुसुतम् ।
तदनु तदैव द्युतिमान् अङ्गदमारुह्य लक्ष्मणो गगने ॥ 31

निरगात्तमनु च हरिराण्महतीं कपिवाहिनीं समारक्षन् ।
हर्षादुदीक्षमणौ दशरथतनयौ दिवाकरप्रख्यौ ॥ 32

दशरथसुतौ विरेजतुरारूढहनूमदङ्गदाङ्गगतौ ।
वियति यथेन्द्रकुबेरावैरावतसार्वभौमगात्रगतौ ॥ 33

ऋषभो दक्षिणपार्श्वं रक्षन् प्रययौ सह स्ववाहिन्या ।
रक्षंस्तदितरपार्श्वं कपिभिः सह गन्धमादनोऽपि तथा ॥34

अथ जाम्बवांश्च बलवान् ऋक्षपतिः कपिवरः सुषेणोऽपि ।
सुग्रीवशासनात्तौ पश्चाद्भागं ररक्षतुर्वीरौ ॥ 35

एवं गच्छति रामे सह सुग्रीवेण वाहिनीमध्ये ।
तं वीक्ष्य जातहर्षाः कपयोऽगच्छन् समन्ततो गगने ॥36

गर्जन्तो विनदन्तः प्लवमानाः सर्वतस्ततः प्लवगाः ।
अभितः फलावनम्रान् आरोहन्तश्च भूरुहानचलान् ॥ 37

विन्ध्यं विशालशिखरं सह्यं समतीत्य मलयशैलं च ।
आसेदुः कपिवीरा महेन्द्रशैलं पयोधितीरस्थम् ॥ 38

रामोऽवरुह्य शृङ्गे महेन्द्रशैलस्य सानुजस्तुङ्गे ।
वेलावनं च पश्यन् ददर्श कल्लोलसङ्कुलं वार्धिम् ॥ 39

विद्रुमलतानुविद्धैः शङ्खकुलैः सर्वतः समाक्रान्तम् ।
पुरुहूतहेतिभीतैः शिलोच्चयैः सर्वतश्च परिगाढम् ॥ 40

नृत्यन्तमिव तरङ्गैः हसन्तमिव फेनमण्डलैरमलैः ।
धावन्तमिव जलौघैः स्वागतयन्तमिव वारिघोषेण ॥ 41

वेलातटस्थलरुहा तमालतरुकाननेन सान्द्रेण।
शम्भुं विडम्बयन्तं सततं वेतण्डचर्मपरिवीतम् ॥ 42

शुक्तिपुटस्फुटमुक्ता लिलोलकल्लोलमालिकामुक्ताः ।
मुक्ता यत्र जलानामनिशं जनयन्ति शीकरभ्रान्तिम् ॥ 43

आभान्ति यत्र मेघा जलं पिबन्तः सविद्युतो विविधाः ।
सरसीमभिप्र**विष्टाः** सुवर्णकक्ष्या इव द्विपश्रेष्ठाः ॥ 44

यस्मिन् महोरगाणां प्रभामणीनां प्रभास्फुरद्रूपाः ।
भास्करकरानुषङ्गादौर्वाग्निशिखाभ्रमं वितन्वन्ति ॥ 45

इदमम्बरमयमम्बुधिरित्यनयोर्भेदमाकुलाः सकलाः ।
विज्ञातुमप्यशक्या(क्ता) विस्मयमीयुः प्लवङ्गवाहिन्यः ॥46

रत्नानि वीचिहस्तैः प्रसार्यमाणानि सिन्धुराजेन ।
रघुवीरस्य पुरस्तादुपायनानीव सम्भृतान्यासन् ॥ 47

आसाद्योत्तरतीरं वारिनिधे राघवाज्ञया नीलः ।
महतीं वानरसेनां निवेशयामास तत्र कपिवीरः ॥ 48

अपरमिव वारिराशिं कपिबलमभिवीक्ष्य तत्र सन्निविष्टम् ।
भीष्ममपि सागरं तं शोचन् भ्रातरमुवाच रघुवीरः ॥ 49

लक्ष्मण गच्छति काले शोकः सहतेन गच्छति् नाराणाम् ।
मम शोकस्तु महीयान् गच्छत्यपि हन्त वर्धते तस्मिन् ॥50

दूरस्थितेऽपि सुमुखी नापि हतेति व्यथेय सौमित्रे ।
अतिवर्तते वयोऽस्याः शोचामीत्येव सन्ततं मनसा ॥ 51

वायो वाहि ततस्त्वं यतः प्रिया तां स्पृशंश्च मां च विभो ।
तेन तदङ्गस्पर्शो भवेच्छशाङ्केऽपि दृष्टिसंयोगः ॥ 52

यदुवाच तत्प्रियतमा ह्रियमाणा हा प्रियेति नाथेति ।
पीत इव कालकूटः प्रदहत्यापादमस्तकं गात्रम् ॥ 53

सा जीवतीति कथितं हनूमता मे प्रियेण दूतेन ।
आर्त इवामृतसङ्गात् अधुना जीवामि तेन सौमित्रे ॥ 54

तद्विरहेन्धनदीप्तस्तद्गतचिन्तावलीमहाज्वालः ।
रात्रिरति दुःसहेन्दुर्मदनाग्निर्दहति मामकं गात्रम् ॥ 55

अवगाह्यार्णवतोयं स्वप्स्याम्यभितापमक्षमः सोढुम् ।
तस्मिन् मयि प्रसुप्ते मदनाग्निर्नैव शाम्यति तथापि ॥ 56

एतेन विरहभाजा लक्ष्मण न मयाद्य जीवितुं शक्यम् ।
यदहं सा च सुकेशी तीरेऽब्धेरत्र[1] संस्थिताावितरे ॥ 57

केदार इव विनीरः सनीर केदारसविध परिवर्ती ।
उपजीवति यद्वदहं जीवन्तीं तां निशम्य जीवामि ॥ 58

नाङ्गीकृतोऽपि हारस्तावन्मात्राङ्गसङ्गरोधभयात् ।
अद्यावयोस्तु मध्ये नदी समुद्राद्रि काननान्यासन् ॥ 59

पृथुतरनितम्बबिम्बां तनुमध्यां कुटिलकुन्तलश्रेणीम् ।
तरसा विजित्य शत्रून् द्राक्ष्यामि कदा नु जनकराजसुताम् ॥ 60

बिम्बोष्ठमिन्दुरुचिरं सुनयनविकसत्सरोजसौरभ्यम् ।
मुखमुन्नमय्य तस्याः कदानु पास्यामि तदमृतास्वादम् ॥61

निबिडौ नितान्तकठिनौ पृथुतरौ मेरुसन्निभौ तस्याः ।
वक्षोरुहौ हसन्त्याः कदा मम स्पर्शपुलकितौ तस्याः ॥62

---

1. अब्धेः अत्रतीरे इतरे तीरे च आवां स्थितौ इति भावः ॥

तन्वीं स्वभावतस्तामनशनतः कृशतरां च शोकेन ।
दर्शात्यये समुदितां शशिरेखामिव कदा नु वीक्षेऽहम् ॥63

गाढमुपगूह्य कण्ठं सोत्कण्ठा मे सुराङ्गनासदृशी ।
दृग्भ्यां कमलसदृग्भ्यां आनन्दाश्रूणि मोक्ष्यति कदानु ॥64

देहपरितापहेतुं वैदेहीविरहसम्भवं शोकम् ।
क्षणमनु वर्धनशीलं कदानु मोक्ष्यामि हन्त सौमित्रे ॥ 65

इति शोचति रघुवीरे सौमित्रिस्तं चापि सान्त्वयामास ।
अथ तरणिरस्तशैलं प्राप परिक्षीणकिरणसन्तापः ॥ 66

रामस्तस्मिन् समये सन्ध्यां समुपास्य साकमनुजेन ।
तत्रैव वारिधितटे निवासमकरोन्महीरुहो मूले ॥ 67

कदनं कृतमतिघोरं लङ्कायां मातरिश्वतनयेन ।
अभिवीक्ष्य राक्षसेन्द्रो विषादमासाद्य चिन्तयामास ॥ 68

एकेन वानरेण प्रविश्य लङ्कां निशाचरैर्गुप्ताम् ।
सीता विलोकिता सा प्रमदवनं चापि सर्वतो भग्नम् ॥ 69

प्रबला हताः पलाशाः चैत्यप्रासादभञ्जनं च कृतम् ।
अक्षो हतः कुमारो लङ्का दग्धा च तेन वीरेण ॥ 70

मासा दश व्यतीयुः सीतामानीय सुरसुतासदृशीम् ।
साऽद्यापि नैव शयनं मम वाञ्छति दैवयोगेन ॥ 71

जनकतनयाप्रवृत्तिं श्रुत्वा रामः सलक्ष्मणः सहसा ।
सह कपिभिर्जलराशिं तीर्त्वा लङ्कामुपेष्यति प्रायः ॥ 72

इति चिन्तयन्दशास्यः शक्रजिदादीनि मुख्यरक्षांसि ।
आहूय सदसि तेभ्यो वेदयति स्वचिन्तितं सकलम् ॥ 73

श्रुत्वा रावणवचनं शक्रजिदाद्या निशाचरप्रवराः ।
व्यज्ञापयन् किमर्थं चिन्तयसीत्थं निशाचरेन्द्रेति ॥ 74

न सुरासुरेषु चिन्ता कदाचिदपि राक्षसेन्द्र तव जाता ।
नरवानरेषु तां त्वं करोषि तव तेजसः पतङ्गास्ते ॥ 75

शक्रादयश्च सर्वे दिक्पाला निर्जितास्त्वया स्वामिन् ।
भोगवतीमपि गत्वा नागाः सर्वे विषोल्बणा विजिताः ॥ 76

तव भुजबलेन महता कैलासस्तादृशोऽपि तुलितोऽभूत् ।
वैश्रवणं युधि जित्वा पुष्पकमत्यद्भुतं त्वयाऽपहतम् ॥ 77

शमनमपि सर्वदमनं श्रुत्वा तन्महिषशृङ्गमुत्खाय ।
एवंविधाय भवते तिष्ठेयुः प्राकृताः कथं स्वामिन् ॥ 78

कपिरेक एव लङ्कां प्रविश्य कृतवानिदं महत्कर्म ।
इति मा विचारय विभो प्रमादतो नःकृतं तथाऽनेन ॥ 79

शक्तः शक्रजिदेकः शत्रून्निजविक्रमेण साधयितुम् ।
स्वामिन् विहाय चिन्तां विहरन्नन्तः पुरे वस स्वैरम् ॥ 80

प्रतिबुध्य कुम्भकर्णस्तस्मिन्दिवसे दशास्यसेवार्यै ।
आगत्य सदसि तिष्ठन्नश्रौषीदस्य सकलवृत्तान्तम् ॥ 81

स जगाद रावणमिदं सीतामाहृत्य राघवस्य वधूम् ।
अयशो महच्च लब्धं सम्पच्चायुश्च तादृशं भवता ॥ 82

अग्रज तथाप्यवश्यं शत्रून्त्सर्वान् विनाशयिष्यामि ।
इति वदति कुम्भकर्णे दशकण्ठस्तं प्रशस्य मुदमाप ॥83

तमुवाच राक्षसेन्द्रं महेन्द्रकीर्तिस्ततो महापार्श्वः ।
तव राक्षसेन्द्र चिन्ता का वा तिष्ठत्सु बहुषु भृत्येषु ॥ 84

आनीय मध्यमवनाद्विचिकित्ससि भोक्तुमहो दशग्रीव ।
उपभोक्ष्यते न किं सा बलादुपानीय राघवस्य वधूः ॥ 85

इति तेन रक्षसोक्तं वचनं श्रुत्वा निशाचरो धीरः ।
निःश्वस्य पूर्ववृत्तं तस्मै सर्वं शशंस घोरतरम् ॥ 86

स्वर्गाद्विरिञ्चिलोकं गच्छन्तीं पुञ्जिकस्थलां गगने ।
दृष्ट्वा करे गृहीत्वा तामन्वभूवं बलादनिच्छन्तीम् ॥ 87

*नारोपयामि शयनं सापि हृदा स्मरति राममेव सदा ।
तस्मान्मया विनिहते रामे युधि सायकैः स्फुद्रूपैः ॥ 88

---

* तदनुभव प्राप्ताभिशापस्य कथनं युज्यत इत्यतः पद्यमिदमत्र संयोज्यते "हन्त तयाऽभिशप्तः यदि यां कामपि बलादनिच्छन्तीम् । उपभुङ्क्षे वनितां त्वं प्राणैर्हीनो भविष्यसि क्षिप्रम्" । इति ।

सीता तेन निराशा स्वयमेवैष्यति मम ध्रुवं शयनम् ।
इति रावणस्य वचनं निशम्य तद्वाक्यमसहमानः सन् ॥89

अग्रजहिताभिलाषी विभीषणः प्राह तमथ निःशोकः ।
अन्यायवर्तिनां त्वं शास्ता क्रव्यादराज नयहीनः ॥ 90

प्रियवादिनः पृथिव्यां पुरुषाःसर्वत्र सन्ति सुलभास्ते ।
अप्रियमप्यतितथ्यं वक्तुं श्रोतुं च शक्यते केन ॥ 91

जहरिथ जनकतनूजां कितवोऽसि त्वं निशाचराधीशः ।
यदि राघवस्तदानीं सविधे जीवन्न मोक्ष्यसे तेन ॥ 92

मित्रैरमित्ररूपैरुक्तं तथ्यमिति नो विजानीथाः ।
रामं प्रसाद्य सीतां दत्वा तस्मै चिराय जीव त्वम् ॥ 93

इति वादिनि तस्मिन् विभीषणे रावणोऽहितं मत्वा ।
नाङ्गीचकार वाक्यं दिष्ट्या म्रियमाणोऽपि तस्य भैषज्यम् ॥94

तच्छ्रोत्रयोरसह्यं भूयोऽभिहितं विभीषणोऽवादीत् ।
तद्वाक्यमसहमानश्चुकोप तस्मै निशाचराधीशः ॥ 95

हितमुक्तवन्तमपि तं दोषाचरनायको बभाषेऽथ ।
अन्यो वदेद्यदीत्थं तं हन्यामाशु दुष्ट गच्छेति ॥ 96

कुपितेनेत्यधिपतिना निशाचराणामुदीरिते वचने ।
सहसा सहात्मसचिवैः विभीषणो गगनमुत्पपात रूषा ॥97

अम्बरतलेऽथ तिष्ठन् सुखितो भव मां विना च रक्ष पुरीम् ।
उक्त्वा राक्षसराजं ततः प्रतस्थे समीरमार्गेण ॥ 98

स विभीषणस्तदानीं सचिवैः सहितश्चतुर्भिरमितबलैः ।
ददृशे निशाचरपतेर्मूर्त इव प्राणवायुरितरस्तैः ॥ 99

अम्भोनिधिं स तीर्त्वा कपिसेनां वीक्ष्य सागरगभीराम् ।
आकाश एव तिष्ठंश्चतुर्भिरपि राक्षसैरुवाचेदम् ॥ 100

शरणप्रदाय जगतां महात्मने दशरथस्य तनयाय ।
ज्ञापयत मां कपीन्द्रा विभीषणं रावणादिह प्राप्तम् ॥ 101

आकर्ण्य तस्य वचनं सुग्रीव उपेत्य राघवाभ्याशम् ।
अकथयदुपागतं तं विभीषणं राघवाय धीराय ॥ 102

श्रुत्वा कपीन्द्रवचनं ततः समाहूय जाम्बवत्प्रमुखान् ।
सर्वान् कपीनपृच्छत् ग्राह्यो वा त्याज्य एष इति नीतिम् ॥103

स्वं स्वं मतं प्लवङ्गा रामाय तदा निवेदयामासुः ।
दशवदनसोदरतया नैव ग्राह्योऽयमति विनीतोऽपि ॥ 104

कथयत्सु तेषु चैवं प्राह हनूमान्निजं मतं पश्चात् ।
नास्त्यविदितं तव विभो सर्वज्ञस्त्वं तथापि वक्ष्यामि ॥105

वर्धिष्णुं च भवन्तं रावणमन्यायतः क्षयिष्णुं च ।
ज्ञात्वा विभिषणोऽयं राज्याकाङ्क्षी भवन्तमभ्यागात् ॥106

स्वमतानुसारमेवं कथयति तस्मिन् प्रशस्य तं रामः ।
आहूय रवितनूजं तस्य मनो हर्षयन्नुवाचेदम् ॥ 107

भरतोपमा न सन्ति प्लवगेन्द्रा भ्रातरो नृणां लोके ।
तनयाश्च मत्सदृक्षा न च वा सुग्रीव भवत्समाः सुहृदः ॥ 108

अतो विभिषणो वा यदि वा सुग्रीव रावणः सोऽयम् ।
मम सविधमानयैनं दत्तममुष्मै मयाऽभयं सत्यम् ॥ 109

इति राघवेण दत्ते विभीषणायाभयेऽथ सुग्रीवः ।
आदाय तं ससचिवं रामस्याभ्याशमासदत्प्रीतः ॥ 110

अनुजो निशाचरपतेर्विभीषणोऽहं भवन्तमुपयातः ।
शरणार्थीति वदंस्तं प्रणनाम मन्त्रिभी रामम् ॥ 111

स ततो जगाद रामं त्यक्तोऽहं रावणेन पुत्रादीन् ।
मुक्त्वा तामपि नगरीं राज्यसुखार्थी भवन्तमभ्यागाम् ॥ 112

रामो निशम्य वचनं कथितं तथ्यं विभीषणेनेत्थम् ।
आश्वास्य तं सहर्षः प्रोवाचेदं पिबन्निवाक्षिभ्याम् ॥ 113

आख्याहि मे विभीषण निशाचरेन्द्रस्य यद्बलं सकलम् ।
एवं राघवपृष्टः स तदाख्यातुं प्रचक्रमेऽस्य तदा ॥ 114

शृणु राम राक्षसेन्द्रो वरप्रदानात्पद्मसम्भवस्य बली ।
पर्यभवत्सकलानपि सुरासुरोरगनिशाटगन्धर्वान् ॥ 115

तस्यानन्तरजन्मा ज्येष्ठो मे सत्यशौर्यसम्पन्नः ।
जेतुं स कुम्भकर्णः शक्तः शक्रादिसकलदिक्पालान् ॥ 116

राम प्रहस्तनामा सेनानीस्तस्य विश्रुतो वीर्ये ।
यो माणिभद्रमजयत् रुद्राद्रौ समिति निजबलं प्रथयन् ॥117

गोधाङ्गुलित्रधारी सधनुः सोऽवध्यकवचससंवीतः ।
आरूह्य रथमदृश्यो भवति परैः समिति शक्रजिच्छूरः ॥118

रक्षोभिरमितसत्वैर्दशकोटिसहस्रसङ्ख्यया प्रमितैः ।
युक्तो राक्षसराजः सुरसङ्घान् समिति जयति स दिगीशान् ॥119

श्रुत्वा विभीषणवचो रामस्तमुवाच हर्षयन् प्रेम्णा ।
हत्वा सपुत्रसैन्यं तं राज्यं तस्य ते प्रदास्यामि ॥ 120

प्रविशतु रसातलं वा रक्षोराजो विरिञ्चिलोकं वा ।
प्रतिजाने भवतेऽहं तमहं मोक्ष्यामि नैव जीवन्तम् ॥ 121

रक्षोराजमहत्वा ससुतज्ञातिं सबान्धवानीकम् ।
नायोध्यां प्रविशेयं त्रिभिरपि भ्रातृभिः शपे सत्यम् ॥ 122

आकर्ण्य तस्य वचनं रामस्याक्लिष्टकर्मणस्तथ्यम् ।
शिरसा प्रणम्य सादरममुं तदावोचदतिविनीतोऽसौ ॥ 123

तव सर्वथा सहायो राम भविष्यामि रक्षसां हनने ।
लङ्काप्रधर्षणेऽपि प्रतियोत्स्येऽहं रणे च रक्षोभिः ॥ 124

प्रणयेनेति वदन्तं पलाशभर्तुस्तदा यवीयांसम् ।
परिरभ्य गाढमुरसा रामः प्रोवाच लक्ष्मणं धृतिमान् ॥ 125

आनीय वारिधिजलं लक्ष्मण शीघ्रं विभीषणं तेन ।
अभिषिञ्च रावणपदे लङ्कामेष प्रशास्तु सुचिराय ॥ 126

सौमित्रिरेवमुक्तस्तेनानीयाम्बु वारिधेस्तूर्णम् ।
अभिषिच्य रविसुताग्रे राजानं रक्षसाममुं चक्रे ॥ 128

इत्यार्यारामायणे विभीषणाभिषेकोनाम सप्तदशःसर्गः ॥

सुन्दर काण्डः समाप्तः

॥ अष्टादशः सर्गः ॥ (युद्धकाम्डः)

अथ वीक्ष्य राक्षसवरं कृतप्रसादं महात्मना तेन ।
रामं प्रपूजयन्तो वाग्भिः प्लवगाः प्रणेमुरतिभूषाः ॥ 1

अथ रामलक्ष्मणौ तं पप्रच्छतुरब्धिलङ्घनोपायम् ।
इति पृष्टस्ताभ्यां शरणं रामोऽभियातु वारिनिधिम् ॥ 2

सगरेण वर्धितोऽसौ सागर इति नाम वारिधेस्तेन ।
भवितैवैष सहायःस्वकुल भवस्यास्य राघवस्य विभोः ॥3

श्रुत्वा विभीषणोक्तं वचनं रामः सहानुजः श्लक्ष्णम् ।
अङ्गीकृत्य तदैव प्रयतः शिश्ये स्थले कुशास्तीर्णे ॥ 4

चारोऽथ रावणस्य व्याघ्रोनाम क्षपाचरो गगनात् ।
अभ्येत्य तत्र समये वानरसेनां ददर्श वार्धितटे ॥ 5

दशयोजनप्रमाणे वारिधिवेलावने निविष्टमसौ ।
चरमिव वारिराशिं कपिसैन्यं वीक्ष्य निववृते लङ्काम् ॥ 6

प्रणिपत्य रावणाय न्यवेदयत्प्लवगवाहिनी राजन् ।
रामरविसुतसहिता वसतीत्यर्णवस्योत्तरे तीरे ॥ 7

स निशम्य तस्य वचनं शुकं समाहूय राक्षसं बलिनम् ।
निजगाद सपदि गत्वा सुग्रीवं प्रापयेति मद्वचनम् ॥ 8

ऋक्षरजसस्सुतस्त्वं वालियवीयान् महाकुलोत्पन्नः ।
मित्रं ममाधिकोऽस्मात् मामभ्येषि प्लवङ्गसेनाभिः ॥ 9

यदि राघवस्य भार्या मया हृता तव किमत्र सुग्रीव ।
नैवावयोर्विरोधोऽस्त्यतो व्रज त्वं निवृत्य किष्किन्धाम् ॥10

लङ्कापुरी न शक्या द्रष्टुं देवासुरैः सगन्धर्वैः ।
नरवानरैः कथं वा शक्या प्राप्तुं विलङ्घ्य वाराशिम् ॥ 11

इति यातुधानपतिना सन्दिष्टो राक्षसः शुको नाम ।
भूत्वा विहङ्गरूपी ततार वाराशिमम्बरेणाशु ॥ 12

कपिवाहिनीं स दृष्ट्वा सुग्रीवं चापि सुरपथे तिष्ठन् ।
आश्रावयद्विशङ्कः सन्दिष्टं रावणेन यत्तदमुम् ॥ 13

श्रावयति यावदेवं सन्देशं रावणस्य तं प्लवगाः ।
उत्प्लुत्य तावदेनं विकृष्य भूमौ निपातयामासुः ॥ 14

पतितं तमथ गृहीत्वा मुष्टिभिरपि जानुभिर्निजघ्नुस्ते ।
दूतं मां रघुनन्दन कपयो घ्नन्तीति सोऽपि चुक्रोश ॥ 15

श्रुत्वा शुकस्य वचनं दाशरथिस्तं विमोचयामास ।
सोऽपि पुनरेत्य गगनं प्रतिवचनं रविसुतं ययाचेऽथ ॥ 16

श्रुत्वा च तस्य वचनं रावणमभि सान्दिदेश कपिराजः ।
मित्रं रावण न त्वं रिपुरेव ममासि सखिरिपुत्वेन ॥ 17

कृवा धनूंषि परिधिं तत्र परिस्तरणमस्त्रसन्दोहम् ।
अस्मान् विभीषणाङ्गदजाम्बवदादींश्च ऋत्विजः सकलान् ॥18

धूलीधूमसमेतं मौर्वीनिस्वानमन्त्रसंयुक्तम् ।
आधाय रोषवह्निं सागरभूयङ्गवाटिकामध्ये ॥ 19

मैन्दद्विविदस्रुक्स्रुवरम्यं काहल निनादसामयुतम् ।
शोणितघृताहुतिशतप्रचुरं वीररससोमपानयुतम् ॥ 20

रात्रिञ्चरपशुसमेतं हनूमद्ब्रह्मणोपशोभितं यागम् ।
प्रीत्यै सकलसुराणां सौमित्र्यध्वर्युणा समुल्लसितम् ॥ 21

रघुनायकयजमानः यावद्यष्टुं विनिश्चयं कुरुते ।
अपि तावदेव सीतां रामाय दिशेति दूत वद तूर्णम् ॥ 22

नो चेदाशु पयोधिं विलङ्घ्य साकं प्लवङ्गसेनाभिः ।
तव पुरदाहमकृत्वा नैवात्मीयं पुरं प्रवेक्ष्यामि ॥ 23

इति सन्दिशति हरीन्द्रे वालिसुतः प्राह वानरप्रवरान् ।
दूतो नैव नभस्स्थश्चारोऽयं गृह्यतामिति क्षिप्रम् ॥ 24

आकर्ण्याङ्गदवचनं कपयोऽभिप्लुत्य कामरूपं तम् ।
बद्ध्वा तलैर्निजघ्नुर्मुष्टिभिरपि जानुभिश्च विलपन्तम् ॥ 25

प्लवगैः स हन्यमानः पुनरपि चुक्रोश रामभद्रेति ।
वीक्ष्य स कृपालुरवदत् नैनं हतेति मुञ्चतेति हरीन् ॥ 26

अथ च विमृश्य रामो ह्यादिशदमुमत्र रक्ष बध्वेति ।
सुग्रीवोऽपि तथैनं रक्षितुमाज्ञापयच्छुकं प्लवगान् ॥ 27

उपधाय दक्षिणभुजं रामोऽथ भुजङ्गराजभोगनिभम् ।
सीताकेल्युपधानं दर्भान् आस्तीर्य भूतले शिश्ये ॥ 28

दर्भशयने शयाने तस्मिन् सुकुमारगात्रपरिणाहे ।
वैश्वानर इव वेद्यां तपसा तिस्रो ययुस्त्रियामिन्यः ॥ 29

रत्नाकरप्रसादालाभाद्रामस्ततः समुत्थाय ।
लक्ष्मणमुवाच रोषात् पश्यानुज सागरं समुत्सिक्तम् ॥30

मामेष शरणभाजं न गणयति क्षिप्रमानय धनुर्मे ।
*विषधरनिभानपि शरान् विशोषयिष्यामि तसमेनमहम् ॥31

---

* विषधरकल्पैर्बाणैः विशोषयिष्यामि सागरं दृप्तम् इति पाठः सङ्गतः भाति ।

क्षमया समन्वितं मां मनुतेऽसौ हन्त विगतसामर्थ्यम् ।
ईदृग्विधे खलजने क्षमा न कार्या विपश्चिता धिगमुम् ॥32

क्षुभितो बभूव वार्धिः कल्लोलैरजनि पर्वताकारैः ।
क्षुभिते सागरसलिले भयं समीयुर्जलौकसः सर्वे ॥ 33

फणिभिः सह प्रभूतैः भीताः पातालमाविशन्नसुराः ।
प्रबलः प्रचण्डवेगो वृक्षानुन्मूलयन् ववौ वायुः ॥ 34

वेलामतीत्य योजनमात्रं प्रससार तस्य वाःपूरः ।
अथ भास्वानिव गगनात् निजाम्बुपरिपूरतः सहसा ॥ 35

फणिभिः फणधृतमणिभिः सह बहुभिः सिन्धुराट् समुत्तस्थौ ।
वैडूर्यरत्नकान्तिर्विविधै रत्नैर्विभूषितो दिव्यैः ॥ 36

रक्तस्रगम्बरधरो राजीवाक्षः प्रसन्नवक्त्रश्रीः ।
श्रीरामं धृतबाणं स कृताञ्जलिरेत्य वाक्यमिदमूचे ॥ 37

मुञ्च रघुवीर कोपं न शक्यतेऽगाधता मया हातुम् ।
मम लङ्घने महान्तं सम्यक्कथयाम्युपायमनपायम् ॥ 38

येन सुखेन तरेयुः कपयः सर्वेऽपि वारिपूरं मे ।
नल एष सेतुबन्धं करोतु मयि विश्वकर्मणः सूनुः ॥ 39

तत्तत्पारमुपेयात् पितुर्वरेणैव यद्यदारभते ।
इत्युक्तवति समुद्रे रामः प्रीतो जगाद सिन्धुपतिम् ॥ 40

कस्मिन्निपात्यतामिदमस्त्रं संहितममोघमाख्याहि ।
अवकाश उत्तरेण द्रुमकुल्याख्योऽस्ति मम महापुण्यः ॥ 41

तत्र निवसन्ति बहवो म्लेच्छा घोराः सदुःसहाचाराः ।
ते दूषयन्ति सततं स्पर्शेन मदीयमम्बु पापिष्ठाः ॥ 42

इति सागरेण कथितो रामोऽस्त्रं तत्र पातयामास ।
अथ सागरः प्रहृष्टः तेन विसृष्टो जलान्तरेऽन्तरधात् ॥43

रामस्तमेव च नलं नियोजयामास सेतुबन्धाय ।
तस्याज्ञयाथ हरयः सद्यो गत्वा समन्ततः शैलान् ॥ 44

शैलनिभानपि सालान् आजहुर्गजवरोपमानुपलान् ।
गर्जन्तो विनदन्तः प्लवङ्गमाः सर्वतः प्लवमानाः ॥ 45

शैलमहीरुहगुल्मैः पारावारं प्रपूजयामासुः ॥
क्षिप्तानामुपलानां शैलानां तत्र पात्यमानानाम् ॥ 46

शब्दो महान् समुदभूत् कल्लोला इव बभूवुरुद्धेलाः ।
सूत्राणि केचिदपरे दण्डान् जगृहुः समन्ततो घोरान् ॥47

विततं नलेन रचितं सेतुं मातुं प्लवङ्गमप्रवराः ।
प्रथमे नलोऽथदिवसे प्लवगानीतैः महीरुहैः सालैः ॥ 48

धीरश्चतुर्दश दृढं बबन्ध सेतुं स योजनान्यब्धौ ।
विंशतिमथ द्वितीये तथैकविंशतिमथो तृतीयेऽपि ॥ 49

द्वाविंशतिं चतुर्थे ततस्त्रयोविंशतिं च पञ्चमके ।
इत्थं नलेन रचितः सेतुः शतयोजनायतः पुण्यः ॥ 50

दशयोजनविततोऽर्णवलक्ष्म्याः सीमन्त इव तदा रेजे ।
दृष्ट्वा नलेन रचितं सेतुं देवाः सहर्षिगन्धर्वाः ॥ 51

विस्मयमवापुरेतत्पितरमिवैनं तदा प्रशंसन्तः ।
अथ मतिमान् वरेण्यः सचिवैः सहितो विभीषणो निरगात् ॥ 52

रक्षोनिर्हरणार्थं दक्षिणतीरे पयोनिधेस्तस्थौ ।
अथ रविसुतस्य वचनाद् दाशरथी वायुवालिजौ बलिनौ ॥ 53

अधिरुह्य ययतुरग्रे तदनु प्लवगाः समन्ततः सर्वे ।
उत्तीर्य वारिराशिं रामः सैन्यैर्महानुभावोऽसौ ॥ 54

शैले महति सुवेले निवेशमकरोत् सहप्लवङ्गवरैः ।
दृष्ट्वा स राक्षसपुरीं अत्र हि रुद्धा मम प्रिया सुमुखी ॥ 55

इति दूयमानचेताः रुद्र इवासीत्पुरत्रयालोके ।
आलोक्य तां कपिवरा नेदुः सिंह्मा इवातिरोषेण ॥ 56

तेषां निशम्य निनदं निशाचरास्तत्रसुरिदम्प्रथमम् ।
परितो निवेश्य सैन्यं प्लवङ्गमानां विधाय रक्षां च ॥ 57

बद्धं मोचय दूतं त्वमिति प्लवगेशमाह रघुवीरः ।
स ततः प्रविश्य लङ्कां विमोचितो राघवेण शुकनामा ॥ 58

समुपेत्य राक्षसेन्द्रं न्यवेदयत्सकवलमपि वृत्तान्तम् ।
श्रुत्वा शुकस्य वचनं रक्षोराजो जगाद रोषेण ॥ 59

आगत्यापि पुरीं मे किं प्रतियातुं स शक्नुयाद्रामः ।
उक्त्वेति राक्षसं तं कपिसेनाया बलाबलं ज्ञातुम् ॥ 60

शुकसारणाभिधानौ सचिवावाहूय रावणोऽवादीत् ।
सुग्रीवसैन्यमध्यं प्रविश्य शीघ्रं युवां विचारयितुम् ॥ 61

ये तत्र शौर्यवन्तो रामार्थं ये युयुत्सवः प्लवगाः ।
ये वा तेषु विविक्ता दाशरथिः सोऽपि सानुजः कीदृक् ॥62

सर्वं विचार्य सत्वरमायातमिति प्रचोदयामास ।
अङ्गीकृत्य तदाज्ञां तौ च तदैव प्लवङ्गमौ भूत्वा ॥ 63

प्रबलप्लवङ्गमबले प्रविश्य सर्वत्र चेरतुश्चारौ ।
ज्ञात्वा विभीषणस्तौ रावणसचिवौ निगूढनिजरूपौ ॥ 64

बध्वाऽऽनीय सकाशं दशरथतनयाय दर्शयामास ।
तावब्रवीच्च रामो दृष्टा किं साधु वाहिनी सकला ॥ 65

नो चेद्विभीषणोऽयं यावद्दर्शयति तामिमां युवयोः ।
दर्शय तद्बलमधुना येन पुरा मे विदेहजाऽपहृता ॥ 66

श्वस्तव दग्धास्मि पुरीमिति वक्तव्यो दशाननः पापी ।
उक्त्वेति यातुधानौ विमोचयामास राघवस्तौ च ॥ 67

अभ्येत्य राक्षसेन्द्रं तस्मै चाख्यतुर्यथावृत्तम् ।
दृष्टा प्लवङ्गमसेना दृष्टो हरिराट् विभीषणेन समम् ॥ 68

दृष्टौ च रुद्रकल्पौ सकार्मुकौ रामलक्ष्मणौ शूरौ ।
तिष्ठतु वानरसेना लङ्कां चत्वार एव नाशयितुम् ॥ 69

पर्याप्ता रघुवीरौ उभावपि प्लवगराजभवदनुजौ ।
तिष्ठन्तु ते त्रयोऽपि च लङ्कां नाशयितुमात्मशौर्येण ॥ 70

अलमेक एव रामः प्रसाद्य तस्मै प्रदेहि वैदेहीम् ।
कथितं वच इति ताभ्यां निशम्य दशकन्धरोऽतिरोषेण ॥71

इति तावुवाच भूयो युवां प्लवङ्गप्रभोर्भृशं चकितौ ।
शक्रादयो दिगीशा समरे ससुरासुराः सगन्धर्वाः ॥ 72

स्थातुं मम पुरतस्ते न समर्थाः किमुत वानराश्च नराः ।
कथयन्निति दशकण्ठः सह ताभ्यामारुरोह शैलोच्चम् ॥73

प्रासादमतिमनोहरमालोकयितुं चमूं प्लवङ्गानाम् ।
अपरमिव वारिराशिं कपिवलमभिवीक्ष्य हेमपिङ्गाक्षम् ॥ 74

दाशरथी सचापौ सुग्रीवविभीषणौ च तत्पार्श्वे ।
शुकसारणावपृच्छत् के वा बलिनो के बलाध्यक्षाः ॥ 75

इति रावणेन पृष्टे शुकानुमत्याऽथ सारणोऽवदीत् ।
दाशरथिपार्श्ववर्ती सुग्रीवोऽसौ प्लवङ्गमाधीशः ॥ 76

तमनु च वालितनूजस्तिष्ठति शतकोटिकपिगणाध्यक्षः ।
भल्लूकमल्ल एषः प्रतिवसति बलेऽत्र जाम्बवान् बलवान् ॥ 77

सङ्ख्यातुमपि न शक्या ये भल्लूकाः सदा भजन्तेऽमुम् ।
शतकोटिकपिगणेशः शूरः सेनापतिश्च नीलोऽसौ ॥ 78

सोऽयं नलो महात्मा येन कृतो वारिधौ महासेतुः ।
शतबलिरेष बलीयान् दशकोटिप्लवगनायको वीरः ॥ 79

गन्धद्वीप इव धीरः कपिवीरो गन्धमादनश्चासौ ।
गज एव शौर्यजलधिर्गवाक्ष एषोऽतिसाहसी समरे ॥ 80

कपिनायकाः परःशतममितबलौघाः समन्ततो भान्ति ।
सर्वेऽपि रामहेतोः प्रविशेयुर्हव्यवाहमपि दीप्तम् ॥ 81

सुग्रीवपार्श्ववर्ती पुनः पुनर्योऽभिवीक्षते लङ्काम् ।
येनाऽदाहि पुरीयं सोऽयं हनुमान् सुराद्रिसमसारः ॥ 82

सुग्रीवो रविसुनुःकोट्योधैर्वानरप्रवीराणाम् ।
सहितो राघवहेतोर्भवता योद्धुं समीहते स्वामिन् ॥ 83

लङ्काधिराजतायां रघुवीरेणाभिषेचितं प्रेम्णा ।
भ्राता विभीषणस्ते योद्धुं सहसचिव इहास्ति ते भवता ॥ 84

इति तेन मन्त्रिणोक्तं वचनं संश्रुत्य रावणो निरतम् ।
आप्तविषादोऽपि हृदा वचसा तौ तत्र तर्जयामास ॥ 85

अथ तौ विसृज्य चारानाहूय प्राहिणोद्दशग्रीवः ।
तेऽपि प्लवङ्गमानां उद्योगं वीक्ष्य रावणमवोचन् ॥ 86

उत्तिष्ठ राक्षस विभो सेनामुद्योजयाशु समराय ।
लङ्कापुरीं नियोद्धुं हरयो रामाज्ञया समायान्ति ॥ 87

इति चारगणसमीरितमाकर्ण्य निशाचरेश्वरो वचनम् ।
सेनापतिं प्रहस्तं सेनामुद्योजयेत्युवाचाशु ॥ 88

स ततो निशाचरेन्द्रो विद्युज्जिह्वं जगाद बहुमायम् ।
मायाशिरो गृहीत्वा धनुरपि रामस्य समुपयाह्यतुलम् ॥ 89

सीतां विमोहयामीत्युक्त्वाऽशोकवनमाविशत्तूर्णम् ।
कृत्वा तथैव रक्षस्तस्यानुपदं विवेश बहुमायम् ॥ 90

अथ रावणो दुरात्मा ददर्श जनकात्मजां तदासीनाम् ।
आक्रष्टुमागतां स्वं साक्षाद् दूतीमिवांशुमत्सूनोः* ॥ 91

"एतादृशीमवस्थां प्राप्तामपि मां उपेक्षसे किं त्वम्"।
इति निन्दितुमिव जननीमानतवदनाम्बुजामतीव कृशाम् ॥92

परिधूसराङ्गलतिकां नितरां क्षीणैः परागसन्दोहैः ।
मात्रा विश्वम्भरया क्लेशादालिङ्गितामिवातितराम् ॥ 93

नाशाय राक्षसानां स्वान्तादुज्जृम्भमाणशोकाग्नौ ।
बाष्पाज्याहुतिनिवहैर्वितन्वतीमाभिचारकं होमम् ॥ 94

---

* यमस्येत्यर्थः ।

दोषाचराधिपस्तां सीतां समुपेत्य वेपमानाङ्गीम् ।
रामो हतः पतिस्ते निशाचरैरित्युवाच शोकार्ताम् ॥ 95

रामाशया भवत्या नीतानि बहून्यमूनि दिवसानि ।
*सा तु गतेति स मायाशिरोधनुश्चाप्यदर्शयत्तस्यै ॥ 96

सीतापि सा तदैते विलोक्य तथ्यमिति वेपमानाङ्गी ।
भूमौ निपत्य बहुधा विललाप भृशातुरा हतास्मीति ॥ 97

एतस्मिन्नथ समये प्रहस्तदू(दू)तस्य वचनमाकर्ण्य ।
निरगान्निशाचरेशः प्रमदवनाद् दूयमानचित्तःसन् ॥ 98

तस्मिन् गते दशास्ये तदैव मायाशिरो धनुश्चापि ।
अन्तर्धानमगातां सरमा सीतामुपेत्य निजगाद ॥ 99

सीते विमुञ्च शोकं मायैषा रावणस्य दुर्बुद्धेः ।
दीर्घायुस्तद' कान्तो जीवति सौमित्रिणा सह भ्रात्रा ॥ 100

सेतुं विधाय वार्धौ सह वाहिन्या कपिप्रवीराणाम् ।
उत्तीर्य तमपि घोरं दक्षिणतीरे निवासमातनुते ॥ 101

रक्षोऽधिपस्तदप्रियमधुना संश्रुत्य दूतवचनेन ।
गत्वैतत्सह सचिवैरालोचयत्यद्य रहसि कार्याणि ॥ 102

सन्नाहयत्यपि चमूं तस्य च सेनापतिर्नियोगेन ।
भेर्यो भैरवनादा रणाय परितो रणन्ति निस्साणाः ॥ 103

---

* या रामाशा ते आसीत् यामाशां अवलम्ब्य त्वया बहूनि दिवसानि व्यतीतानि सा आशा इदानीं गता निष्फला जाता इति वदन् मायारामशिरोधनुषी तस्यै अदर्शयत् इति भावः ।

तस्यामेवं वदन्त्यां कपिसेनायाश्च शुश्रुवे नादः ।
तेन समुच्छ्वसिताऽभूत् सीता तप्ता महीव वर्षेण ॥ 104

अथ सा जगाद सीता सरमां सखि रावणान्तिकमुपेत्य ।
ज्ञात्वा तस्य चिकीर्षामाख्याहि ममेति विसृष्टवती ॥ 105

गत्वा रावणसविधं श्रुत्वाऽऽप्तानां वचांसि तस्यापि ।
अभ्येत्य मैथिलीं सा तस्यै सर्वं निवेदयामास ॥ 106

शृणु जनकराजतनये रावणजननी सुतं समभ्येत्य ।
त्वन्मोचनाय बहुभिः वाक्यैरेनं प्रसादयामास ॥ 107

मातामहो महात्मा ततः समभ्येत्य माल्यवान्नाम ।
त्वन्मोचनाय सीते बहुधा तं सदसि भर्त्सयामास ॥ 108

मन्त्रिभिरमात्यमुख्यैर्बहुधा सत्कृत्य याच्यमानोऽपि ।
तेषां वचांसि नायं मुमूर्षुरिव भेषजं न जग्राह ॥ 109

तत्सर्वथा पतिस्ते मैथिलि दशकन्धरं रणे हत्वा ।
ससुतं सबन्धुवर्गं त्वां नेष्यति शीघ्रमेव चाऽयोध्याम् ॥110

इति सरमया समीरितं आकर्ण्य वचः प्रियान्वितं सीता ।
विजहौ शुचमतिमहतीं सपदि त्वचमिव महोरगी जीर्णाम् ॥111

इत्यार्यारामायणे अष्टादशः सर्गः ॥

------- ❀ -------

।। एकोनविंशः सर्गः ।।

अथ कपिसैन्यनिनादं निशम्य दशकन्धरो महाघोरम् ।
रक्षोबलेन महता परितो गुप्तिं चकार लङ्कायाः ।। 1

प्रास्थापयत्प्रहस्तं पूर्वद्वारे पुरस्य गुप्त्यर्थम् ।
द्वारे च दक्षिणेऽसौ महोदरं सानुजं महावीरः ।। 2

इन्द्रजितं जितशत्रुं नियोजयामास पश्चिमद्वारे ।
शुकसारणौ च शूरौ ससैनिकौ तूर्णमुत्तरद्वारे ।। 3

इत्थं विधाय रक्षां पुरस्य दशकन्धरो बलैः प्रबलैः ।
मृत्युवशीकृतचित्तोऽप्यात्मानं मन्यतेस्म(हि)कृतकृत्यम्।।4

आकर्ण्य सैन्यघोषं विभीषणो रावणस्य लङ्कायाः ।
ज्ञातुं प्रवृत्तिमखिलां [1]चतुरःसचिवान् विसर्जयामास ।। 5

भूत्वा तेऽपि शकुन्ताः प्रविश्य लङ्कामवेत्य वृत्तान्तम् ।
व्यावृत्य बलनिवेशं तस्मै सर्वं निवेदयामासुः ।। 6

सोऽपि नगरीप्रवृत्तिं यथाश्रुतं राघवाय कथयित्वा ।
आचख्यौ दशकण्ठं योद्धुं सन्नद्धं उत्तरद्वारे ।। 7

---

1. विससर्जेति वक्तव्ये विसर्जयामासेति णिजन्त क्रियाप्रयोगः चिन्त्यः "ज्ञातुं प्रवृत्तिमखिलां व्यसृजच्चतुरोऽपि मन्त्रिणो धीरान्" इति पाठः सङ्गतः भाति ।

श्रुत्वा विभीषणवचो रामः सुग्रीवमथो समाहूय ।
आलोक्य कपिबलं तत्पुरीं नियोद्धुं नियोजयामास ॥ 8

पूर्वद्वारि ससैन्यो नीलो योद्धुं सह प्रहस्तेन ।
निवसतु तथाङ्गदोऽपि द्वारं निरुणद्धु दाक्षिणं पुर्याः ॥ 9

इन्द्रजिता सह योद्धुं वसतु हनूमांश्च पश्चिमद्वारे ।
सौमित्रिणा सहाहं निरुध्य निवसेयमुत्तरद्वारम् ॥ 10

सुग्रीव सूर्यसूनो सह जाम्बवता विभीषणेनापि ।
सैन्येन चापि महता निवसारिजयाय मध्यमे गुल्मे ॥ 11

कपिभिर्मानुषरूपं युद्धेषु कदाचिदपि न कर्तव्यम् ।
स्वबलपरबलविवेके भवतादस्माकमेष सङ्केतः ॥ 12

योत्स्यामः पर सैन्यैः सप्तैव वयं मनुष्यरूपेण ।
सौमित्रिरहमपि सखे विभीषणः स्वैश्च मन्त्रिभिः साकम् ॥13

इत्युक्त्वा रघुवीरः समीक्षितुं राक्षसाधिपस्य पुरीम् ।
सहसा सुवेलभूधरशृङ्गं तुङ्गं समारुरोह तदा ॥ 14

आरुरुहुस्तमनु ततो लक्ष्मणसुग्रीवरावणावरजाः ।
वालिसुतवायुनन्दन सुषेणनलनीलजाम्बवत्प्रमुखाः ॥15

तूर्यरवघोषतुमुले नानाविधदन्तिवाहवारिचरे ।
दिव्यास्त्रराजितेजोवडवामुखहव्यवाहसङ्कलिते ॥ 16

सेनाम्बुधौ चरन्तं दशमुखमकरं रघूद्वहो दाशः ।
शरबडिशेन धनुर्ज्यासूत्रजुषाऽसौ जिघृक्षुरिव रेजे ॥ 17

रामे सुवेलशैलं समुपेयुषि कीशवाहिनीसहिते ।
अस्ताचलमतितुङ्गं सप्ताश्वोऽप्याप रञ्जयन्नाशाः ॥ 18

दिनकरमणिमयमकुटो भूयः सन्ध्यांशुकुङ्कुमालेपः ।
अस्ताचलो विरेजे नरपतिरिव निर्झरावलीहारः ॥ 19

व्याघ्रैर्विलोक्यमानः पललधिया कौतुकेन तत्रत्यैः ।
भीत इव चरमशैलात्पपात पाथोनिधौ पतिर्भासाम् ॥ 20

सन्ध्याप्रभा विरेजे भानोरवरोहतो रथस्य गिरेः ।
गगनगुरुकोटितिर्यग्भग्ना ध्वजपट्टिकेव शोणाभा ॥ 21

मद्वन्धुवंशजातो विदेहजाविरहमाप रघुवीरः ।
इति किल विषण्णमखिलं कमलवनं मुकुलितं द्रुतमयासीत् ॥ 22

रहितं जगत्समस्तं विसृमरभासा तदा वियन्मणिना ।
मणिवरशून्यमनोहर मरतकमञ्जूषिकातुलां भेजे ॥ 23

नाथोऽपि सकलजगतां रामः समवाप जानकीविरहम् ।
इति चक्रवाकमिथुनं स्वयमपि शोकादवाप विरहदशाम् ॥ 24

गगनवनस्पृशसन्ध्यारागाग्नौ दिग्गजोरुमदवर्षैः ।
शमिते तमः सुमहदञ्जनयद्धूमसन्ततिर्भाति ॥ 25

सान्द्रस्तमःसमूहो निशाचराणां विधातुमिव साह्यम् ।
सहसा ततः समुदभूदन्धीकुर्वन् दिशः समस्ताश्च ॥ 26

निजया साकं वशया वितन्वता क्रीडनं वियत्सिन्धौ ।
ऐरावतेन मुक्ताः शीकरनिकरा इवाबभुस्ताराः ॥ 27

तप्ताय मदनशिखिना रामारहिताय रामचन्द्राय ।
निर्जरनिर्मितजातीवितान इव तारकागणो रेजे ॥ 28

अधिमौलि धृतवतो मामनिशं शम्भोः शरासनं रामः ।
प्राप्तुं खलु जनकसुतां पुर्वमभाङ्क्षीदवाप्तसन्नाहः ॥ 29

तद्दोषतस्तवाजनि विरहः सम्प्रति विदेहकन्यायाः ।
इति राघवं हसन्निव शीतकरश्चन्द्रिकां किरन् रेजे ॥ 30

स्फटिकशिलासु समस्ताः प्लवङ्गमास्तत्र तत्र दाशरथेः ।
तत्तद्गुणप्रबन्धान् गायं गायं समन्ततो न्यवसन् ॥ 31

रामोऽपि वीक्ष्य लङ्कां सीतां संस्मृत्य तत्र संरुद्धाम् ।
रावणवधे सशङ्को निशामनैषीत्समुल्लसज्ज्योत्स्नाम् ॥ 32

रघुनन्दनस्य घोराः सायकनिकराः समुत्पतिष्यन्ति ।
इति शङ्कयैव गगनात् निरगुस्तारा निशात्यये सहसा ॥ 33

वानरवरूथिनीनामतिभारान्निर्गतस्य पातालात् ।
शेषस्य फणिमणीनां भास इवारुणमरीचयो रेजुः ॥ 34

त्रैलोक्यकण्टकममुं संहर दशकण्ठमाशु रघुवीर ।
इति गदितुमिव दिनेशः पूर्वाचलशृङ्गमभ्यगात्तूर्णम् ॥ 35

अथ राघवो मरुत्सुतसुग्रीवविभीषणाङ्गदप्रमुखैः ।
सौमित्रिणा च साकं विलोकयामास विस्मितो लङ्काम् ॥ 36

मणिमयगोपुरमहसा महता शोणायमान सकलदिशाम् ।
परिवीतामिव परितो मारुतिनिहिताश्रयाशकीलाभिः ॥ 37

रावणवारणमृगयां नरसिह्मायात्मने प्रदर्शयितुम् ।
अन्तकमृगयुनिबद्धै रन्ध्रीवप्रैरिवान्वितं सालैः ॥ 38

तस्या गोपुरशिखरे रक्षोराजं ददर्श रघुवीरः ।
दोधूयमानचामरमम्बरमिव शारदाभ्रखण्डवृतम् ॥ 39

रत्नमयसकलभूषं किरीटिनं रक्तचन्दनालिप्तम् ।
हेमाञ्चितोत्तरीयं स धातुरागाञ्जनाद्रिसङ्काशम् ॥ 40

पूर्णेन्दुबिम्बमहसा विजयछत्रेण समधिगताऽऽशोभम् ।
पूर्वधृतशङ्कराचलशङ्कां जनयन्तमिह किलाद्यापि ॥ 41

आप्तैर्निशाचरवरैरभितः संसेव्यमानमणिपीठम् ।
वनमिव वारणनिकरैरन्तकमिव पापराशिभिर्मूर्तैः ॥ 42

दृष्ट्वा तमसहमानः शृङ्गादुत्प्लुत्य भूभृतो हरिराट् ।
स्थित्वा तन्मणिसौधे रक्षःपतिमब्रवीत् स निःशङ्कम् ॥ 43

मित्रं दशरथसूनोः सुग्रीवो नाम वानरेन्द्रोऽहम् ।
तद्दारान् हतवन्तं न त्वां मोक्ष्यामि नीच जीवन्तम् ॥ 44

इत्युक्त्वाऽभ्यपतत्तं द्योतन्मकुटं स मणिगणैश्चित्रम् ।
आकृष्य तमपि भूमौ न्यपातयत्तस्य चोपरि पपात ॥ 45

तमुपरि समीक्ष्य पतितं रक्षःपतिराह रोषकलुषाक्षः ।
सुग्रीव वानर त्वां हीनग्रीवं पुरा करोमीति[1] ॥ 46

तत उत्थाय करैः स्वैराकृष्यैनं क्षितौ स चिक्षेप ।
सोऽप्युत्थाय पुनस्तं कन्दुक इव झटिति ताडयामास ॥47

रामे निरीक्षमाणे पश्यत्स्वखिलेषु कपिबलाग्र्येषु ।
चक्रतुरुभौ नियुद्धं विक्रान्तौ तौ प्रभूतरक्ताक्तौ ॥ 48

अन्योन्यं प्रजिहीर्षू कलुषन्तौ मण्डलानि विचरन्तौ ।
मुष्टिभिरशनिनिकाशैर्जानुभ्यामपि जघ्नतुर्वीरौ ॥ 49

बलवति कपिकुलनाथे युध्यत्येवं समं हि युद्धेऽथ ।
रक्षःपतिरपि रोषाद्वञ्चयितुं मायया समारेभे ॥ 50

मायां तस्य विदित्वा तूर्णमथोत्प्लुत्य गनमार्गेण ।
सम्प्राप्य समरकीर्तिं सुग्रीवः प्राप राघवाभ्याशम् ॥ 51

---

1. पुरा करोमि यावत्पुरानिपातयोर्लट् करिष्यामि इत्यर्थः ।

रोषान्निर्युध्य बलिना रक्षःपतिना तमक्षतं प्राप्तम् ।
कपिभिः प्रशस्यमानं रविसुतमुपगूह्य राघवोऽवादीत् ॥ 52

कपिराज साहसकृतं अविचार्य मया किमेतदाचरितम् ।
एवं साहसयुक्तं कृत्यं कुर्वन्ति नैव राजानः ॥ 53

संस्थाप्य संशये मां कपिबलमखिलं विभीषणं चेमम् ।
अतिसाहसं कृतमेतदितः परं मा कृथाः कपीन्द्रैवम् ॥54

त्वयि तत्रैव चिरायति समचिन्तयमेवमतिविषण्णमनाः ।
हत्वा रावणमाजौ ससुतात्मबन्धुभृत्यमित्रगणम् ॥ 55

अभषिच्य रावणपदे विभीषणं मैथिलीं विमोक्ष्याहम् ।
भरताय राज्यमखिलं दत्वा देहं पुरा त्यजामीति ॥ 56

श्रुत्वा रघुवरवचनं सुग्रीवः प्राह तं पुनः प्रणयात् ।
भार्यापहारिणं ते दृष्ट्वा रोषाद्विनिर्गतोऽस्मीति ॥ 57

इत्यार्यारामायणे एकोनविंशः सर्गः ॥

॥ विंशः सर्गः ॥

रामः प्रशस्य रविजं शैलादवरुह्य कपिबलैःसाकम् ।
लङ्कां निरोद्धुकामः ततः प्रतस्थे सलक्ष्मणो धन्वी ॥ 1

तमनु रविसुतविभीषणमारुतियुवराजजाम्बवत्प्रमुखाः ।
कपिनायका ययुस्ते तैः सह गोपुरमवाप रघुवीरः ॥ 2

सह लक्ष्मणेन रामे द्वारमुदीचीनमुपगते रोद्धुम् ।
नीलाङ्गदाञ्जनेया द्वाराणि तदा न्यरौत्सुरन्यानि ॥ 3

रामाज्ञयाऽध्यतिष्ठत् सुग्रीवश्चापि मध्यमं गुल्मम् ।
अवसंस्तस्य समीपे षट्त्रिंशकोटिकपिचमूपालाः ॥ 4

राजसुतयोर्नियोगाद्विभीषणोऽभ्येत्य वानरेन्द्राणाम् ।
द्वारि द्वारि समन्तात्कोटिं कोटिं निवेशयामास ॥ 5

सर्वे कपिप्रवीराः शैलान् स्थूलान् द्रुमान् समुद्यम्य ।
अवसन् युयुत्सवस्ते द्वारि द्वारि प्रभूतसंरम्भाः ॥ 6

शतनागबलसमेताः केचित्केचन सहस्रदन्तिबलाः ।
अन्येऽयुतद्विपबलाः परेऽप्यसङ्ख्येयगजबलाःप्लवगाः ॥ 7

परितो बलं प्रसर्पन्नखायुधानामतीव शूराणाम् ।
प्लवगानामपि बलिनां सागर इव भीमनिःस्वनं विबभौ ॥ 8

तद्वीक्ष्य जातशङ्का विस्मयमीयुर्निशाचराः सर्वे ।
नेदुस्ततः प्लवङ्गाः प्रकम्पयन्तो निशाचरेशपुरीम् ॥ 9

एवमुपरुध्य लङ्कां सुग्रीवविभीषणानुमत्याथ ।
आहूय वीलिनन्दनमानतमित्यब्रवीत्तदा रामः ॥ 10

अङ्गद महाबल त्वं प्रविश्य लङ्कां सुरासुराऽधृष्याम् ।
रावणमुपेत्य तूर्णं मद्धचनेन ब्रूहि धृष्टमेतत्तम् ॥ 11

यद्धलयुतेन भवता सीताऽपाहारि मय्यसन्निहिते ।
तद्दर्शय त्वमधुना समागतोऽहं विलङ्घ्य वाराशिम् ॥ 12

निशितैरहं शरौघैरराक्षसं लोकमाशु करवाणि ।
अभिलषसि जीवितुं यदि शरणं [1]माऽऽयाहि मैथिलीं दत्वा ॥13

वालितनयस्तदानीमिति सन्दिष्टो रघुप्रवीरेण ।
आलम्ब्य गगनमार्गं रावणगृहमाससाद बहुसौधम् ॥ 14

राहुरिव मेघवृन्दं प्रविश्य तद्भवनमाशु तेजस्वी ।
स ददर्श सौधसीमनि सचिवैः सकलैरमुं समासीनम् ॥ 15

आख्याय रामदूतं स्वं तनयं शक्रनन्दनस्यापि ।
आश्रावयच्च सकलं राघववचनं निशाचरेशानम् ॥ 16

---

1. मामित्यर्थः ।

इत्थं वालितनूजं कथयन्तमसावतीव रोषेण ।
आदिक्षदमितसत्वान् गृह्णीतेति क्षपाचरानचिरात् ॥ 17

तत उत्थाय सरोषाश्चत्वारस्तं समेत्य रात्रिचराः ।
जगृहुःस्वबलं प्रथयितुमग्राहयदाशु सोऽपि चात्मानम् ॥18

तत उत्पत्य विहायः सहतैर्बाहुद्वयावसक्तकरैः ।
तत्रस्थः स्वशरीरं दुधाव ते पाण्डुपत्रवन्न्यपतन् ॥ 19

स ततो विलोक्य वीरो वालिसुतः शैलशृङ्गमिव तुङ्गम् ।
प्रासादराजिशिखरं विदारयामास पादघातेन ॥ 20

रक्षः पतेः पुरस्तात्कृत्वैवं शौर्यमात्मनामापि ।
विश्राव्य वीतशङ्को वालितनूजः समासदद्रामम् ॥ 21

लङ्कां प्रविश्य वेगाद्विनिवृत्ते वालिनन्दने रामः ।
शाखामृगैर्नदद्भिः सहितोऽभिससार शत्रुविजयाय ॥ 22

युद्धाय रामभद्रे सन्नाहजुषि प्रभूतसंरम्भे ।
कपयोऽपि योद्धुकामाः ससुः सर्वे तरून् समुद्यम्य ॥ 23

शरभाणामिव सङ्घं सर्पत्परितः कपिप्रवीरबलम् ।
तद्वीक्ष्य वेपमाना रावणमूचुः समेत्य रात्रिचराः ॥ 24

सोऽपि विससर्ज रक्षःसेनामह्नाय कपिवरैर्योद्धुम् ।
सा निर्ययौ नगर्या सतूर्यघोषं समृद्धहयहेषम् ॥ 25

तां वीक्ष्य योद्धुकामाः कपयः सिह्मा इवोद्धता व्यनदन् ।
शब्देन तेन महता चचाल लङ्का निशाचरेशोऽपि ॥ 26

आरेभिरेऽथ योद्धुं कपिवीरा झटिति राक्षसैः शूरैः ।
मुष्टिभिरशनिसदृक्षैरश्मभिरपि भूरुहैः शैलनिभैः ॥ 27

नखरैर्विदारयन्तो दन्तैर्गात्राणि परिदशन्तस्ते ।
युयुधस्तलप्रहारैर्निपातयन्तश्च राक्षसान् समरे ॥ 28

तेऽपि शरैरतिघोरैः परश्वथैः पट्टसैर्गदाशूलैः ।
प्लवगबलं व्यथयन्तो युयुधुर्घोरा निशाचराः समरे ॥ 29

प्राकारोपमसंस्थान् प्रवरान् उत्प्लुत्य राक्षसान् प्लवगाः ।
आकृष्य भूतले तान् निपातयामासुरधिकसंरम्भाः ॥ 30

एवं प्रवर्तमाने तुमुले युद्धे पलाशकीशानाम् ।
रथगजतुरगखुरोत्थं रजः शशाम प्रभूतरक्तोघैः ॥ 31

अथ रक्षसां कपीनां अर्वतत द्वन्द्वयुद्धमन्योन्यम् ।
इन्द्रजिता सह युयुधे वालितनूजो महाबलो बलिना ॥ 32

युयुधे वायुतनूजो बलवान् सह जम्बुमालिना बलिना ।
मित्रघ्नेन च सार्धं विभीषणोऽरिविभीषणो बहुधा ॥ 33

सुग्रीवः प्रघसेन च नीलश्च महाबलो निकुम्भेन ।
सौमित्रिश्च तरस्वी समिति विरूपाक्षरक्षसा समियात् ॥34

सुप्तघ्न यज्ञकोपौ ततोऽग्निकेतुश्च रश्मिकेतुश्च ।
चत्वारोऽप्यतिशूराः समित्ययुध्यन् रघुप्रवीरेण ॥ 35

तेषां समिति चतुर्णां शूरो रामः शिलाशितैर्विशिखैः ।
शीर्षाणि तूर्णमवनौ तालफलानीव पातयामासः ॥ 36

एवं सुषेणमुख्या परःशतं प्लवगनायकाः शूराः ।
बलिभिर्निशाचरवरैः समरेऽयुध्यन् समन्ततो घोरैः ॥ 37

आन्त्रप्रवालभरितो विकीर्णरथचक्रकूर्मसन्दोहः ।
निहतमदावलशैलः खण्डितवाहालिडुण्डुभोपेतः ॥ 38

कुणपग्राहसमेतो रथावलीपानपात्रसंवीतः ।
अन्योन्यायुधनिष्ठुरघर्षितसञ्जातरेणुपुलिनश्रीः ॥ 39

हतवाजिजलचरगणो विसृमरतद्धक्त्रफेनडिण्डीरः[1] ।
धवलातपत्रमण्डलहंसकुलो मांसखण्डमणिजालः ॥ 40

रत्नमयमकुटराजिमयूखवडवाग्निरोचिरुद्दामः ।
भूतप्रेतपिशाचप्रमुखप्रचुराट्टहासनिर्घोषः ॥ 41

रुधिरधुरिपूर्यमाण समराङ्गणसागरो महाघोरः ।
विरराज विस्मयकरो वियति च भूमौ च वीक्षमाणानाम् ॥ 42

कपिभिर्निशाचरा ये समरेऽयुध्यन् महाबलैःशूरैः ।
ते सर्वे बलिभिर्विरथीरथीभूय प्रदुद्रुवुर्विजिताः ॥ 43

---

1. डिण्डीर – Cuttle fish-bone, considered to be the foam of the sea.

अथ भानुरस्तशैलं प्राप दिशश्चापि संवृतास्तमसा ।
रजनी समाविरासीत् कपिरक्षःप्राणहारिणी घोरा ॥ 44

अन्योन्यबद्धवैराः शूरा रजनीचराश्च कपिवीराः ।
सान्द्रेऽपि तमसि समरं न तत्यजुः क्रोधकलुषितस्वान्ताः ॥45

निघ्नन्तः कपिवीरा निशाचरान्वाजिरथसमारूढान् ।
चेरुरपि तेऽपि शूरास्तान् युधि जघ्नुःसवाहरथसूतान् ॥46

सौमित्रिरपि च रामो दृश्यादृश्यानि तत्र रक्षांसि ।
विशिखैर्निजघ्नतुरुभौ हतशेषैस्तैश्च जघ्निरे प्लवगाः ॥47

रथनेमिहरिखुरोत्थं महीरजः कर्णनेत्ररन्ध्राणि ।
परिपूरणं चकार प्रयुध्यतां कीशरक्षसां बलिनाम् ॥ 48

रजसा घनेन मिश्रे घोरे तमसि प्रभूतसंरम्भाः ।
कपिराक्षसाः समन्तात् दृश्यादृश्यान्निजघ्नुरन्योन्यम् ॥49

रक्षोहतैः प्लवङ्गैः कपिभिर्निहतैश्च राक्षसैःशूरैः ।
भग्नै रथैध्वजैरपि शस्त्रैर्विविधैः समाचिता रणभूः ॥ 50

वानरनिशाचराणां उत्पेतुः सर्वतः कबन्धानि ।
सस्त्रुः शोणितनद्यो नेदुर्निहता निशाचराः सर्वे ॥ 51

शूरास्ततः पलाशास्समरे तस्मिन् महीधरप्रमुखाः ।
रामं तदाभ्यगच्छन् ज्वलन्तमिव हव्यवाहनं शलभाः ॥52

---

* हरि – Horse.

एकेन पत्रिणैकं द्वौ त्रींश्चतुरोऽपि पञ्चषट् चापि ।
विव्याध केऽपि समरे क्वचिन्न्यपतन् परे पलायन्तः* ॥53

रामस्य बाणनिकरैः काञ्चनपुङ्खैः शिलाशितैश्चास्त्रैः ।
खद्योतैरपि तमसा वितता भातिस्म शारदीव निशा ॥ 54

एवं प्रवर्तमाने समरे तस्मिन् महेन्द्रपौत्रेण ।
विरथीकृतस्तदानीं अन्तरधाद्रावणिर्महाशूरः ॥ 55

समरे हरिभिरदृश्यो निशाचरेशाननन्दजः क्रूरः ।
शरवर्षानभिवर्षन् सर्वत्र चचार मातरिश्वेव ॥ 56

दृष्ट्वा स राजपुत्रौ दुर्धर्षौ शक्रजित्ततः शूरः ।
गात्रं तयोरविध्यत् विशिखीभूतैः समन्ततः सर्पैः ॥ 57

बद्धौ तैरतिमात्रं पेततुरुर्व्यामुभौ क्षरद्रक्तौ ।
परशुविनिकृत्तमूलौ सुपुष्पितौ किंशुकाविवात्युच्चौ ॥ 58

तौ युधि निपात्य शूरौ हरीन् समाविध्य चाङ्गदप्रमुखान् ।
लङ्कां प्रविश्य रभसाद्विजयं पित्रे न्यवेदयत्प्रीतः ॥ 59

तस्मिन् गते कपीन्द्रः कपिप्रवीरैः सहैत्य तत्पार्श्वम् ।
आलोक्य तौ विसंज्ञौ रुरोद दुःखेन हा हतोऽस्मीति ॥ 60

आश्वास्य तं रुदन्तं विभीषणोऽभ्येत्य पाणिना बाष्पम् ।
परिमृज्य सोदकेन प्राहेति विलोकयंश्च दाशरथी ॥ 61

---

1. पलायन्तः – अय् with परा is generelly used in Athmane pada (पलायमानाः)

पश्य हरीश्वर वदनं प्रसन्नमनयोः सरोजमिव फुल्लम् ।
न प्राणहानिरनयोः प्रतिपत्स्येते च चेतनामेतौ ॥ 62

इत्थं कथयति तथ्यं विभीषणे शत्रुभीषणे वचनम् ।
शोकं निशम्य कीशैः सह तौ रक्षन् समन्ततस्तस्थौ ॥* 63

श्रुत्वा वचो दशास्यः पुत्रस्य ततः प्रशस्य तद्विजयम् ।
उद्घोष्य राजवीथ्यां अलङ्कृतां स्वामकारयन्नगरीम् ॥ 64

आहूय राक्षसीस्ताः सीतारक्षानियोजिताः प्राह ।
दर्शयत जनकजायै दाशरथी युधि निपातिताविति तौ ॥ 65

ता रावणस्य वचनात् त्रिजटाप्रमुखा निशाचरप्रमदाः ।
आदाय सपदि पुष्पकं अशोकवनिकां उपासदन् सकलाः ॥ 66

आरोप्य तत्र सीतां अम्बरमार्गेण सङ्गरक्षोणीम् ।
आसाद्य ताश्च तस्यै दाशरथी तत्र दर्शयामासुः ॥ 67

सा वीक्ष्या तौ विसंज्ञौ पतितौ धरणीतले शरैर्विद्धौ ।
हा राम लक्ष्मणेति च बहुधा विललाप बाष्पपूर्णमुखी ॥ 68

आताम्यदङ्गलतिका सीता सीतेव घर्मसन्तप्ता ।
सीता कातरनयना माता जगतां रुरोद भूमिसुता ॥ 69

हा वीर हा गुणालय हा राघव हा मनोभवाकार ।
हा मम जीवितनायक हा दशरथतनय हा हतास्मि विभो ॥ 70

---

* सुग्रीवः – कर्ता

हृदि धारयाम्यहं त्वां इति सन्दिष्टं यदनिलजेन समम् ।
अधुना तदजनि मिथ्या यत्त्वय्येवं गतेऽपि जीवामि ॥ 71

अतिबलवानपि वाली त्रिशिरःखरदूषणादयः पूर्वम् ।
येन निहतास्तदस्त्रं किं वा भवताऽत्र विस्मृतं वीर ॥ 72

अन्विष्य दण्डकवनं उपेत्य मद्वृत्तिमब्धिमुल्लङ्घ्य ।
हा हन्त गोष्पदेऽस्मिन् मग्नौ मन्नाथदेवरौ वीरौ ॥ 73

अभिषेकमर्हतीयं सीता जगदीश्वरेण सह भर्त्रा ।
पुत्रवतीति यदुक्तं दैवज्ञवचो बभूव तद्व्यर्थम् ॥ 74

इति करुणं विलपन्तीं जनकतनूजामवेक्ष्य सा त्रिजटा ।
निजगाद सान्त्वयन्ती न मृतौ पतिदेवरौ तवेति शनैः ॥75

इदमपि वदामि चिह्नं पुष्पकमेतत्कदापि दिव्यतया ।
न बिभर्ति भर्तृरहितां तस्माद्विहीहि कातरे शोकम् ॥ 76

आश्वासितापि सैवं न जहौ शोकं समीक्ष्य तौ पतितौ ।
राक्षस्योऽपि पुनस्तामादायाशोकवनमुपासेदुः ॥ 77

रामस्ततो महात्मा संज्ञां समुपेत्य वीक्ष्य निःसंज्ञम् ।
सौमित्रिं शरनिचितं शुशोच निन्दन् वचोभिरात्मानम् ॥78

साकं मया यथा त्वं विपिनं समुपागतो निरुद्धोऽपि ।
अहमपि तथाऽनुजं त्वामचिराद‌नुयामि नात्र सन्देहः ॥ 79

सीतासमाऽपराधी न क्वापि भवता अन्यता भुवने ।
किन्तु भवतः समानो भ्राता न भवेत् साम्परायिके धीरः ॥ 80

विरहातुरं भवान् मां सौमित्रे पर्यसान्त्वयत्पूर्वम् ।
अधुना शरैस्सुदीनं आर्तं नितरामुपेक्षसे किं त्वम् ॥ 81

किं नु मम भूमिजाया कार्यं लब्धेन जीवितेनापि ।
अनुजं लक्ष्मणमाजौ पश्यामि यतः परासुमेनमहम् ॥ 82

यास्यामि चेदयोध्यां निवृत्य किं नु विना भवन्तमहम् ।
शत्रुघ्नोऽपि च भरतो दृष्ट्वा परिपृच्छ्य किं वदेयुर्माम् ॥ 83

क्रोशन्तीः कुररीवत् वत्सविहीनाः पयस्विनीरिव ताः ।
*जननीरहं कथं वा सौमित्रे हन्त सान्त्वयिष्यामि ॥ 84

---

* श्री सीतारामयोः वृत्तान्तमात्रवर्णने बद्धश्रद्धेन वाल्मीकिमहर्षिणा चतुर्विंशतिसहस्रश्लोकैः रामकथा वर्णितम् । वक्तव्येषु बहुषु वृत्तान्तेषु सत्स्वपि वक्तव्येतरविषयाश्च तत्र तत्र दृश्यन्ते एव । सीतारक्षणार्थं अशोकवने रावणेन नियुक्तानां राक्षसीनां वर्णने तन्नामकथने च आवश्यकतां दृष्टवता कविना रामसेवार्थं चतुर्दशवर्ष वनवासाय प्रस्थितस्य लक्ष्मणस्य पत्नीमूर्मिलामधिकृत्य नैकोऽपि श्लोकः निबद्धः । वनगमनसमयेऽपि लक्ष्मणेन ऊर्मिला न दृष्टा नाप्याश्वासितेति ज्ञायते । रात्रियुद्धे इन्द्रजिता बहुबाणैः विद्धस्य रणस्थले पतितस्य लक्ष्मणस्यावस्थां दृष्ट्वा बहु प्रलपतो रामस्यापि ऊर्मिलास्मृतिः नागतेति इदं अतीव विषादस्थानं भाति । दोषोऽयं रामं मा स्पृशतु इति कृत्वा पद्यमिदमत्र योजनार्हं मत्वा दीयते :-

" भवता वनं प्रयातो भर्ता मम कुत्र वेति पृच्छन्तीम् ।
हा हा हन्तोर्मिलां तां किं वा वक्ष्यामि वत्स सौमित्रे ॥"

लब्धा जनकसुता यदि ... नु ... लक्ष्मणं विना वीरम् ।
बधिरस्य किन्नु गानैः अ... ...चिकन्दलीभिः किम् ॥ 85

इति बहु विलप्य रामो ... अश्रुदित्वरैर्बाष्पैः ।
तरणितनयं तदार्जी सरो... ...स्य वाक्यमिदमूचे ॥ 86

साकं वानरवीरैः भवता सुग्रीव वायुतनयेन ।
जाम्बवता मम कार्यं कर्तुं यत्नः कृतो जले... ॥ 87

[1]जगति तथा खलु वीर केनापि न शक्यमेव लङ्घयितुम् ।
आतो दिनकरसूनो स्वपुरीं प्रति याहि सेनया साकम् ॥ 88

आगत्य मत्कृतेऽसौ हत [2]इव रणसीम्नि लक्ष्मणः शेते ।
[3]स्थित्वाऽत्रैव सखेऽहं सा... त्यक्ष्यामि तृणमिव प्राणान् ॥ 89

परिदेवनं रघुपतेराकर्ण्य दिनेशनन्दनप्रमुखाः ।
प्लवगवराः समदुःखा ...दुर्बाष्पायमाणनयनास्ते ॥ 90

आलोक्य तानशेषान् प्लवगानथ तादृशौ च दाशरथी ।
विसृजन्नश्रु विषण्णो विललाप विभीषणोऽपि तत्र भृशम् ॥ 91

वीर्यमुपाश्रित्य ययोर्मया प्रतिष्ठाऽभिकाङ्क्षिता गहती ।
हा हन्त दैवयोगादनयोरेतादृशी दशा जाता ॥ 92

---

1. भवितव्यतां । 2. इह ।

3. नागपाशबद्धोरामः महासत्त्ववत्तया क्षणं ससंज्ञो भूत्वा स्वावस्थां विस्मरन् लक्ष्मणं ...तनं वीक्ष्य व्यलपत् । किन्तु सः पुनरपि विषवेगातिशयेन विसंज्ञो जातः । अत एव उत्तरत्र गरुडागमनं नागपाशतो विमुक्तिरुभयोश्च सङ्गच्छते ।

विलपन्तमिति विभीषणमालिङ्ग्य दिनेशनन्दनोऽवादीत् ।
लङ्काधिराजलक्ष्मीं प्राप्स्यचिरेण नात्र सन्देहः ॥ 93

इति परिसान्त्व्य विभीषणमाहूय सुषेणमब्रवीद्वचनम् ।
श्वशुर प्रापय शूरौ किष्किन्धां रामलक्ष्मणावेतौ ॥ 94

अचिरादहं दशमुखं ससुतज्ञातिं रणाङ्गणे हत्वा ।
आनेष्यामि च सीतामर्पयितुं राघवाय धीराय ॥ 95

इति वदति तरणितनये पक्षप्रभया पिशङ्गयन्नाशाः ।
गरुडस्तदाऽऽविरासीद् गगनाद्भास्वानिव प्रभा विकिरन् ॥ 96

तं वीक्ष्य दाशरथ्योर्गात्रं बध्वा स्थिताः शरीभूताः ।
सर्पास्तावथ मुक्त्वा परितो वेगात्पलयिता जाताः ॥ 97

मुक्तौ तौ शरबन्धात् समुत्थितौ सह कपिप्रमोदेन ।
उपसृत्य वैनतेयस्तद्देहौ पाणिना च पस्पर्श ॥ 98

हत्वा रावणमाजौ प्राप्स्यसि भार्यां प्रतिव्रतामाशु ।
उक्त्वेति रामचन्द्रं भूयः स ययौ प्रविश्य चाकाशम् ॥ 99

।। एकविंशः सर्गः ।।

अथ वीक्ष्य कपिवीरास्ते समुत्थितौ नीरुजौ रघुप्रवीरौ ।
चक्रुः सिंहनिनादं प्रचुक्षुभे तेन राक्षसेन्द्रपुरी ।।

आकर्ण्य कपिनिनादं विशङ्कमानो दशाननस्तूर्णम् ।
कपिहर्षकारणं तत् ज्ञातुं रक्षांसि चोदयामास ।।

आरुह्य तेऽपि सालं शैलमिवोच्चं समुत्थितौ स्वस्थौ ।
आलोक्य राजपुत्रौ जीवन्तौ तौ न्यवेदयन् भर्त्रे ।।

स च नागपाशमुक्तौ समुत्थितौ रामलक्ष्मणौ श्रुत्वा ।
निर्णीयात्मविनाशं धूम्राक्षं नाम राक्षसमथोचे ।।

धूम्राक्ष गच्छ तूर्णं समरायेति प्रचोदितस्तेन ।
चतुरङ्गिणीं विकर्षन् सेनां निरगात् स पश्चिमद्वारात् ।।

तं वीक्ष्य योद्धुकामं कपयश्च शिलास्तरून् समुद्यम्य ।
राक्षसं ययुः समन्तात् युद्धं कपिरक्षसां ततः समभूत् ।। ६

युद्धे प्रवर्तमाने तुमुले कपिरक्षसां महाघोरे ।
धूम्राक्षमथ हनूमान् शिलां गहीत्वा समाययौ हन्तुम् ।

उद्यम्य तां सुमहतीं क्षिप्रं चिक्षेप तं प्रति हनूमान् ।
सोऽपि गहीत्वा स्वगदां रथादवप्लुत्य भूतले तस्थौ । ८

क्षिप्ता हनूमता सा शैलस्थूला समेत्य वेगेन ।
साश्वध्वजं ससूतं तस्य रथं सपदि चूर्णयामास ॥ 9

धूम्राक्षोऽपि सरोषं गदया मारुतिमथार्दयत्सोऽपि ।
उत्पाट्य शैलशृङ्गं तूर्णं तच्छिरसि पातयामास ॥ 10

तेन स विदीर्णमूर्धा निपपात वमन् मुखादसृक् भूरि ।
वज्रायुधेन दलितःसधातुनिष्यन्द इव महाशैलः ॥ 11

धूम्राक्षे निहते युधि हनूमता बलवता महावीरे ।
हतशेषाः पिशिताशा विविशुर्नगरीं समन्ततो भीताः ॥ 12

प्रतिपक्षधूमकेतुं श्रुत्वा धूम्राक्षमाञ्जनेयहतम् ।
रक्षःपतिरतिरोषात् राक्षसमाहेति वज्रदंष्ट्राख्यम् ॥ 13

त्वं वज्रदंष्ट्र तूर्णं गत्वा सबलौ निहत्य रघुवीरौ ।
सुग्रीवमपि ससैन्यं जहि समये सर्ववानराधीशम् ॥ 14

स तथेति राक्षसेश्वरमुक्त्वा सेनापतिर्महामायः ।
सह सेनया महत्या निरगात् युद्धाय दक्षिणद्वारात् ॥15

सह सर्वतूर्यघोषैरायान्तं रथिनमुग्रधन्वानम् ।
अभिवीक्ष्य तमथ *सस्रुस्तरून् समुद्यम्य वानराधीशाः ॥16

वानरनिशाचराणां सुरासुराणामिवाभवद्युद्धम् ।
जघ्नुर्निशाचरबलं प्लवङ्गमास्तरुशिलाबृहच्छैलैः ॥ 17

---

* सस्रुः = गताः (सृंगतौ-लिटि)

रात्रिंचरा अपि शरैः खड्गैः शूलैः परश्वथैर्निशितैः ।
परिघैश्च भिण्डिपालैरनयन् यमसादनं आशुगणान् ॥ 18

रक्षोबलेन महता प्लवगबलं वीक्ष्य पातितं समरे ।
वीरो वालितनूजो निघ्नन् रक्षांसि तूर्णमभ्यागात् ॥ 19

तं वीक्ष्य वज्रदंष्ट्रो निबर्हयन्तं निशाचरान् वीरान् ।
अभ्यासससाद रोषाद्युद्धमभूदद्भुतं तयोरुभयोः ॥ 20

विव्याध वज्रदंष्ट्रो वालिसुतं समिति सायकैर्निशितैः ।
सोऽपि शिलामतिमहतीं चिक्षेप विनद्य सिंहवद् वीरः ॥ 21

स निशाम्य वज्रदंष्ट्रस्तामायान्तीं ततो गदापाणिः ।
तस्थौ रथात्पृथुतरात् उत्प्लुत्य महीतले महाबाहुः ॥ 22

वालितनयप्रणुन्ना साऽपि शिला सध्वजं ससूताश्वम् ।
सयुगन्धरं रथमेतं निमेषमात्रेण चूर्णयामास ॥ 23

रोषाद्वालितनूजश्चमूपतेः शिरसि पातयामास ।
स च तेन भिन्नमूर्धा मूर्छा समवाप शोणितोद्गारी ॥ 24

संज्ञामुपेत्य भूयो गदया निजघान वालिनः सूनुम् ।
गदया विधूय तामथ योद्धुं तेनाऽऽययौ महावीरः ॥ 25

अभवन्नियुद्धमनयोरन्योन्यं मुष्टिभिर्घ्नतोर्बलिनोः ।
अपहाय बाहुयुद्धं सोऽप्यसिमादाय चर्मचाभिययौ ॥ 26

वीरो वालितनूजो वृक्षं चिक्षेप वज्रदंष्ट्राय ।
कुर्वन् सिह्मनिनादं समरे सेनापतिर्महावीरः ॥ 27

तमापतन्तमसिना सहसा चिच्छेद राक्षसोऽपि बली ।
वितथं विलोक्य वृक्षं रोषादभ्येत्य वालिनः सूनुः ॥ 28

आच्छिद्य तद्धृतमसिं तेन स चिच्छेद तस्य मूर्धानम् ।
वालितनूजनिहतं रक्षः समुदीक्ष्य वज्रदंष्ट्राख्यम् ॥ 29

पिशिताशा हतशेषाः प्राविक्षन् सपदि राक्षसेन्द्रपुरीम् ।
निहतं स वज्रदंष्ट्रं वालितनूजेन रावणः श्रुत्वा ॥ 30

रेषारुणेक्षणः सन् अकम्पनं नाम राक्षसमथाह ।
त्वमकम्पन सहसैन्यस्त्वरितं निर्याहि शत्रुविजयाय ॥ 31

इति रावणेन कथितः सोऽपि ससैन्यो विनिर्ययौ नगरात् ।
सह सैन्यसकलघोषैः तस्मिन्निर्याति पश्चिमद्धारात् ॥ 32

नेदुः कपिप्रवीरास्ततसैन्यं वीक्ष्य राक्षसाश्च तदा ।
उद्यम्य भूरुहगिरीन् उत्प्लुत्योत्प्लुत्य समभिधावन्तः ॥33

आपेतुः कविवीरा राक्षसमुख्यान् समन्ततो घोरान् ।
अथ दिग्विजृम्भितरस्वं कदनमभूत् कीशरक्षसां घोरम् ॥34

शस्त्रैः कपीन् निजघ्नुर्निशाचरांस्तेऽपि तलैश्च तीक्ष्णनखैः ।
एवं प्रवर्तमाने समरे निहतान्निशाचरैः प्लवगान् ॥ 35

आलोक्य वायुसूनुः निघ्नन् रक्षांसि तूर्णमभ्यागात् ।
तं वीक्ष्य राक्षसास्ते दुद्रुवुरन्तकमिवातिसंरब्धम् ॥ 36

धावत्सु तेषु रोषादकम्पनोऽभ्याययौ हनूमन्तम् ।
इषुभिः सुवर्णपुङ्खैर्विव्याध निशाचरस्तमायान्तम् ॥ 37

तैरावृतः स विबभौ भानुरिवौद्यन्निजांशुपरिवीतः ।
आलोक्य राक्षसं तं रोषादुत्खाय सालमुत्तुङ्गम् ॥ 38

धावन्नुपेत्य वेगात्तेनाभिजघान तस्य मूर्धानम् ।
तेन स विदीर्णमूर्धा वृत्रासुर इव महेन्द्रवज्रेण ॥ 39

निपपात राक्षसवरो रक्तं वक्त्राद्वमन् जहौ चासून् ।
निहतमकम्पनमाजौ मारुततनयेन वीक्ष्य हतशेषाः ॥ 40

विविशुर्भयेन नगरीं निशाचरास्ते विमुक्तकेशास्त्राः ।
दृष्ट्वाऽकम्पनमाजौ प्रमापितं मातरिश्वतनयेन ॥ 41

परितुष्टुवुः प्लवङ्गास्तं भुवि दिवि देवताः सहर्षिगणैः ।
अरिहृदयकम्नमकम्पनमपि निहतः दशाननःश्रुत्वा ॥ 42

आसाद्य हृदयकम्पं प्रहस्तमाहूय राक्षसमवादीत् ।
विजितास्त्वयैव पूर्वं बहुशो देवाः प्रहस्त विख्याताः ॥ 43

अधुनापि राजपुत्रौ युधि सुग्रीवं च जहि सह प्लवगैः ।
इति रावणेन कथितं वचनं श्रुत्वा प्रणम्य तस्मै सः ॥ 44

तेन विसृष्टस्तूर्णं सगजाश्वरथोऽपि निर्ययौ पुर्याः ।
सह तूर्यशङ्खनादैः निर्यान्तं सहितममितसेनाभिः ॥ 45

तं वीक्ष्य रामभद्रः पप्रच्छ विभीषणं क इत्येषः ।
समधिकबलः प्रहस्तः सेनानीरेष राक्षसाधिपतेः ॥ 46

सेनातृतीयभागः सततममुं सेवते महासत्वम् ।
इत्थं विभीषणेन प्रोक्तं वचनं निशम्य रघुवीरः ॥ 47

सबलेन तेन योद्धुं नीलं सबलं नियोजयामास ।
गर्जन्तश्च नदन्तस्तरून् समुद्यम्य शैलशृङ्गनिभान् । 48

चेरुः पुनः प्लवङ्गा नीले युद्धाय क्लृप्तसन्नाहे ।
अथ रक्षसां कपीनां . . . .॥ 49

*युद्धाय राक्षसेन्द्रे निर्गते सपदि राक्षसाः प्रवराः ।
शतशः समाययुस्ते रथान् समारुह्य शस्त्रिणः सज्जान् ॥ 50

हेषारवैर्हयानां बृंहितशब्दैश्च वानरेन्द्राणाम् ।
रथनेमितूर्यघोषैरपि लङ्कापुरीरक्षसां निनदैः ॥ 51

श्वेतच्छत्रवितानं सरथाश्वं सायुधं दशास्यबलम् ।
अपर इव वारिराशिः सफेनयादोगणस्तदा रेजे ॥ 52

---

* इतःपरं प्रहस्तयुद्धवर्णनपरोभागः मातृकायां न दृश्यते । ततः राक्षसेन्द्रस्य रावणस्य ससम्भ्रमरणप्रयाणोपक्रमवर्णपरः भागोऽपि न दृश्यते । तस्य रावणस्य प्रथमदिन युद्धाय नगर्याःनिर्गमनादारभ्यैव प्रस्तुतिः दृश्यते ।

ससुतं सबन्धुवर्गं सामात्यं चापि तेजसाऽभिवृतम् ।
तं वीक्ष्य राक्षसेन्द्रं रामो रोषाद्विभीषणमुवाच ॥ 53

ऊर्व इव शापमब्धौ रोषं मोक्ष्यामि मामकममुष्मिन् ।
कथयन्निति रघुवीरः कार्मुकमादाय सायकं निशितम् ॥ 54

सहलक्ष्मणः प्रतस्थे रणाय कपयोऽपि रविसुतप्रमुखाः ।
अथ रावणो विवेश प्लवङ्गमानां बलं प्रवीराणाम् ॥ 55

मकर इव वारिराशिं सुग्रीवो वीक्ष्य तं रुषाऽभिययौ।
उत्पाट्य शैलशृङ्गं रक्षःपतये रुषा स चिक्षेप ॥ 56

इषुभिः सुवर्णपुङ्खैः शतशः शकलीचकार तच्छूरः ।
भूयः सायकमेकं प्रायुङ्क्त प्लवगराजनिधनाय ॥ 57

तेन स विद्धस्तूर्णं क्रोशन्निपपात कम्पयन्वसुधाम् ।
बाण प्रहारपतितं वीक्ष्य सशोकौ गवाक्षगवयौ च ॥ 58

अन्येऽपि कपिवरिष्ठा रक्षोराजाय चिक्षुपुः शैलान् ।
क्षिप्तान् स तैर्महीधरान् बाणैश्छित्वा शिलाशितैर्घोरान् ॥ 59

अविध्यत्तानपि विशिखैरन्यानपि वानरान् बिभेद शरैः ।
ते तेन हन्यमानाः शरणं रामं शरण्यमुपयाताः ॥ 60

दत्वाऽभयं स तेभ्यो धनुर्गृहीत्वा चचाल समराय ।
युद्धाय तं प्रयान्तं लक्ष्मण उपगम्य साञ्जलिरुवाच ॥ 61

आर्य प्रेषय मामिह पर्याप्तोऽहं वधाय यातुपतेः ।
इति लक्ष्मणं वदन्तं रामः परिरभ्य सङ्गरोपायम् ॥ 62

तस्मै निवेद्य सद्यः समरायैनमन्वयुङ्क्त शूरतरम् ।
सौमित्रिमापतन्तं पौलस्त्योऽभ्याययौ शरान् विकिरन् ॥63

मध्ये तयोर्हनुमान् निवार्यमाणो दशास्यमभ्यागात् ।
आसाद्य तस्य स रथं भुजं समुद्यम्य दक्षिणं भीमम् ॥ 64

वित्रासयन्वचोभिस्तमब्रवीत् लोककण्टकं हनुमान् ।
विजितास्त्वया सुरासुरगन्धर्वोरगनिशाचरप्रमुखाः ॥ 65

तेभ्यो भयं न तेऽभूत् अद्योत्पन्नं कपिभ्य एव भयम् ।
इति कथयति कपिवीरे तलेन निजघान तस्य भुजमध्यम् ॥ 66

तेनाऽऽहतोऽपि हनूमान् धैर्यं न जहौ महानुभावतया ।
वक्षस्स्थले सरोषात् जघान रक्षःपतेस्तलेनैव ॥ 67

तेनाऽऽहतो दशास्यश्चचाल भूकम्प इव महाशैलः ।
आश्वास्याथ दशास्यः स बलं प्रशशंस मारुतेस्तीव्रम् ॥ 68

सोऽपि निनिन्द स्वबलं प्रहतोऽपि मया जीवसीति भृशम् ।
भूयोऽपि राक्षसेन्द्र प्रहर प्राणा न ते प्रिया यदि माम् ॥ 69

इति मारुतिं वदन्तं स मुष्टिना दक्षिणेन निजघान ।
स च तस्य मुष्टिपातात् विह्वलतामाप मारुतिर्घोरात् ॥ 70

तस्य प्रहारविवशं नीलस्तमुदीक्ष्य तूर्णमभ्यागात् ।
नीलं तमापतन्तं रक्षोराजः समीक्ष्य रोषेण ॥ 71

प्रतिजग्राह शरौघैः स च तान् हस्तेन वारयामास ।
नीलोऽपि शैलशृङ्गं चिक्षेप दशाननाय शूराय ॥ 72

सोऽपि शकलीचकार क्रोधाविष्टस्तदैतदाशु शरैः ।
महीध्रशृङ्गकल्पं नीलः सूक्ष्मं विधाय निजगात्रम् ॥ 73

ध्वजमकुटचापकोटिषु चचार रक्षःपते रुषं जनयन् ।
तमवस्थितं ध्वजाग्रे गर्जन्तं वीक्ष्य रावणो धीरः ॥ 74

आग्नेयमस्त्रमसृजत्तेन स भुवमाप नैव यमलोकम् ।
नीलं विसंज्ञमाजौ निरीक्ष्य रोषेण लक्ष्मणो धन्वी ॥ 75

अभ्यासदद् दशास्यं सोऽप्यसृजत्सप्त सायकांस्तस्मै ।
सौमित्रिरपि तरस्वी सुवर्णपुङ्खैः शिलाशितैर्विशिखैः ॥76

चिच्छेद तस्य बाणान् सोऽपिरुषा सायकान् ससर्जान्यान् ।
तानपि रामयवीयान् प्रदर्शयन् हस्तलाघवं बलवान् ॥ 77

कुण्डलितचण्डचापस्तूर्णं चिच्छेद कर्णनाराचैः ।
स विसिष्मिये च निकरान् सौमित्रेर्हस्तलाघवं दृष्ट्वा ॥78

हन्तुं दशवदनं तं ससर्ज सोऽपि त्वरान्वितो विशिखान् ।
रक्षः पतिरपि बाणान् सौमित्रेः सायकोत्तमान् छित्वा ॥79

निजघान तस्य निटिले पृषत्कमेकं स्वयम्भुवा दत्तम् ।
विद्धः स तेन वीरः सौमित्रिर्विह्वलः क्षणं स्थित्वा ॥ 80

आश्वास्य तस्य चापं चिच्छेद शरैः प्रभूतसंरम्भः ।
स पुनर्निकृत्तचापं बाणैस्त्रिभिराजधान पौलस्त्यम् ॥ 81

तैराहतः स मूर्च्छां प्राप्य प्रकृतिं क्षणेन समवाप ।
रक्तावसिक्तगात्रो रोषारुणलोचनो दशग्रीवः ॥ 82

हन्तुं लक्ष्मणमाजौ शक्तिं जग्राह दुर्ग्रहामपरैः ।
वक्षसि तया स विद्धः सौमित्रिर्विह्वलोऽपतद्भूमौ ॥ 83

तं विह्वलं तदानीं उद्धर्तुमाययौ दशग्रीवः ।
न शशाक शक्तिमानपि तोलयितुं किं पुनः समुद्धर्तुम् ॥ 84

तं विष्णुशक्तिभरितं विस्मयमगमच्च रावणो नितराम् ।
मनसाऽचिन्तयदेवं गुरवो हिमवन्मुखा अपि भुजाभ्याम् ॥85

मया पुरोद्धृतास्ते नायं चित्रं भुजैश्च विंशत्या ।
शक्तिप्रहारपतितं सौमित्रिं वीक्ष्य *मारुती रोषात् ॥ 86

आसाद्य राक्षसेन्द्रं वक्षोऽस्य जघान मुष्टिना वीरः ।
मुष्टिप्रहारविवशो वक्त्रश्रोत्राद्वमंस्तदा रक्तम् ॥ 87

---

* मारुती रोषात् रुत्वे "रोरीति" रेफलोपे 'ढ्रलोपे' इति दीर्घे प्रयोगः साधुरेव ।

निपपात तं विसंज्ञं दृष्ट्वा मुनयो ययुर्मुदं च सुराः ।
बलवांस्ततो हनूान् सौमित्रिं वीक्ष्य शक्तिहतशक्तिम् ॥ 88

द्रुतमानिनाय धीमान् दोर्भ्यां परिरभ्य राघवाभ्याशम् ।
सौहार्देन च शक्त्या सौमित्रिर्विष्णुशक्तिसम्पन्नः ॥ 89

नितरामवाप लघुतां हनूमतो गुरुतरोऽपि यातुपतेः ।
शक्तिरपि वैधसी सा विष्णवंशतया विमुच्य सौमित्रिम् ॥90

समवाप रावणरथं सौमित्रिस्तत्क्षणात्समुत्तस्थौ ।
तत आश्वास्य दशास्यः शरासनं शत्रुपक्षविजयाय ॥ 91

आदायापरमाजौ निघ्नन् प्लवगान् समाययौ विशिखैः ।
तस्य वधाय चलन्तं मारुतिरुपसृत्य राघवमवादीत् ॥ 92

गात्रमधिरुह्य मामकमेनं शाधीति रावणं रथिनम् ।
इत्युक्तवति हनूमति गात्रं तस्याधिरुह्य चरममसौ ॥ 93

रामो रणाय यातः तं दृष्ट्वा रावणोऽपि दुद्राव ।
तं वीक्ष्य विप्रियकृतं रामो रोषादुवाच परुषाणि ॥ 94

दैवाद् दृष्टिपथं त्वं ममागमस्त्वां इतो न मोक्ष्यामि ।
इति वदति रामभद्रे दशाननारोपितैः शरैर्निशितैः । 95

विव्याध मारुतिं तं वहन्तमाजौ चचाल न च सोऽपि ।
रामो रावणविद्धं वायुसुतं वीक्ष्य राक्षसेन्द्ररथम् ॥ 96

साश्वध्वजं ससूतं शतशः शकलीचकार शरजालैः ।
आदाय शरमथैन्द्रं विव्याध दशाननस्य मध्यभुजम् ॥ 97

तेन स विद्धस्तूर्णं चचाल देवायुधैरभेद्योऽपि ।
मूर्छामवाप सद्यः कराच्च निपपात कार्मुकं चित्रम् ॥ 98

चिच्छेद तस्य मकुटं शितेन रामः ततः क्षुरप्रेण ।
शान्तार्चिषमिव दहनं वान्तविषं सर्पमिव तथाभूतम् ॥ 99

दृष्ट्वा रावणमाजौ दयामनो राघवः प्रशास्याह ।
श्रान्तं समिति भवन्तं न नयामि यमक्षयं शरैस्तीक्ष्णैः ॥100

अनुजानामि ससैन्यं प्रविश पुरीं सायकार्दितोऽसि भृशम् ।
आश्वस्य तत्र भूयो-रथं समारुह्य तूर्णमुपयाहि ॥ 101

उक्त्वेति तेन मुक्ते शोचन् रक्षः पतिर्विवेश पुरीम् ।
भग्ने निवृत्य याते रामशरार्ते निशाचराधीशे ॥ 102

प्रीतिं परामवापुः सहर्षयो देवदैत्यगन्धर्वाः ।
शोचन् प्रविश्य नगरीं रक्षांस्याहूय तत्र मुख्यानि ॥ 103

आख्यत्पराभवं स्वं स्मरन् दशास्यो रघूद्वहस्य शरान् ।
तप्तं तपः सुघोरं व्यर्थमभूत्पद्मसम्भवप्रीत्यै ॥ 104

यदवध्यता सुरौघैः प्राप्ता तु मया नरैरलब्धैव ।
अनरण्येन च शप्तः पुराहमिक्ष्वाकुवंशतिलकेन ॥ 105

उत्पत्स्यते मम कुले कश्चित्त्वां हन्तुमिति सबन्धुसुतम् ।
अशपद्वेदवती च प्रधर्षिता मां पुरा महाभागा ॥ 106

प्रायेण सैव जाता सीता मम हन्त सर्वनाशाय ।
अशपन्मां रजताद्रावुमा च नन्दीश्वरश्च रम्भा च ॥ 107

देववचनं न मिथ्या यथैव शप्तं तथैव मम जातम् ।
तद्यूयमप्रमत्ता भवत पुरीं रक्षत प्लवगभयात् ॥ 108

बोधयत कुम्भकर्णं स राजपुत्रौ हनिष्यति सकीशौ ॥ 109

इत्यार्यारामायणे रावणपराजयो नाम एकविंशः सर्गः ॥

॥ द्वाविंशः सर्गः ॥

अथ रावणेन कथिता निशाचरा दुग्धमांसमधुकुम्भान् ।
सम्भृत्य गन्धमाल्यान्यासेदुः कुम्भकर्णभवनं तत् ॥ 1

शय्या गुहा च तस्यां कनकमयी योजनायता वितता ।
ददृशुस्तत्र शयानं निशाचरास्तं विपक्षमिव शैलम् ॥ 2

तस्य श्वाससमीरणनुन्नास्ते जीर्णपर्णवत्कीर्णाः[1] ।
पक्षं निशाचरवरा विष्टभ्यान्योन्यमग्रतो न्यवसन् ॥ 3

चक्रुस्तस्य पुरस्तात् पिशितान्नानां बहुविधान् राशीन् ।
सर्पिर्दधिमधुकुम्भान् भक्ष्याणि बहूनि किञ्च भोज्यानि ॥ 4

गात्रमपि गन्धसारैर्लिलिपुर्माल्याम्बरैश्च चक्रुरलम् ।
अभ्यन्तरं गुहायाः सुगन्धिधूपैश्च धूपयामासुः ॥ 5

प्राबोधयन् समन्तात् बहुशो भेरीनिनादशङ्खैश्च ।
स्वयमपि समेत्य सर्वे चक्रुः [2]क्ष्वेळांश्च यौगपद्येन ॥ 6

न बुबोध कुम्भकर्णो यदा निशाटैः प्रबोध्यमानोऽपि ।
न्यघ्नन् मुसलभुसुण्ढीगदाभिरेनं ततश्च ते सर्वे ॥ 7

तैरप्यजातबोधे तस्मिन् बहुकुम्भ सम्भृतैस्तोयैः ।
समपूरयन् समन्तात् श्रवसोर्विवरे निशाचराः क्रूराः ॥ 8

एवं बहुप्रकारैर्विबोध्यमानो न स यदा बुबुधे ।
आनीय गजवरांश्च तस्य शरीरेऽथ चारयामासुः ॥ 9

बुबुधेऽथ कुम्भकर्णो मशकैः संस्पृष्ट इव नरः स च तैः ।
परिवृत्य बाहुयुगलं तदा जजृम्भे सशब्दमतिघोरम् ॥ 10

उत्थाय भक्षयित्वा राशीन् पिशितान्नभक्ष्यभोज्यानाम् ।
पीत्वा दधिमधुकुम्भान् द्विसहस्रं मधुघटांस्ततःस पपौ ॥11

---

1. पर्णवच्छीर्णाः ॥ 2. क्ष्वेळ – Noise.

प्रक्षाल्य हस्तवदनं शयनादुत्थाय मेरुशृङ्गनिभम् ।
मूर्ध्ना वहन् किरीटं विभूष्य गात्रं विनिर्ययौ भवनात् ॥ 12

तं वीक्ष्य राक्षसवरं मन्दरमिव तुङ्गशृङ्गमतिभीताः ।
प्लवगाः समन्ततस्ते शरणं रामं शरण्यमुपयाताः ॥ 13

आश्वास्य राघवस्तान् पप्रच्छ विभीषणं क इत्येषः ।
आचष्ट कुम्भकर्णं नाम्ना तस्मै स रावणावरजम् ॥ 14

समिति सुरासुरसङ्घा विजिता विदिशोऽमुनातिसत्ववता ।
सत्वानामपि हननं नित्यं दृष्ट्वा स्वयंभुवेऽकथयन् ॥ 15

आह्वाययत्स राक्षसवर्गं सहसा महीतले धाता ।
ते सर्वेऽपि तदन्तिकं उपयाताः पङ्क्तिकन्धरप्रमुखाः ॥16

आलोक्य कुम्भकर्णं तेषां मध्येऽतिभीषणाकारम् ।
एवं स्वयमपि धाता सन्ततनिद्रो भवेति स शशाप ॥ 17

निपपात तस्य शापात् मृतकल्पः सपदि कुम्भकर्णोऽसौ ।
एनं वीक्ष्य दशास्यः शोकाम्भोधौ ममज्ज मङ्क्षु तदा ॥18

धातारं प्रणिपत्य भ्रातुर्निद्राविधिं ययाचेऽथ ।
एकदिवसप्रबोधः षण्मासादयमिति वरं स ददौ ॥ 19

तेनैष कुम्भकर्णः स्वपिति तदाप्रभृति राम षण्मासान् ।
विजितस्त्वया दशास्यः प्राबोधयदेनं असमये स विभो ॥ 20

इति कुम्भकर्णवृत्तं विभीषणे वदति रावणस्य गृहम् ।
सम्प्राप्य तं प्रणम्य प्रबोधने हेतुमथात्मनोऽप्राक्षीत् ॥ 21

अथानुजस्य वचनं दशानस्तं प्रशस्य बलवन्तम् ।
आख्यत्पराभं स्वं रामात्तस्मै समेधितक्रोधः ॥ 22

श्रुत्वा स तत्परिभवं क्रूरो निःश्वस्य रोषतो दीर्घम् ।
धुन्वन् शिरः प्रतिज्ञामकरोन्महतीं दशाननप्रीत्यै ॥ 23

हत्वाऽद्य सानुजं तं रामं सुग्रीवमपि सह प्लवगैः ।
तच्छोणितमपि पीत्वा पङ्क्तिमुख त्वां प्रमोदयिष्यामि ॥ 24

इत्थं कृतप्रतिज्ञं कुम्भश्रवसं दशाननस्स्तुत्वा ।
विससर्ज सोऽपि निरगात् नगरादुल्लङ्घ्य सालमुत्तुङ्गम् ॥ 25

तं पद्भ्यां प्रतरन्तं प्राकारं वीक्ष्य भीषणाकारम् ।
परिदुद्रुवुः समन्तात् कपयो भीताः कृतान्तमिव घोरम् ॥26

आलोक्य धावतस्तान् वालितनूजो विहस्य वच ऊचे ।
किं धावथ प्लुवङ्गा किमाद्रियेरन् पलयितान् दाराः ॥ 27

यन्त्रं विनिर्मितमिदं भीषयितुं राक्षसैः प्लवङ्गबलम् ।
न तु राक्षसोऽयमिति तान् सकलान् प्रत्याययत्तु तारेयः ॥ 28

वचनं निशम्य तस्य प्लवगा परिवृत्य तरुशिलाहस्ताः ।
योद्धुं तमभ्यगच्छन् गदां गृहीत्वा समाद्रवत् स च तान् ॥29

एकेन कुम्भकर्णो गदाप्रहारेण पञ्च षट् च शतम् ।
अवधीत्प्लवङ्गमवरान् विनिघ्नतो वृक्षशैलपाषाणैः ॥ 30

गदया विभञ्जितास्ते पेतुः क्षोणीतले क्षरद्रक्ताः ।
परशुविनिकृत्तमूलाः पलाशवृक्षा इव स्फुरत्पुष्पाः ॥ 31

वीक्ष्य युधि कुम्भकर्णं निबर्हयन्तं प्लुवङ्गमप्रवरान् ।
वियति स्थितो हनूमान् वृक्षांश्चिक्षेप तदुपरि क्रोधात् ॥ 32

सोऽपि परिगृह्य शूलं शैलानुर्वीरुहान् विभिद्य रुषा ।
क्रौञ्चं गुह इव शक्त्या [1]मारुतिवक्षो बिभेद तेन । 33

तं वीक्ष्य शूलविद्धं नीलो रोषेण शैलमुद्यम्य ।
समुपेत्य सह कपिवरैस्तस्मिन् चिक्षेप तन्महाशृङ्गम् ॥ 34

स च शैलमापतन्तं अशनिकल्पेन मुष्टिना च तदा ।
शकलीचकार विकिरन् ज्वलनकणान् [2]सर्वतःस निपपात ॥ 35

अथ नीलगन्धमादनशरभगवाक्षर्षभाः कपिप्रवराः ।
परितो निजघ्नुरेनं तानपि स तलेन पातयामास ॥ 36

पतितान् कपिप्रवीरान् वीक्ष्य प्लवगाः सहस्रशः शूराः ।
सम्भूय तस्य गात्रं शैलमिवारुरुहुरनूनधैर्यात् ॥ 37

---

1. अत्रेदमुदाहरणमसमञ्जसमिति वक्तव्यं भवति । हनुमतः क्रौञ्चेन कुम्भकर्णस्य च गुहेन साद्दश्योक्तिः कथं युज्यते । मध्यस्था विपश्चितः युक्तमुत्पश्यन्तु ।

2. "सर्वतः" स्थाने "जनयन्" इति अस्तु ।

आरोहतः समन्तात् अमून् समादाय पाणियुगलेन ।
गरुड इव पन्नगवरानगिरद्वेगेन कुम्भकर्णोऽसौ ॥ 38

तस्य प्रविश्य झठरं ते सर्वे गिरिमुहानिभं सहसा ।
वल्मीकादिव भुजगा विनिर्ययुः कर्णनासिकारन्ध्रात् ॥ 39

आदाय कुम्भकर्णः शूलं काल इव दण्डहस्तोऽसौ ।
कपिवाहिनीं प्रमथ्नन् प्रावर्तयतास्र*निम्नगा घोराः ॥ 40

एवं प्रमापयन्तं प्लवङ्गमांस्तं समीक्ष्य सुग्रीवः ।
उत्खाय सानुमन्तं तस्य शरीरे निपातयामास ॥ 41

तेनाहतः स रुष्टः शूलं चिक्षेप सूर्यतनयाय ।
तदपि प्रहृतं स्वभासा विद्योतयदाबभौ तदोल्केव ॥ 42

शूलं तदापतत्तद् वीक्ष्य हनूमान् समेत्य वेगेन ।
करयुगलेन गृहीत्वा जानुन्यारोप्य परिबभञ्ज रुषा ॥ 43

भग्नं समीक्ष्य शूलं सुग्रीवं रक्षताञ्जनेयेन ।
हरयस्तुष्टुवुरेनं हर्षान्निेदुश्च सर्वतः सर्वे ॥ 44

रुष्टः स राक्षसवरः सुग्रीवायाक्षिपद् गिरेः शृङ्गम् ।
तेनाहतो विसंज्ञो निपपातोर्व्यां विदीर्णसर्वाङ्गः ॥ 45

परिदुद्रुवुः समन्तात् पतिते तस्मिन् प्लवङ्गमप्रवरे ।
आश्वास्य मारुतिस्तान् द्रवतो वेगान्निवर्तयामास ॥ 46

---

* अस्र – Blood.

पतितं तमथ गृहीत्वा प्रहृष्टचेता निशाचरेशानः ।
प्रविवेश सपदि लङ्कां प्रकीर्यमाणः समन्ततः पुष्पैः ॥ 47

शिशिरं स राजमार्गं नीतः संज्ञामुपेत्य सुग्रीवः ।
आलोक्य नीयमानं तेनात्मानं ततः स रुष्टोऽभूत् ॥ 48

छित्वा तस्य कराग्रैः कर्णौ नासां दृढैश्च दशनाग्रैः ।
क्षिप्तस्तेन स रोषात् क्षितेः समुत्पत्य राममभ्यागात् ॥ 49

सञ्छिन्नकर्णनासः क्षतजस्रग्वी सधातुनिष्यन्दः ।
शैल इव कालकल्पः पुनरपि योद्धुं समाययौ रोषात् ॥ 50

प्लवगान् निशाचरानपि खादन् परितः सरुधिरगात्रोऽसौ ।
परितश्चार समरे युगावसाने यथा प्रजाकालः ॥ 51

अभितोऽपि हन्यमानाः प्लवङ्गमास्तेन कुम्भकर्णेन ।
रामं शरणमगच्छन् देवा इव दानवार्दिता विष्णुम् ॥ 52

दत्वाऽभयं स तेभ्यः रामो रौद्रास्त्रयोजितं बाणम् ।
विससर्ज तस्य वक्षसि तदाहतस्यापतद्गदास्य करात् ॥ 53

तेनाहतः स वक्षसि रौद्रेणोत्पाट्य भूभृतःशृङ्गम् ।
चिक्षेप राक्षसवरो रामाय रणे धनुःप्रवीणाय ॥ 54

कृतहस्तः स च घोरं समापतद्वीक्ष्य शैलशृङ्गं तत् ।
सप्तभिरशनिनिकाशैः बाणैश्छित्वा न्यपातयद्भूमौ ॥ 55

सन्धाय धनुषि बाणं वायव्यास्त्रेण योजितं रामः ।
चिच्छेद दक्षिणभुजं तस्य तदा सोऽपतत्कपीन् निघ्नन् ॥56

विनदन्निकृत्तबाहुः स सालमुत्खाय वामहस्तेन ।
अभ्यद्रवद्रघुवरं सशृङ्ग इव पर्वतो महाघोरम् ॥ 57

सव्यं भुजं सभूरुहमापततस्तस्य रक्षसो भीमम् ।
चिच्छेद लीलया द्रुतमैन्द्रेणास्त्रेण राघवो रोषात् ॥ 58

तं कृत्तबाहुयुगलं समाद्रवन्तं समीक्ष्य रघुवीरः ।
चिच्छेद तस्य पादौ बाणाभ्यामर्धचन्द्रवदनाभ्याम् ॥ 59

स तदा निकृत्तपादः समाद्रवद्राघवं विदार्यास्यम् ।
रामस्तस्य विदीर्णं वक्त्रं तूणीचकार बाणानाम् ॥ 60

आदाय हेमपुङ्खं बाणमथैन्द्रं महेन्द्रकल्पोऽसौ ।
रामो निकृत्य भूमौ मूर्धानं तस्य पातयामास ॥ 61

निपतत्तस्यसरीरं पर्वतमात्रं भयङ्कराकारम् ।
अनयद्यमस्य सदनं सद्यः कपिरक्षसां सहस्राणि ॥ 62

देवद्विजातिशत्रौ तस्मिन्निहते निशाचरप्रवरे ।
अमराः प्रहर्षमगमन् राघवशौर्येण समुद्यतैः प्रवरैः ॥ 63

इत्यार्यारामायणे कुम्भकर्णवधोनाम द्वाविंशःसर्गः ॥

॥ त्रयोविंशः सर्गः ॥

रामेण कुम्भकर्णं निहतं वीक्ष्याथ राक्षसा भीताः ।
लङ्कां प्रविश्य सहसा रक्षःपतये शशंसुरार्तास्ते ॥ 1

तेषां निशम्य वचनं राक्षसराजो रुरोद दुःखेन ।
तं दुःखितं समेत्य त्रिशिरास्तनयोऽस्य सान्त्वयन्नाह ॥ 2

किं राक्षसेन्द्र रोदिषि पर्याप्तस्त्वं सुरासुरान् हन्तुम् ।
अहमेव दशरथसुतौ समरे हन्तास्मि विसृज मामाशु ॥ 3

त्रिशरसि वदति तदैवं देवान्तकमानुषान्तकौ शूरौ ।
अतिकायोऽपि कुमाराः समरानुज्ञां ययाचिरे पितरम् ॥ 4

सोऽपि चतुरः कुमारान् आलिङ्ग्याशीर्भिरेधयित्वा तान् ।
विससर्ज तेऽपि तस्मै प्रणम्य युद्धाय निर्ययुः सहसा ॥ 5

अथ पुत्ररक्षणार्थं महोदरं रावणो महापार्श्वम् ।
प्रजिधाय तौ च तस्मै प्रणम्य ययतुःसमं तदीयसुतैः ॥ 6

आरुह्य वाहनानि प्रोत्तुङ्गान्यमितवाहिनीसहिताः ।
सह सकलतूर्यघोषैरासेदुः सङ्गरावनिं घोरम् ॥ 7

तान्वीक्ष्य जातरोषाः कपयः शूरास्तरून् समुद्यम्य ।
जघ्नुर्निशाचरांस्तान् तेऽपि च तान् जघ्नुरायुधैर्विविधैः ॥ 8

तुमुले प्रवर्तमाने सङ्ग्रामे कीशरक्षसोर्घोरे ।
आरुह्य तुरगमग्र्यं नरान्तकः कुन्तपाणिरभ्यागात् ॥ 9

मकर इव वारिराशिं प्रविश्य सैन्यं कपिप्रवीराणाम् ।
प्लवगान् सप्तशतानि प्रासेन बिभेद तत्क्षणाच्छूरः ॥ 10

रेवन्तमिव चरन्तं नरान्तकं वीक्ष्य तं हयारूढम् ।
देवा विस्मयमीयुर्वियति क्षोण्यां च राक्षसाः प्लवगाः ॥ 11

हरिभिर्नरान्तकहतैः पतितैः सर्वत्र पर्वताकारैः ।
अपि शोणितापगाभिः सुदुर्गमाऽभूत्तदा रणक्षोणी ॥ 12

प्लवगान्प्रमापयन्तं नरान्तकं वीक्ष्य वालिनःसूनुः ।
समुपेत्य जातरोषस्तमित्यवोचद्दशाननस्य सुतम् ॥ 13

किं *प्राकृत ! प्लवङ्गानेतान्विहंसि नैव शौर्यमिदम् ।
एभिर्मया सह युद्धं कुरुष्व शूरोऽसि यदि पलाशेषु ॥ 14

इत्यङ्गदं वदन्तं नरान्तको वीक्ष्य लोहिताऽपाङ्गः ।
प्लवगान् विहाय कोपात् प्रासं चिक्षेप तस्य भुजमध्ये ॥15

पतितः स वज्रकल्पे वक्षसि भग्नः पपात भूभागे ।
खगपतितुण्डविखण्डितभोगो भोगीव भासयन्नाशाः ॥ 16

---

* अङ्गदवचने प्लवङ्गानां प्राकृतत्वकथनं न शोभावहमिति नरान्तकसम्बोधनतया प्राकृत वर्णमेव युक्तं भाति ॥

स च मुष्टिनाङ्गदस्तं वक्षसि निजघान वज्रकल्पेन ।
तेनाहतो गतासुःक्षितौ पपातोद्वमन् मुखाद्रक्तम् ॥ 17

तस्मिन् हतेऽभिनेदुः कपयो देवर्षयश्च मोदेन ।
रामोऽपि हर्षमाप विसिष्मिये सोऽपि वालिजः सूनुः ॥ 18

तं वालिसूनुनिहतं निरीक्ष्य देवान्तकस्त्रिमूर्धा च ।
रोषान्महोदरश्च प्राप्ताः सह वालिसूनुना योद्धुम् ॥ 19

तानालोकय बलीयान् वालितनूजस्तरुं समुत्खाय ।
देवान्तकाय समरे चिक्षेप महीध्रकोटिसङ्काशम् ॥ 20

वृक्षं तमापतन्तं चिच्छेद तदा शरैस्त्रिशिराः ।
प्राहन् गजाधिरूढो महोदरस्तोमरेण वालिसुतम् ॥ 21

परिघेण कुलिशसदृशा समरे देवान्तकोऽपि निजघान ।
त्रिभिरपि समाहतोऽसौ न विव्यथे वालिनन्दनो वीरः ॥ 22

शूरोऽथ वालिसूनुर्महोदरस्य द्विपं तलेनाहन् ।
स च तत्प्रहारविवशो विनिर्गताक्षः क्षितौ पपात रुदन् ॥ 23

उत्खाय तस्य दन्तं देवान्तकमाजघान तेनैव ।
स च तत्प्रहारविवशश्चचाल भूकम्प इव महाशैलः ॥ 24

आश्वास्याथ सुरारिः परिघेण जघान वानरेन्द्रसुतम् ।
तेनाहतः स पतितो जानुभ्यां तूर्णमुत्पपात बली ॥ 25

त्रिशिरास्तमुत्पतन्तं निशाम्य विशिखत्रयं ललाटतटे ।
निजघानास्य हनूमान्नीलोऽप्यभिजघ्नतुर्निरीक्ष्यैनम् ॥26

नीलोऽथ शैलशृङ्गं त्रिमस्तकायाशु समिति चिक्षेप ।
चिच्छेद सोऽपि शूरः क्षिप्तं तत्तेन सायकैर्निशितैः ॥ 27

आयान्तमाञ्जनेयं समरे देवान्तकोऽन्तकप्रतिमम् ।
आलोक्य परिघपाणिस्तूर्णं प्रत्याययौ महाबाहुः ॥ 28

अथ मुष्टिना हनूमान् आपततस्तस्य वज्रकल्पेन ।
निजघान मूर्धमध्ये तेन गतासुःपपात स क्षोण्याम् ॥ 29

देवान्तके कृतान्तं द्रष्टुं यातेऽथ रोषतस्त्रिशिराः ।
नीलस्योपरि निबिडं सायकनिकरं ववर्ष घोरतरम् ॥ 30

आरुह्य भूधरगुरुं महोदरोऽन्यं महाद्विपं भूयः ।
तस्यैवोरसि बाणान् निशितान् विससर्ज वज्रसङ्काशे ॥ 31

विद्धः स तेन नीलो विशिखैःशैलं ससालमुत्खाय ।
मूर्धनि महोदरस्य न्यपातयत्सिंहवन्नदन् वीरः ॥ 32

क्षिप्तः स तेन सहसा महोदरः सह महाद्विपेनैव ।
निपपात भिन्नमूर्धा क्षतजस्रावी विनिर्गतासुरभूत् ॥ 33

दृष्ट्वा हतं पितृव्यं त्रिशिरा रोषेण चापमादाय ।
मारुतिममोघवीर्यं विव्याध सुवर्णपुङ्खितैर्विशिखैः ॥ 34

अथ मारुतिः सरोषस्तस्मै चिक्षेप भूभृतः शृङ्गम् ।
त्रिशिराः शरैः सुतीक्ष्णैः शतशः शकलीचकार तत्पृथुलम् ॥ 35

व्यर्थं समीक्ष्य शृङ्गं क्षिप्तं शैलस्य वायुजो रोषात् ।
चिक्षेप वृक्षनिकरं तमपि स चिच्छेद सायकैस्तीक्ष्णैः ॥ 36

उत्प्लुत्याथ हनूमान् राक्षसवर्यस्य रथगतानश्वान् ।
विददार वज्रकल्पैर्नखैर्गरुत्मानिवोरगान् रोषात् ॥ 37

अथ शक्तिमुग्ररूपां हनूमते सोऽपि सपदि चिक्षेप ।
तामन्तराऽऽपतन्तीमुत्कृष्याकृष्य स च बभञ्ज बली ॥ 38

भग्नां विलोक्य शक्तिं त्रिशिराः खड्गेन तीक्ष्णधारेण ।
प्रजिधाय वायुजोरसि सोऽपि तलेनास्य मूर्ध्नि रोषेण ॥ 39

स तलप्रहारविवशः क्षोण्यामपतत् विशीर्णसर्वाङ्गः ।
पतितस्य तस्य खड्गं मारुतिराछिद्य घन इव ननाद ॥ 40

तन्नादमसहमानः त्रिशिराः सहसोत्पपात रोषेण ।
उत्पत्य तस्य वक्षः स मुष्टिना मारुतेश्च निजघान ॥ 41

तेनाऽऽहतः स शूरः चुकोप तस्मै भृशं त्रिशीर्षाय ।
पादाहत इव भोगी गर्जंश्चारातिहृदयकम्पाय ॥ 42

उत्पत्याथ सरोषं खड्गेन त्रीणि तस्य शीर्षाणि ।
सकिरीटकुण्डलानि प्रसभमलावीत् सरोरुहाणीव ॥ 43

निहतं मारुतिना तं विलोक्य हर्षेण कपिवरा नेदुः ।
रक्षोगणैश्च [1]शुशुचे विस्मयमीयुः सुरर्षयो गगने ॥ 44

दृष्ट्वा हतं त्रिशीर्षं भ्राता रक्षःपतेर्महापार्श्वः ।
आदाय संयति गदां अभिदुद्राव प्लुवङ्गमान् निघ्नन् ॥ 45

प्लुवगर्षभस्तदानीं ऋषभस्तं रावणानुजं दृष्ट्वा ।
तस्थौ तस्य पुरस्तात् गदया रक्षोऽप्यताडयद्रोषात् ॥ 46

गदयाऽऽहतः कपीन्द्रः क्षतजस्रावी रुषा समाक्रान्तः ।
उत्प्लुत्य तत्करस्थां गदामथाच्छिद्य हरिरिव ननाद ॥ 47

आवर्त्य युधि गदां तां जघान मत्तस्य समिति मूर्धानम् ।
निपपात स च गतासुर्वज्राहत इव महाचलो भूमौ ॥ 48

भ्रातरि दशाननस्य प्राप्ते पञ्चत्वमतिबले मत्ते ।
अभवच्च कान्दिशीकं रक्षोबलमखिलमप्रकम्प्यबलम् ॥ 49

तस्मिन् हते पितृव्ये रथं समारुह्य दिनकरप्रख्यम् ।
अतिकायोऽथ बलीयान् आविरभूत् प्लवगवाहिनीं निघ्नन् ॥ 50

तं वीक्ष्य कुम्भकर्णं मत्वा पुनरुत्थितं महाकायम् ।
कपयोऽपि दुद्रुवुस्ते कालं वीक्ष्य प्रजा यथा कल्पे ॥ 51

दृष्ट्वा तमुरुशरीरं विस्मितचित्तो विभीषणं रामः ।
पप्रच्छ राक्षसवरं कोऽसौ मे ब्रूहि विस्मयाकारः ॥ 52

इति राघवेण पृष्टो विभीषणश्चाब्रवीत् रघुश्रेष्ठम् ।
एष खलु धान्यमाल्यां जातो रघुवीर राक्षसाधिपतेः ॥ 53

---

1. कर्मणि (भावे) लिट्

अमुना जिता बलवता बहुशः सेन्द्राः सुरासुराः समरे ।
अतिबलवानतिकायस्तत्सन्नद्धैरनेन योद्धव्यम् ॥ 54

इति कथयत्यनुरक्ते विभीषणे तं प्रशस्य रघुवीरः ।
आदाय धनुरधिज्यं सज्जो बभूव सान्त्वयन् प्लवगान् ॥55

रक्षो वीक्ष्य सरोषा वानरशूरा द्रुमान् समुद्यम्य ।
कुमुदनलनीलमैन्दद्विविदप्रमुखाः समभ्ययुः सहसा ॥ 56

अतिकायोऽथ बलीयान् आपततस्तान् विलोक्य कपिवीरान् ।
विशिखैर्विचित्रपुङ्खैस्तेषां चिच्छेद करगतान् वृक्षान् ॥ 57

तानपि शरैः स विध्यन् समरे गर्वादवोचदित्युच्चैः ।
योद्धुं मया बलवता शक्तिर्यस्यास्ति सोऽस्तु पुरतो मे ॥ 58

तस्य वचनं सगर्वं श्रुत्वा सौमित्रिरुत्थितो रोषात् ।
तस्थौ तस्य पुरस्तात् स धनुस्त्राणात्समुद्धरन् बाणान् ॥ 59

युद्धाय बद्धचित्तं लक्ष्मणमभिवीक्ष्य विस्मितः सोऽपि ।
आदाय बाणमेकं निशितं तमथाब्रवीद्धनुष्पाणिः ॥ 60

बालोऽसि राजसूनो त्वं सङ्ग्रामक्रमं न जानीषे ।
बहुशो बहूनजैषं समरेष्वमराञ्छतक्रतुप्रमुखान् ॥ 61

अलमेक एव बाणो हन्तुं त्वां सायकैरलंत्वपरैः ।
इति कथयत्यतिकाये क्रुद्धः सौमित्रिरब्रवीदेनम् ॥ 62

राक्षस विकत्थसे किं बालोऽपि पुरा भवामि कालस्ते ।
इति लक्ष्मणे ब्रुवाणे तस्मै स मुमोच करगतं बाणम् ॥ 63

स च चिच्छेद तमिषुणा ततोऽतिकायश्च सायकमन्यं च ।
विससर्ज लक्ष्मणं प्रति तानपि शकलीचकार मध्येऽसौ ॥ 64

कृतहस्तोऽथ तरस्वी सौमित्रिः सायकेन निशितेन ।
विव्याध तस्य निटिले तेन स विद्धः शिखीव विचचाल ॥ 65

रुष्टस्ततः स तस्मिन् विशिखान् विससर्ज सङ्घशो निशितान् ।
तानपि शूरः समरे बाणैश्चिच्छेद लक्ष्मणस्तीक्ष्णैः ॥ 66

वीक्ष्य निकृत्तान् विशिखान् अतिकायो लक्ष्मणेन सत्ववता ।
शरमादाय सुघोरं वक्षो लक्ष्यं चकार तस्यैव ॥ 67

वक्षसि स तेन विद्धो लक्ष्मीवान् राघवानुजः समरे ।
विससर्ज लोहितं बहु मत्तो हस्तीव मदजलं बहुधा ॥ 68

आत्मानमथ विशल्यं कृत्वा सौमित्रिराशुगं घोरम् ।
आदाय हेमपुङ्खमाग्नेयास्त्रेण योजयामास ॥ 69

तेन प्रयुज्यमानं वीक्ष्य तदास्त्रप्रयोगविच्छूरः ।
अतिकायोऽतितरस्वी शरं स सूर्यास्त्रयोजितमकार्षित् ॥ 70

सौमित्रिरपि सुतेजाः शरमाग्नेयं नियोजितं तस्मै ।
विससर्ज सोऽपि बाणं सौरेण नियोजितं तदस्त्रेण ॥ 71

तौ तेजसा ज्वलन्तौ प्रकाशयन्तौ दिशो दश प्रभया ।
घ्नन्तौ परस्परं भुवि पेततुरन्योन्यतेजसा दग्धौ ॥ 72

ऐषीकमथ महास्त्रं विससर्ज दशास्यनन्दनो रोषात् ।
सौमित्रिरपि बलीयान् ऐन्द्रेणास्त्रेण तमपि चिच्छेद ॥ 73

वायव्यमस्त्रमसृजत् सहसा सौमित्रयेऽतिकायोऽथ ।
तदपि समरे तरस्वी वायव्येनैव सोऽच्छिनच्च तदा ॥ 74

स ततोऽतिकायमाजौ शतशो विव्याध सायकैर्निशितैः ।
तस्य कवचे निमग्नाः स्वल्पामपि न व्यथामकुर्वंस्ते ॥ 75

अथ वायुरेत्य लक्ष्मणमभेद्यकवचोऽयमाशरो वीर ।
ब्रह्मास्त्रवध्य एष ब्राह्मेणास्त्रेण जहि दुरात्मानम् ॥ 76

आकर्ण्य वायुवचनं सौमित्रिः सायकं समादाय ।
ब्राह्मेण योजयित्वा तमुग्रमस्त्रेण सन्दधे चापे ॥ 77

विससर्ज तस्य कण्ठं लक्ष्यीकृत्यैव लक्ष्मणः शूरः ।
विनिकृत्य तस्य स शिरः सकिरीटं भुवि निपातयामास ॥ 78

पतितो रराज मूर्धा माणिक्यकिरीटकुण्डलोद्भासी ।
रत्नैर्विराजमानं मेरोःशृङ्गमिव वज्रनिर्दलितम् ॥ 79

हतशेषाः पिशिताशा लङ्कामभ्येत्य राक्षसेन्द्राय ।
त्रिशिरःप्रभृतीन् क्रमशो निहतान् पुत्रान्निवेदयामासुः ॥ 80

इत्यार्यारामायणे त्रयोविंशः सर्गः ॥

॥ चतुर्विंशः सर्गः ॥

अथ निधनं तनयानां भ्रातृवधं चापि रावणो घोरम् ।
श्रुत्वा विषण्णचेता दध्यौ निःश्वस्य दीर्घमुष्णं च ॥ 1

वीक्ष्य पितरं विषण्णं शोकार्णवमग्नमिन्द्रजिच्छूरः ।
आश्वास्येति तमूचे मयि तिष्ठति तात किं विषादेन ॥ 2

हत्वा दशरथतनयौ सुग्रीवं च प्लवङ्गमाध्यक्षम् ।
कपिसेनामपि सकलां तात प्रीतिं तवाशु कर्ताहे ॥ 3

इत्युक्त्वा प्रणिपत्य प्रदक्षिणीकृत्य राक्षसाधीशम् ।
तेन विसृष्टस्तूर्णं रथं समारुह्य खरधृतं निरगात् ॥ 4

निरगुस्तमन्वनेके रथान् समारुह्य राक्षसप्रवराः ।
केऽपि तुरगाधिरूढाः केचन गिरितुङ्गसिन्धुरारूढाः ॥ 5

सह सेनया महत्या समरभुवं प्राप्य शत्रुविजयाय ।
आरभत होममग्नौ परितो रक्षां विधाय रक्षोभिः ॥ 6

वह्निर्जुहृति तस्मिन् हविरादत्त प्रदक्षिणज्वालः ।
तस्माद्रथश्च चापो ब्रह्मास्त्रं मूर्तिमत्समुत्तस्थौ ॥ 7

आरुह्य सपदि स रथं प्रापान्तर्धानममरराजारिः ।
अथ तद्राक्षससेना योद्धुं समवाप वानरानीकम् ॥ 8

तद्वीक्ष्य राक्षसबलं शैलानुद्यम्य वानराश्च तरून् ।
अभिदुद्रुवुः समन्तात् तेऽप्येनान् सायकैः शितैरकिरन् ॥9

रावणिरदृश्यरूपः सुवर्णपुङ्खैः सुतैजसैर्विशिखैः ।
विव्याघ वानरबलं तच्च बलं रक्षसामहन् शैलैः ॥ 10

पुनरेष वानरबलं वियद्गतो हस्तलाघवं प्रथयन् ।
एकेन पञ्च सप्त च नव च दशाष्टौ च पत्रिणा र्बिभिदे ॥ 11

ब्रह्मास्त्रबलसमुत्थैः शस्त्रैः शरशक्तितोमरप्रमुखैः ।
अनयत्कपिप्रवीरान् यमसदनं रावणात्मजो बलवान् ॥12

सुग्रीवाङ्गदमारुतिसुषेणनलनीलजाम्बवत्प्रमुखान् ।
इतरानपि कपिवीरान् समरे तूणीचकार बाणानाम् ॥ 13

इत्थं कपिबलमखिलं निपात्य नक्तञ्चराधिपकुमारः ।
विशिखैर्विचित्ररूपैः समरे विव्याध सानुजं रामम् ॥ 14

निजतनये भुवि पतिते प्लवगैःसह रावणेः शरैर्निशितैः ।
तद्वीक्ष्येव विषण्णो भास्वान्निपपात पश्चिमाम्बुनिधौ ॥ 15

पततः स्वोपरि विशिखान् समीक्ष्य दुष्टोऽद्य यास्यति स्वपुरीम् ।
इति लक्ष्मणं ब्रुवाणो ब्रह्मास्त्रं मानयंस्ततो रामः ॥ 16

विशिखैस्तदीरितैस्तैर्विचेतनो निपपात सानुजःक्षोण्याम् ।
ज्याघोषगर्जितयुतो भूषाद्युतिचञ्चलप्रभाजालः ॥ 17

परितो व्यापनशीलो वानरसेनां ववर्ष शरवर्षैः ।
इत्थं निपात्य बाणैरिन्द्रजिदाजौ रघूद्वहौ शूरौ ॥ 18

कपिसेनामपि सकलां ननाद मृगपतिरिवातिहर्षेण ।
निहताश्च सप्तषष्टिः कोट्यः प्लवगर्षभास्तदेन्द्रजिता ॥ 19

अह्नःक्षये समन्तादन्ये बाणैः कृताश्च निश्चेष्टाः ।
पतितं प्लवङ्गसैन्यं पतितौ च समीक्ष्य दशरथस्य सुतौ ॥ 20

प्रतिपद्य समरकीर्तिं प्रविवेश पुरीं दशास्यभुजगुप्ताम् ।
तस्मिन् रणान्निवृत्ते शरनिचितौ तौ समीक्ष्य दाशरथी ॥ 21

हनुमद्विभीषणौ तौ उल्काहस्तौ विचित्य तु प्रवरान् ।
निहतैर्निपातितैरपि कपिवीरै रणमही समाकीर्णा ॥ 22

अशनिविनिकृत्तपक्षैर्महीधरैरिव तयोरगम्याभूत् ।
ददृशतुरदीनसत्वौ सुग्रीवं वालिनन्दनं वीरम् ॥ 23

अन्यान् कपिप्रवीरान् शरनिचितान् गन्धमादनप्रमुखान् ।
दृष्ट्वा च जाम्बवन्तं शरशतविद्धं सरोषमुपगम्य ॥ 24

पौलस्त्यस्तमपृच्छत् कच्चिद्धारयसि जाम्बन् प्राणान् ।
इति पृष्टस्स च तेन प्रत्यूचे तं शनैःशनैर्वाचा ॥ 25

पश्यामि न च भवन्तं कच्चिद्धारयति मारुतिः प्राणान् ।
इति जाम्बवति शरार्ते पृच्छति कुशलं हनूमतः प्रथमम् ॥ 26

विस्मितमनाः पुनस्तं पप्रच्छ विभीषणो विनीतात्मा ।
तिष्ठति रघुप्रवीरे सुग्रीवे च प्लवङ्गमाध्यक्षे ॥ 27

शूरेऽङ्गदेऽपि किं वा कुशलं पृच्छसि हनूमतः प्रथमम् ।
तिष्ठत्सु तेषु राजसु कुशलप्रश्नस्य हेतुमाचख्यौ ॥ 28

जीवति बलवति यस्मिन् हतमपि कपिसैन्यमहतमेवाजौ ।
यस्मिन्नुज्झितजीवे जीवन्तोऽपि च वयं मृता एव ॥ 29

ऋक्षपतौ निजकुशलं पृच्छति हनुमानुपेत्य विनयेन ।
जग्राह तस्य पादौ स्वनाम कथयन् स शोकवीतात्मा ॥30

साञ्जलिममेयसत्वं विनयानतकन्धरं महाबाहुम् ।
आलिङ्ग्य प्रणमन्तं तुष्टाव तदा च भल्लधौरेयः ॥ 31

पङ्क्तिमुखमानभञ्जन पाथोनिधितरणधुर्य धैर्यनिधे ।
पवनप्रमोदहेतो पालय नस्तूर्णमञ्जनासूनो ॥ 32

आयोधने बलवता निहतं पुरुहूतवैरिणा सकलम् ।
त्वं नाथः कपिसैन्यं जीवय कुरु राघवौ विशल्यौ च ॥ 33

गच्छोत्तरां प्रति दिशं हिमवन्तमतीत्य वृषभशैलं च ।
कैलासरत्नसान्वोरौषधपर्वतमुपेत्य मध्यगतम् ॥ 34

मृतसञ्जीवनकरणी विशल्यकरणी सवर्णकरणी च ।
सन्धानकरणीत्यपि च चतस्र एता वसन्ति तच्छिखरे ॥ 35

तातौषधीश्चतस्रस्त्वमानयाशु प्लवङ्गजीवातो ।
आनीतासु च तासु प्लवगा जीवेयुरपि मृताः समरे ॥ 36

आकर्ण्य कर्णमधुरं कान्तं भल्लूकमल्लसंलपितम् ।
अथ तं प्रणम्य मारुतिरब्धिं तीर्त्वा जगाम हिमवन्तम् ॥ 37

तमतीत्य तुङ्गशृङ्गं कैलासं चापि शङ्करावासम् ।
तस्य च गिरेः स मेरोरोषधिशैलं ददर्श मध्यगतम् ॥ 38

आयान्तमाञ्जनेयं वीक्ष्यौषधयोऽप्यवेत्य तस्य मतिम् ।
भीताश्चतस्र एताः सहसान्तर्धानमतितरामगमन् ॥ 39

ताश्च विचित्य नपश्यन् रोषेण गिरिं सशृङ्गमुत्खाय ।
अभ्याससाद सहसा पवनसुतः पवनवेगमास्थाय ॥ 40

उदयन्तमम्बरतलात् अपरं भास्वन्तमिव हनूमन्तम् ।
वीक्ष्य सहोषधिशैलं विस्मयमगमन् कपिप्रवीरास्ते ॥ 41

अघ्रायौषधिगन्धं सर्वे सुप्तोत्थिता इव प्लवगाः ।
तस्थुर्युधि निहताः शरार्दिताश्चापि विशल्यतामापुः ॥ 42

पौलस्त्यानुजवचनात् प्रत्यहमाजौ निशाचरान् प्लवगाः ।
निहतान् क्षिपन्ति वार्धौ तेषां यादांस्यभक्षयन् देहान् ॥ 43

कृत्वा कपिबलमखिलं सजीवमपि राघवौ विशल्यौ सः ।
शैलं यथापुरं तं संस्थाप्य पुनश्च राममभ्यागात् ॥ 44

इत्यार्यारामायणे चतुर्विंशः सर्गः ॥

॥ पञ्चविंशः सर्गः ॥

सुग्रीवस्तत ऊचे मारुतिमुख्यान् प्लवङ्गमप्रवरान् ।
रात्रौ प्रविश्य सर्वे लङ्कां दहतेति राक्षसेन्द्रपुरीम् ॥ 1

आकर्ण्य तस्य वचनं प्रदोषसमये कपिप्रवीरास्ते ।
उल्लङ्घ्य सालमुन्नतमुल्काहस्तास्ततः पुरीमविशन् ॥ 2

देहुश्च रावणपुरीं दत्वाऽग्निं सर्वतो निशाटगेहेषु ।
तां वीक्ष्य दह्यमानां चक्रुशुरार्ता निशाचरप्रमदाः ॥ 3

कपिनैकेन पुरेयं दग्धा नगरी दशाननाविनयात् ।
अधुना कपिभिरनैकैः प्रदह्यते हा हताः स्म इत्यरुदन् ॥4

अथ राघवौ विशल्यौ चापावादाय चक्रतुर्भीमम् ।
ज्याघोषं तलघोषं घोरं हरयश्च कोटयो हृष्टाः ॥ 5

रामो विलोक्य लङ्कां प्रदाह्यमानां प्लवङ्गमैः प्रबलैः ।
बाणैः सुवर्णपुङ्खैः गोपुरमुच्चैनिपातयामास ॥ 6

अपि च निचखान विशिखान् प्रासादविमानहर्म्यशिखरेषु ।
रोमाञ्चितेव लङ्का सा रेजे राघवस्य शौर्येण ॥ 7

दृष्ट्वा पुरस्य दाहं निपातितं गोपुरं च रामशरैः ।
रक्षःपतिरतिरुष्टो निकुम्भकुम्भौ न्ययुङ्क्त समराय ॥8

तौ कुम्भकर्णतनयौ महता रक्षोबलेन समवेतौ ।
आपतुराहवभूमिं प्लवगास्तौ वीक्ष्य नेदुरतिघोरम् ॥ 9

युद्धं ततो महदभूत् कपिराक्षससेनयोर्महाबलयोः ।
वृक्षैः कपिप्रवीराः जघ्नू रक्षांसि तानि तांश्च शरैः ॥ 10

तुमले प्रवर्तमाने समरे कपिरक्षसां विनाशकरे ।
निघ्नन् कपिप्रवीरान् कुम्भो विशिखैस्तदाचरच्छूरः ॥ 11

तं वीक्ष्य जातरोषो वालितनूजस्तरून् समुत्खाय ।
चिक्षेप तानिषुगणैश्चिच्छेद स च हस्तलाघवं प्रथयन् ॥12

तमपि निशितैः सुबाणैः सुवर्णपुङ्खैरपातयद्भूमौ ।
पतितं वालितनूजं न्यवेदयन् राघवाय कपिवीराः ॥ 13

तद्रक्षणाय रामः सुग्रीवं प्लवगवाहिनीसहितम् ।
प्रजिघाय तमपि कुम्भः प्रतिजग्राह प्रभूतशरवर्षैः ॥ 14

प्रत्युद्ययौ स चैनं वृक्षैः प्लवगेश्वरो महाबाहुः ।
तानन्तरैव बाणैरलुनात् कुम्भोऽपि सम्भृतस्तथैव ॥ 15

वितथान् विलोक्य वृक्षान् प्रभूतरोषोऽभ्युपेत्य सुग्रीवः ।
आच्छिद्य कुम्भहस्तात् बभञ्ज चापं प्रभूतसंरम्भः ॥ 16

उत्क्षिप्य तं कपीन्द्रः शैलमिवोच्चं समक्षिपच्चाब्धौ ।
स्पृष्ट्वा स वारिधितलं पुनपि सहसा समुत्पपात बली ॥17

कुपितोऽभ्युपेत्य कुम्भो वक्षसि निचखान वानराधीशम् ।
सोऽप्यस्योरसि मुष्टिं निपातयामास शैलशृङ्गनिभम् ॥ 18

तन्मुष्टिघातरभसा वमन्नसृग्भूरि वक्त्रतः कुम्भः ।
निपपात विह्वलाङ्गो जनयन् भूकम्पमुद्धतासुरभूत् ॥ 19

भानुतनूभवनिहतं भ्रातरमभिवीक्ष्य युधि निकुम्भोऽथ ।
परिघं परिगृह्य घोरं प्रचरन् समराङ्गणेऽहनत्कीशान् ॥ 20

तेन विनिहन्यमानान् प्लवगान् हनुमान् उदीक्ष्य रोषेण ।
अरुणन्निकुम्भमाजौ वेलेवाम्भोनिधिं महावेगम् ॥ 21

तं वीक्ष्य जातरोषं परिघेणोरसि स तस्य निजघान ।
वक्षसि स वज्रकठिने पफाल शतधाऽस्य वज्रकल्पोऽपि ॥22

रोषात्ततो हनूमान् मुष्टिं परिवर्त्य वज्रसङ्काशम् ।
निजघान तस्य वक्षसि तेन स चकम्प शैलसारोऽपि ॥ 23

स्वस्थः क्षणेन रोषात् दोर्भ्यां जग्राह मारुतिं वीरः ।
आलोक्य तं गृहीतं हर्षान्नेदुर्निशाचराः सर्वे ॥ 24

स गृहीत एव तेन प्रबलामर्षान्निपात्य वेगेन ।
तं मुष्टिना हनूमानात्मानमतो विमोचयामास ॥ 25

भूमौ निपात्य हनूमान् उत्प्लुत्यास्य वक्षसि पपात ।
उदपाटयद् गृहीत्वा पतितश्च शिरश्च बाहुयुगलेन ॥ 26

निहतौ कुम्भनिकुम्भौ बलवन्तौ वीक्ष्य कुम्भकर्णसुतौ ।
रक्षोबलमपि सकलं प्रबलं बभूव कान्दिशीकं तत् ॥ 27

श्रुत्वा कुम्भनिकुम्भौ निहतौ सुग्रीववायुसूनुभ्याम् ।
राक्षसपतिः स रोषात् दन्तान्दन्तैरपीडयन्निबिडैः ॥ 28

तत आहूय स शूरं खरस्य पुत्रं हतस्य रामेण ।
रामं रणे निहन्तुं मकराक्षं प्राहिणोद्विशालाक्षम् ॥ 29

सोऽपि ससैन्यस्तूर्णं विनिर्ययौ रावणं प्रणम्याथ ।
दृष्ट्वा तमापतन्तं रणाय कपयोऽपि दुद्रवुः सर्वे ॥ 30

बभूव सहसा तुमलं कपिरक्षसां महाघोरम् ।
अर्दयतः कपिसैन्यं न्वारयद्राक्षसान् शरै रामः ॥ 31

रामशरजालविद्धान् मकराक्षो वीक्ष्य राक्षसान् सकलान् ।
रोषेण तं तदोचे रामस्योत्पादयन् महाक्रोधम् ॥ 32

तिष्ठ क्षणं पुरो मे हत्वा त्वामाशु खरनिहन्तारम् ।
प्रीत्यै विधिं करिष्ये परलोकगतस्य शोचतो रामम् ॥ 33

इति बहु विकत्थमानं मकराक्षं वीक्ष्य राघवो धीरः ।
तमुवाच जातरोषस्त्वां पितुराशु प्रदर्शयामीति ॥ 34

रघुनन्दनस्य वचनं परुषं खरनन्दनः समाकर्ण्य ।
रोषेण लोहिताक्षस्तस्मै विससर्ज सायकान् घोरान् ॥ 35

तानन्तरैव रामश्चिच्छेद शरैः सुवर्णमयपुङ्खैः ।
मुक्तान् अनेन विशिखान् बाणैष्चिच्छेद सोऽपि मकराक्षः ॥ 36

अथ मकराक्षस्य स रामश्चापं चिच्छेद सायकेन रुषा ।
हत्वा चतुर्भिरश्वान् सूतं च शरेण पातयामास ॥ 37

विरथः स शूलहस्तो रथादवस्कन्द्य भूतले तिष्ठन् ।
पावकशिखाप्रकाशं शूलं चिक्षेप राघवाय रुषा ॥ 38

रामः समापतत् तच्छूलं ज्वालावलीसमाक्रान्तम् ।
त्रिभिराशुगैः सुतीक्ष्णैरच्छिनदपतच्च तन्महोल्केव ॥ 39

वितथं विलोक्य रक्षो मकराक्षः शूलमात्मना क्षिप्तम् ।
आभिदुद्राव स रुष्टो रामं मुष्टिं दृढं समुद्यम्य ॥ 40

रामोऽभिवीक्ष्य रक्षो मकराक्षं नाम तदभिधावदसौ ।
अतिरथमस्त्रमस्मै विससर्ज खरात्मजाय वीराय ॥ 41

तेन स विभिन्नहृदयो निपपात नदन् गतासुरवनितले ।
तं वीक्ष्य वेपमाना निशाचराः प्राविशंस्ततो लङ्काम् ॥ 42

तस्मिन् हतेऽतिवीरे मकराक्षे सिद्धदेवगन्धर्वाः ।
आस्थाय समरमार्गं विस्मितचित्ताः समस्तुवन् रामम् ॥ 43.

निहतं खरस्य सूनुं निशम्य रामेण रावणो रोषात् ।
दन्ताग्निपीड्य दन्तैः शक्रजितं वीक्ष्य वाचमित्यूचे ॥ 44

पुत्र त्वमद्य गत्वा हत्वा रामं सलक्ष्मणं समरे ।
सुग्रीवं च ससैन्यं महतीं प्रीतिं समावह क्षिप्रम् ॥ 45

इति रावणेन कथितः स तथेति वाचं पितुः प्रगृह्याथ ।
सन्तर्प्य यजनभूमौ वह्निं निरगाद्रणाय सैन्येन ॥ 46

आसाद्य समरभूमिं दाशरथी वीक्ष्य चापतूणभृतौ ।
अन्तर्धानगतः सन् स रथस्थः सायकैर्ववर्ष शितैः ॥ 47

ताववलोक्य रावणिं अमुञ्चतां बाणमार्गतो बाणान् ।
निर्लक्ष्यमपि विमुक्तास्तस्य शरीरे समं ततो न्यपतन् ॥48

अथ लक्ष्मणस्तदानीं राममुवाच प्रभूतसंरम्भः ।
ब्रह्मास्त्रेण समस्तं रक्षोवंशं विनाशयिष्यामि ॥ 49

सौमित्रिणा समीरितमाकर्ण्य वचो रघूद्वह उवाच ।
एकस्य लक्ष्मण कृते न बहून् हन्तुं त्वमर्हसि क्रोधात् ॥ 50

आजावदृश्यमानं हन्यामस्त्रेण येन केनापि ।
इत्युक्त्वाऽवरजं तं रावणसुतमन्वियेष हन्तुमनाः ॥ 51

स च राघवस्य वचनं महात्मनो रावणात्मजः श्रुत्वा ।
भीतो रणान्निवृत्तो विवेश लङ्कां दशास्यभुजगुप्ताम् ॥ 52

स ततो विचिन्त्य कृत्यं निरगाद्रोषेण पश्चिमद्वारात् ।
मरुदात्मजप्रभृतयो हरयो नेदुश्च वीक्ष्य तं वीराः ॥ 53

मोहयितुं कपिवीरान् मायासीतां ततोऽधिरोप्य रथम् ।
तां हन्तुमुद्यतासिः प्रादुरभूत्प्लवगवाहिनीमध्ये ॥ 54

तां वीक्ष्य दृष्टपूर्वां विरहावस्थां गतां हनूमान् सः ।
सीता दुरात्नैवं रावणिना हन्तुमिह समानीता ॥ 55

इति चिन्तयन् हनूमान् प्लवगैः सह रावणिं रणे हन्तुम् ।
अभिदुद्राव सरोषस्तं मोहयितुं प्रचक्रमे सोऽपि ॥ 56

असिमुद्यम्य विकोशं क्रोशन्त्या रामलक्ष्मणेति भृशम् ।
मैथिल्याः कपिमध्ये मायामय्याः शिरोऽभिनत्कायात् ॥ 57

मायामयीं स हत्वा मैथिलतनयां महेन्द्रजिद्धिनदन् ।
वीक्ष्याञ्जनातनूजं वियति स्थित एव वाक्यमिदमूचे ॥ 58

विफलः परिश्रमो वः सीता निहता यदर्थमायाताः ।
इति कपिबलस्य मध्ये वदन् प्रहृष्टो ननाद सुरवैरी ॥ 59

इत्युक्तवन्तमेनं मायासीतां च वीक्ष्य तेन हताम् ।
हरयः प्रभूतरोषाः रक्षःसैन्यं व्यनाशयन् भीमम् ॥ 60

मारुतिरथो विशालां शिलां प्रचिक्षेप मेघनादरथे ।
सारथिनास्य रथोऽसौ विधेयवाहेन दूरमपनीतः ॥ 61

अप्राप्य तं शिलापि व्यर्था निपपात भूतले महती ।
हत्वा बहून् पलाशान्निपतन्ती सा विवेश भुवमाशु ॥ 62

हरयस्ततः समस्तास्तरून् गिरीन् अश्म शैलशिखराणि ।
उत्पाट्य रावणिबलं व्यनाशयन् मारुतिं पुरोधाय ॥ 63

तुमुले प्रवर्तमाने समरे हनुमान् निवर्त्य कपिवीरान् ।
रामाय मैथिलीं तां आख्यातुमुपाययौ तथाभूताम् ॥ 64

तस्मिन् रणान्निवृत्ते निकुम्भिलां नाम काननं गत्वा ।
परितो निधाय सैन्यं रावणिरारभत पावके वह्निम् (होतुम्) ॥ 65

आकर्ण्य कलकलरवं रामः कपिरक्षसां रणे घोरम् ।
प्रजिघाय जाम्बवन्तं कर्तुं पवनात्मजस्य साहाय्यम् ॥ 66

मध्येपथं हनूमान् ऋक्षपतिं वीक्ष्य सबलमायान्तम् ।
आवेद्य कृत्यमस्मै तेन सहैवाससाद दाशरथिम् ॥ 67

रावणसुतेन निहता सीता पश्यत्सु पापिनाऽस्मासु ।
इति राघवाय मारुतिराचष्ट प्रबलशोकदीनात्मा ॥ 68

आकर्ण्य तस्य वचनं रामो निपपात मूर्च्छितो भूमौ ।
तादृशमुपेत्य हरयोऽसिञ्चन् अरविन्दगन्धिना पयसा ॥ 69

सौमित्रिरेत्य रामं शोचन् परिगृह्य पाणियुगलेन ।
मूर्च्छामपोह्य विविधैरुपचारैस्तमथ सान्त्वयामास ॥ 70

अथ दिष्ट्या समयेऽस्मिन् विभीषणस्तत्र कपिगुल्मान् ।
संस्थाप्य सह चतुर्भिः सचिवैः समवाप सानुजं रामम् ॥ 71

वीक्ष्याञ्जनोयवचनाद्विषण्णमेनं स सान्त्वयन्नूचे ।
माया रावणिनेयं प्रयोजिता मैथिली तु नैव हता ॥ 72

स कपीन्विमोह्य सर्वान् निकुम्भिलां प्राप्य कपिबलं हन्तुम् ।
परितो विधाय रक्षां होमं वितनोति हुतभुजः प्रीत्यै ॥ 73

आरब्ध एष होमो यदि निर्विघ्नेन परिसमाप्येत ।
हन्तुं न शक्यः सकलैः सुरासुरै रावणी रणे शूरः ॥ 74

उक्त्वेति रामचन्द्रं लक्ष्मणमादाय रावणयवीयान् ।
वालिसुतनीलमारुतिजाम्बवदाद्यैः समन्वितः प्रययौ ॥ 75

समुपेत्य होमभूमिं विभीषणो लक्ष्मणाय वीराय ।
समदर्शयत्प्रवीरं हवनं विदधानममरराजारिम् ॥ 76

आलोक्य लक्ष्मणस्तं विशिखान् विससर्ज तत्र तस्मै सः ।
तानविगणय्य धैर्यात् चकार होमं शचीशपरिपन्थी ॥ 77

आकारमतिमहान्तं मारुतिरास्थाय भूरुहैः शैलैः ।
प्रममाथ राक्षसबलं जाम्बवदाद्याश्च गण्डशैलौधैः ॥ 78

बाणान् लक्ष्मणमुक्तान् कपिभिर्मथितं च वीक्ष्य यातुबलम् ।
रोषेण रावणसुतो विहाय होमं युयुत्सुरभ्यागात् ॥ 79

रथिनं प्रभूतरोषं विविधैः शस्त्रैः कपीन्विनिघ्नन्तम् ।
दृष्ट्वा तमाञ्जनेयो रक्षःसैन्यं व्यनाशयद्धोरम् ॥ 80

तं नाशयन्तमाजौ निजसैन्यं वीक्ष्य रावणी रोषात् ।
मारुतिमथाभ्यधावत्तयोरभूदद्भुतं महद् युद्धम् ॥ 81

मारुतिना सह बलिना युध्यन्तं रावणिं रणे बलिनम् ।
समदर्शयन्महात्मा विभीषणो लक्ष्मणाय शूराय ॥ 82

एष सुरराजजेता बाणैरेनं विचित्रपुङ्खाग्रैः ।
सौमित्रे जहि शीघ्रं सुखिनो लोका भवन्तु निहतेऽस्मिन् ॥ 83

सौमित्रिरिति समीरितमाकर्ण्य वचो विभीषणेन रुषा ।
आदाय चापमग्र्यं सहसा ज्याघोषमातनोद्भीमम् ॥ 84

श्रुत्वा तस्य सुभीमं मौर्वीनिनदं महेन्द्रपरिपन्थी ।
स रथेन भास्कररुचा समासदत् दशरथात्मजं शूरम् ॥ 85

अथ लक्ष्मणस्य सविधे विभीषणं विहितयुद्धसन्नाहम् ।
दृष्ट्वा पितृव्यमेनं परुषाण्यश्रावयच्च तस्याजौ । 86

वाग्युद्धमद्भुतमभूत् प्रथमं लक्ष्मणदशास्यनन्दनयोः ।
पश्चाच्च बाणयुद्धं प्रावर्तत शूरमानिनोरुभयोः ॥ 87

रथिनं रावणिमाजौ मारुतिरालोक्य लक्ष्मणं विरथम् ।
आरोप्य चरमगात्रं रथवत्तमुवाह समरभूमध्ये ॥ 88

रावणसुतोऽथ मुक्तान् बाणान् सौमित्रिणा रणे मुक्तान् ।
विशिखैः सुवर्णपुङ्खैश्चिच्छेद स चास्य निजशरैर्विशिखान् ॥ 89

अथ लक्ष्मणस्तरस्वी विशिखैःशकलीचकार तत्कवचम् ।
चिच्छेद सोऽपि शतधा तत्कवचं रोषाच्छरैस्तीक्ष्णैः ॥ 90

सूर्याचन्द्रमसाविव घनमुक्तौ कवचमुक्तनिजगात्रौ ।
रेजतुरुभौ सरक्तौ सुपुष्पितौ किंशुकाविव प्रवीरौ ॥ 91

विव्याध राक्षसवरो विशिखैर्विविधैस्ततो हनूमन्तम् ।
भल्लेन लक्ष्मणोऽपि चिच्छेद तदीयसूतमूर्धानम् ॥ 92

सूते लक्ष्मणनिहते स्वयमेव चकार समिति सामर्थ्यम् ।
तत्कर्म तस्य दृष्ट्वा विस्मयमगमन् सुरा विमानस्थाः ॥ 93

सारथ्यमपि च कुर्वन् समरे सौमित्रिणा च सहयुध्यंन् ।
रावणिरहीनतेजाः मध्याह्ने भानुमानिव प्रबभौ ॥ 94

तं वर्धमानसत्वं विसारथिं वीक्ष्य रथगतं शूरम् ।
कपयो विषादमगमन् निशाचरा हर्षमापुरत्यर्थम् ॥ 95

बलवानथ प्रमाथी शरभर्षभगन्धमादनाः समरे ।
चत्वारः कपिवीरास्तस्य रथाश्वेषु पेतुरतिरोषात् ॥ 96

बलवत्सु तेषु वाहाः पतत्सु शैलप्रमाणगात्रेषु।
रक्तं मुखाद्वमन्चो गतासवो भूतले समं पेतुः ॥ 97

विरथोऽथ रावणसुतो रथादवस्कन्द्य रक्षसां सैन्यम् ।
योद्धुं निवेश्य कपिभिः प्रविवेश पुरीं रथेन पुनरेतुम् ॥ 98

स ततः प्रविश्य नगरीं सज्जीकृत्याशु रथमुदग्राभम् ।
विनिवेश्य तत्र सकलान्यस्त्राणि विनिर्ययौ पुनर्योद्धुम् ॥ 99

लक्ष्मणविभीषणावपि हरयोऽपि समीक्ष्य रावणिं रथिनम् ।
विस्मयमुपाययुस्ते वीर्यवतस्तस्य लाघवेन भृशम् ॥ 100

रावणसुतोऽथ निशितैरजिह्मगैः क्रूरजिह्मगप्रतिमैः ।
शतशः कपिप्रवीरान् समरक्षोण्यां निपातयामास ॥ 101

ते तेन वध्यमानाः सौमित्रिं शरणमाययुर्भीताः ।
हविषेव वह्निरेनं समीक्ष्य रोषेण स प्रजज्वाल ॥ 102

अथ रावणेः शरासनं चिच्छेद शरेण निशितधारेण ।
सोऽपि शरासनमन्यज्जग्राह रुषा तदप्यसौ व्यलुनात् ॥ 103

तं छिन्नचापयुगलं विव्याधोरसि स पञ्चभिर्विशिखैः ।
ते रावणेः शरीरं भित्वा विविशुर्महीं स्फुरद्रक्ताः ॥ 104

सोऽवमन्य शोणितमादायान्यच्छरासनं सुदृढम् ।
सौमित्रिं शरजालैः विव्याध स चाच्छिनत्ततस्तानि ॥ 105

शाखामृगबलमध्ये प्रदर्शयन्हस्तलाघवं बलवान् ।
सौमित्रिरथ निशाटान् त्रिभिस्त्रिभिः सायकैरविध्यत्तान् ॥106

रावणिसारथिशीर्षं जहार भल्लेन लक्ष्मणोऽथ जवात् ।
प्रबलं तदीयरथ्या विनाथसारथिं रथं समूहुस्तम् ॥ 107

वीक्ष्य पराक्रममाजौ रावणतनयोऽथ लक्ष्मणस्याशु ।
त्रिभिरेनमाशुगवरैर्विभीषणं च त्रिभिश्च विव्याध ॥ 108

भ्रातृसुतेन स विद्धो बाणैःसमरे विभीषणो रोषात् ।
गदया तस्य रथाश्वान् अवधीद्यमदण्डकल्पया शूरः ॥ 109

स रथात्ततो हताश्वात् तूर्णमवप्लुत्य शक्तिमादाय ।
प्रास्यद्विभीषणाय प्रकाशयन्तीं दिशो दश प्रभया ॥ 110

तां शक्तिमापतन्तीं उल्कामिव लक्ष्मणः शरैस्तीक्ष्णैः ।
चिच्छेद कनकपुङ्खैर्दशधा छिन्ना पपात सा भूमौ ॥ 111

शक्तिं समीक्ष्य विहतां शक्रजिद्विभीषणवधाय वेगेन ।
आदाय शरममोघं यमेन दत्तं युयोज कोदण्डे ॥ 112

तं वीक्ष्य लक्ष्मणोऽपि निशितं रात्रिञ्चराधिपेन (पश्य) शरम् ।
समधत्त धनुषि तूर्णं तौ मुमुचतुरेकदैव बाणौ च ॥ 113

अभिहत्य तौ परस्परमाकाशे कालदण्डसङ्काशौ ।
पेततुरमोघवीर्यौ वीक्ष्य हतौ तौ लज्जितावास्ताम् ॥ 114

अस्त्रं वारुणमाजौ ससर्ज सौमित्रिरथ महेन्द्रजिते ।
प्रायुङ्क्त सोऽपि रौद्रं तेन तदस्त्रं महत्तदा निहतम् ॥ 115

आग्नेयमथ महास्त्रं रक्षः प्रायुङ्क्त राजपुत्राय ।
सोऽपि विससर्ज सौरं तयोरभूदस्त्रयोर्महद्युद्धम् ॥ 116

दृष्ट्वा रावणिराजौ आग्नेयास्त्रं च झटिति सौरहतम् ।
रोषादासुरमस्त्रं समरे विससर्ज शत्रुनाशाय ।। 117

उत्पेतुर्युधि तस्मात् शूलगदामुसलमुद्गरासिशराः ।
रौद्रेण तमपि शूरो निपातयामास लक्ष्मणोऽस्त्रेण ।। 118

दृष्ट्वा लक्ष्मणशौर्यं तुष्टा देवाः शतक्रतुप्रमुखाः ।
मुनयः सचारणगणा ररक्षुरेनं रणे शिवैर्वाक्यैः ।। 119

सौमित्रिरपि महात्मा सुवर्णपुङ्खं सुरारिविजयाय ।
शरमादाय मनोहरमैन्द्रेणास्त्रेण योजयामास ।। 120

ऐन्द्रेण योजितं तं शरमुग्रं धनुषि सपदि सन्धाय ।
दृढभक्तिरग्रजन्मनि सौमित्रिरिदं वचस्तदावोचत् ।। 121

यदि भवति सत्यसन्धो धर्मात्मा शौर्यतोऽप्रतिद्वन्द्वः ।
अपि राघवो महात्मा शर जहि सत्येन सुरवरारातिम् ।। 122

उक्त्वेति रामभद्रं ध्यायन् मनसा ससर्ज तं बाणम् ।
स निकृत्य रावणिशिरो निपातयामास कुण्डलोद्भासि ।।123

तं वीक्ष्य लक्ष्मणहतं हरयः सविभीषणा मुदा नेदुः ।
देवाः शतक्रतुमुखाः सहर्षिभिर्हर्षमाश्रयन्नग्र्यम् ।। 124

रक्षांसि वीक्ष्य निहतं लक्ष्मणबाणेन रावणिं समरे ।
भीताः प्रविश्य लङ्कां दशवदनाय न्यवेदयन् शीघ्रम् ।। 125

श्रुत्वा तनूजमाजौ लक्ष्मणनिहतं दशाननः शोचन् ।
सीतां ह्यनर्थमूलां तां हन्यामित्यचिन्तयन्मनसा ॥ 126

इति निश्चित्य स रोषात् सहसा खड्गं विकोशमादाय ।
सीतां निहन्तुकामः प्रययौ यत्रावसन्महीपुत्री ॥ 127

तां हन्तुमेव सीतां यान्तं समुदीक्ष्य रोषताम्राक्षम् ।
मन्त्री सुपार्श्वनामा वाक्यैः सनयैर्निवारयामास ॥ 128

विनिहत्य देवशत्रुं सौमित्रिरथास्त्ररूषितशरीरः ।
विनिवर्त्य कपिबलं तद्विभीषणेनान्वितोऽभ्यगाद्रामम् ॥ 129

अभिवाद्य रामचन्द्रं लक्ष्मीवान् लक्ष्मणः पुरस्तस्थौ ।
अथ लक्ष्मणस्य पौरुषमाख्यत्सविभीषणः प्लवङ्गेशः ॥ 130

अभिहत्य रावणसुतं दिवसैस्त्रिभिरन्तकोपमं समरे ।
सौमित्रिमुपगतं तं रामःपरिरभ्य परिजहौ शोकम् ॥ 131

तत आहूय सुषेणं विभीषणं लक्ष्मणं च कपिवीरान् ।
अचिरात्कुरुष्व विशल्यान् इत्यवदद्राघवः प्रसन्नात्मा ॥ 132

रामाज्ञया सुषेणस्तद्दिव्यौषधं ददौ तदा तेषाम् ।
सद्यस्तेऽपि विशल्याः सर्वे विगतव्रणाश्च समभूवन् ॥ 133

इत्यार्यारामायणे इन्द्रजिद्वधो नाम पञ्चविंशः सर्गः ॥

।। षड्विंशः सर्गः ।।

अथ पुत्रशोकतप्तो दशाननो निःश्वसन् सभां गत्वा ।
आहूय राक्षसबलं दाशरथी हन्तुमादिशत्सकलम् ।। 1

तदाज्ञया ततस्तच्चतुरङ्गोपेतमप्रमेयबलम् ।
रक्षोबलं समस्तं निरगाद्युद्धाय सपदि सन्नद्धम् ।। 2

तुमुलं बभूव युद्धं रक्षःकपिसैन्ययोस्ततःप्लवगान् ।
रक्षांसि जघ्नुरस्त्रैः विशिखैरेतान् गृहीततरुशैलान् ।। 3

हरयोऽपि हन्यमाना रक्षोभिर्भीमकर्मभिः समरे ।
रामं शरणमगच्छन् स चापमादाय सज्यमुत्तस्थौ ।। 4

भास्वानिवाभ्रवृन्दं प्रविश्य रक्षोबलं महद्रामः ।
प्रममाथ मार्गणगणैः प्रबलान् पिशिताशनान् रणे शूरः ।। 5

एकमपि राममाजौ ततस्ततो लाघवेन विचरन्तम् ।
तद्बाणपातभीताः शतशोऽमन्यन्त राक्षसाः शूराः ।। 6

कनकविभूषितदण्डं कोदण्डं राघवेण कुण्डलितम् ।
विकिरदपि बाणनिकरान् चक्रमिवादर्शि निखिलदेवगणैः ।। 7

गान्धर्वमस्त्रमाजौ प्रयुज्य रोषेण राक्षसान् रामः ।
प्रममाथ सपदि सस्रुः शोणितनद्यः समन्ततो घोराः ।। 8

रथिनः पङ्क्तिसहस्राण्यष्टादशदन्तिनां सहस्राणि ।
समरे महति चतुर्दश ससादिनां वाजिनां सहस्राणि ॥ 9

पत्तीनामपि बलिनां द्वे कोटी रक्षसां च शूराणाम् ।
दिवसस्याष्टमभागे हतानि रामेण पुरुषसिंहेन ॥ 10

एवं निहत्य रामो रक्षःसैन्यं स विस्मयापन्नः ।
ऊचे कपिप्रवीरान् प्रबलान् सुग्रीवजाम्बवत्प्रमुखान् ॥ 11

पश्यत मदस्त्रनिहतं रक्षःसैन्यं समन्ततः पतितम् ।
अस्त्रबलमेतदग्र्यं मम वा त्र्यम्बकस्य वा न चान्यस्य ॥12

इति राघवेण कथितं वचनं संश्रुत्य वानरा हृष्टाः ।
चक्रुः सिंहनिनादान् नेदुर्देवाश्च विस्मिता गगने ॥ 13

निहतं निशम्य सैन्यं समरे रामेण शत्रुशमनेन ।
सहसा निशाचरेशो निरगाद्युद्धाय निजबलोपेतः ॥ 14

तं रोषलोहिताक्षं संवीक्ष्य प्लवगवाहिनी सकला ।
तरुशैलशिखरहस्ता विनदन्ती सर्वतोऽभिदुद्राव ॥ 15

तां वीक्ष्य राक्षसेन्द्रो रोषाद्विहसन् रणे महेष्वासः ।
प्रादुरभावयदुग्रं तामसमस्त्रं प्लवङ्गनाशाय ॥ 16

तेनाभिहन्यमाना दुद्राव प्लवगवाहिनी सकला ।
तां वीक्ष्य जातरोषौ शूरावुदतिष्ठतां रघुप्रवीरौ ॥ 17

आनम्य कार्मुके स्वे दिव्ये विष्फार्य शत्रुविजयाय ।
तस्थतुरुदग्रवीर्यौ रक्षोराजस्य वाहिनीप्रमुखे ॥ 18

तौ वीक्ष्य राक्षसेन्द्रो रोषाद्विष्फार्य कार्मुकं दिव्यम् ।
विसृजन्सुवर्णपुङ्खान् विशिखान् वेगेन समभिदुद्राव ॥ 19

सौमित्रिरापतन्तं रावणमुद्वीक्ष्य रोषताम्राक्षम् ।
तेन सह योद्धुकामो राममनुज्ञाय पूर्वमभ्यागात् ॥ 20

सन्धाय धनुषि बाणान् विससर्ज राक्षसेश्वराय शितान् ।
तूर्णं तेन विसृष्टानच्छिनदायोधने दशग्रीवः ॥ 21

युध्यन्तमतिबलं तं समतिक्रम्य प्रभूतसंरम्भः ।
प्रतिजग्राह शरौघै रामं स च सायकैर्दशास्यममुम् ॥ 22

उभयोरद्भुतमासीद्युद्धं विबुधाः सुरौघविस्मयदम् ।
बाणैस्तयोर्विचित्रैः शलभैरिव संवृता दिशः सकलाः ॥ 23

अथ राघवस्तरस्वी रौद्रेणास्त्रेण सायकान्निशितान् ।
अभियोज्य रावणाय व्यसृज्यसृजत्ते तस्य न बिभिदुःकवचम् ॥24

आसुरमथास्त्रमस्मै रामाय ससर्ज राक्षसाधीशः ।
स च संपतितं महास्त्रं निवारयामास पावकास्त्रेण ॥ 25

तस्मिन् हते महास्त्रे मयेन विहितास्त्रमाशु दशकण्ठः ।
विससर्ज तदपि रामो गान्धर्वास्त्रेण वारयामास ॥ 26

एतस्मिन् समयेऽसौ सौमित्रिः सप्तभिः शरैर्निशितैः ।
ध्वजमस्य राक्षसविभोर्बहुधा चिच्छेद रावणोच्छ्रायम् ॥27

एकेन राक्षसपतेः सूतस्य सपदि जघान मूर्धानम् ।
पञ्चभिरशनिनिकाशैर्विशिखैश्चिच्छेद चापमपि चित्रम् ॥28

अथ रोषतो महात्मा विभीषणः स्वां गदां समुद्यम्य ।
नीलाम्बुदप्रकाशान् निजघान रणेऽथ रावणरथाश्वान् ॥29

आस्कन्द्य विनिहताश्वात् अतिरोषेणान्वितो दशग्रीवः ।
उल्कामिव प्रदीप्तां शक्तिं चिक्षेप तूर्णमनुजाय ॥ 30

तां लक्ष्मणस्तरस्वी चिच्छेद शरैस्त्रिभिर्महावेगैः ।
मोघां समीक्ष्य शक्तिं हर्षान्नेदुः प्लवङ्गमाः सर्वे ॥ 31

समुपाददे दशास्यः शक्तिमथान्यां विभीषणवधाय ।
तं लक्ष्मणो रिरक्षुर्विकिरन् बाणान् समन्ततः शत्रौ ॥ 32

तैः कोपितोऽतिमात्रं तस्मै रामानुजाय शूराय ।
तां शक्तिममितशक्तिं चिक्षेप मयेन निर्मितां महतीम् ॥ 33

सा राक्षसेन मुक्ता वक्षोमध्यं विभिद्य सौमित्रेः ।
अपतत् क्षितौ सरुधिरा रक्ता भुजगीव गरुडविक्षिप्ता ॥ 34

स तया विदीर्णवक्षाः क्षोण्यां निपपात लक्ष्मणः सहसा ।
तं वीक्ष्य शक्तिनिहतं रामो विललाप दुःखितो नितराम् ॥ 35

अथ रोषेण महात्मा राजा जग्राह कार्मुकं दिव्यम् ।
क्रुद्धस्य तस्य रूपं रुद्रस्येव व्यदृश्यत युगान्ते ॥ 36

स शरानमोघवीर्यान् दशकण्ठायासृजन्महाघोरान् ।
सोऽपि ततस्तान् विशिखान् निवारयामास सायकैर्निशितैः ॥ 37

शक्तिर्द्विगुणतराऽभूत् क्रोधाविष्टस्य राघवस्य रणे ।
तद्बाणपातभीतो दशाननः सोऽथ निववृते समरात् ॥ 38

तस्मिन् रणान्निवृत्ते रामः परिरभ्य लक्ष्मणं पतितम् ।
विललाप तं विषण्णं प्रहर्षयन्नब्रवीत्सुषेणोऽथ ॥ 39

मा गा राम विषादं न मृतोऽयं लक्ष्मणस्तव भ्राता ।
मुखमस्य सुप्रसन्नं फुल्लपद्ममिव सुप्रभं नितराम् ॥ 40

शीघ्रं गच्छ हनूमन् ओषधिशैलस्य शिखरसंरूढाम् ।
आहर विशल्यकरणीं तया विशल्यः समेष्यति स्वास्थ्यम् ॥41

इत्युक्तमात्र एव क्षिप्रं प्रययौ नभस्वतः सूनुः ।
आनेतुमोषधिं तां यत्र स शैलो निवेशितः स्वेन ॥ 42

ज्ञात्वा तदर्थमेनं व्रजन्तमथ रावणो हनूमन्तम् ।
आहूय कालनेमिं निशाचरं राक्षसेश्वरोऽवादीत् ॥ 43

आनेतुमेष हनुमान् याति पुनश्चौषधीश्चतस्रोऽपि ।
गत्वा त्वमाशु पुरतो विघ्नं कुरु मानसेन वेगेन ॥ 44

ओषधिपर्वतसविधे तिष्ठति सरसी प्रसन्नतोयाढ्या ।
नक्री निवसति तस्यां काचन गृह्णाति देवता अपि सा ॥ 45

त्वं मायया मुनिवरो भूत्वा रोधसि मनोहरे तस्याः ।
कृत्वाश्रममतिरम्यं तिष्ठातिश्तप्रियो विनीतात्मा ॥ 46

प्राप्तं मरुत्तनूजं हन्यास्त्वं मायया महासत्वम् ।
तस्मिन् हते कपिवरे नशिष्यति लक्ष्मणो महाबाहुः ॥ 47

नाशेन लक्ष्मणस्य न भविष्यति राघवोऽपि सहसैव ।
रामस्य तस्य नाशे न भविष्यति वानरेश्वरोऽवश्यम् ॥48

सुग्रीवस्य विनाशो न भविष्यत्यङ्गदोऽपि कपिवीरः ।
तस्याङ्गदस्य नाशे नाशं यास्यन्त्यशेषहरयोऽपि ॥ 49

मन्ये जयो मम महान् भविता त्वं गच्छ शीघ्रमधुनैव ।
अस्मिन् कर्मणि जाते राज्यस्यार्धं तव प्रदास्यामि ॥ 50

इत्युक्तः स च सहसा प्रणिपत्य दशाननं महाबाहुः ।
आस्थाय मानसजवं अथ प्रस्थे समीरमार्गेण ॥ 51

ओषधिपर्वतसविधे सरसीं दृष्ट्वा प्रफुल्लपद्माढ्याम् ।
तत्राश्रममतिरम्यं चकार मायाबलेन मायावी ॥ 52

परिकल्प्य चाग्निहोत्रं जटाधरः कृष्णचर्मपरिवीतः ।
भूत्वा तापसरूपी दीर्घश्मश्रुर्जपन्निवातस्थौ ॥ 53

अथ हनुमानपि वायोः पितुः स तुल्यः पराक्रमे वेगे ।
समुपाससाद शैलं यत्रौषधयो वसन्ति ता दिव्याः ॥ 54

शैलस्य तस्य सविधे हनुमानाश्रममपश्यदतिरम्यम् ।
मायामुनिकृतरूपं वीक्ष्य प्रणनाम तं विनीतात्मा ॥ 55

प्रणतं तमाह स मुनिः कुत आयातः क्व गम्यते भवता ।
विश्रम्य गच्छतु भवान् अभ्यवहृत्येह तोयमपि पीत्वा ॥ 56

कृतकमुनाविति तस्मिन्वदति निजागमनकारणं निखिलम् ।
उक्त्वा मारुतिरस्मै *तोयमयाचीत्पिपासितो नितराम् ॥ 57

श्रुत्वा स तस्य वचनं महत्सरो दर्शयन्नुवाचेदम् ।
तपसां विनिर्मितेऽस्मिन् पीते तोये न तेऽत्र तृप्तिः स्यात् ॥58

आकर्ण्य तस्य वचनं प्रविवेश तदैव तत्सरो हनुमान् ।
तोयमपि पिबति तस्मिन् ग्राही जग्राह दक्षिणं चरणम् ॥ 59

आकृष्य तामथ बली निपात्य तीरे नखैः स तीक्ष्णाग्रैः ।
विददार वज्रकल्पैः वायुतनूजः स विस्मयोपेतः ॥ 60

अथ सा तदैव भूत्वा दिव्यस्त्री वायुनन्दनमुवाच ।
जानीह्यप्सरसं मां विद्युन्मालीति विश्रुता नाके ॥ 61

दिवि परिभूय सुभानुं गच्छन्तीं सोऽशपन्मुनिः कोपात् ।
ग्राही भूय वसत्वं भुवि चिरकालं जलेचरी क्रूरा ॥ 62

---

* तोयमयाचिष्ट पिपासितो . . .

इति दत्वा मम शापं पुनरपि कृपया मुनिस्तदावोचत् ।
हनुमान् वधिष्यति यदा शापान्मोक्षस्तदैव भवितेति ॥ 63

हनुमन्नुपागतस्त्वं दिष्ट्या शापाद्विमोचिता चाहम् ।
प्रीता तवास्मि नितरां रामस्याज्ञां प्रकुर्वतो भक्त्या ॥ 64

एष खलु कालनेमिर्निशाचरो रावणेन दुष्टेन ।
नाशयितुं प्रहितस्त्वां एनं जहि शीघ्रमेव मुनिरूपम् ॥ 65

उक्त्वैवं गतवत्यां तस्यां हनुमान् उदैक्षत निशाटम् ।
भूधरमात्रशरीरं विरूपिणं पञ्चयोजनोच्छ्रायम् ॥ 66

दृष्ट्वा तमुरुशरीरं हनुमान् दशयोजनोच्छ्रयो भूत्वा ।
उत्प्लुत्य तस्य चोपरि निपात्य निजघान तस्य मूर्धानम् ॥67

तेन विदीर्णकपालो निर्गतमस्तिष्कमांसरुधिरोऽसौ ।
निपपात निर्गतासुः वज्राहत इव महाचलो भूमौ ॥ 68

विनिहत्य तं कपिवरो ननाद मृगराडिवातिहर्षेण ।
तस्य निनादमशृण्वन् गन्धर्वाश्चन्द्रशैलसानुगताः ॥ 69

संहृत्य कालनेमिं क्रूरं हनुमान् अथारुरोह गिरिम् ।
गन्धर्वास्तमनु तदा विविधायुधपाणयोऽभ्यधावंस्ते ॥ 70

आलोक्य तानशेषान् आपततश्चाब्रवीद्धनूमान्त्सः ।
किं विघ्नमाचरथ मे रामस्याज्ञाकरोऽहमायातः ॥ 71

तस्यानुजोऽतिबलवान् शक्त्या निहतो दशाननेनाजौ ।
नेतुं विशल्यकरणीं आयातो रामशासनादधुना ॥ 72

यावदुदेति विवस्तान् गन्तव्यं तावदेव तत्र मया ।
यदि विघ्नमाचरथ वः प्रदहेद्रामप्रताप एवाशु ॥ 73

इति वदति मारुतसुते प्रहर्तुमभ्युद्यतायुधाः क्रूराः ।
गत्वा पुनस्तमरुन्धन् गन्धर्वास्ते महाबला रोषात् ॥ 74

आकारमतिमहान्तं कृत्वा तदुपरि निपात्य कपिवीरः ।
निजघान कांश्चन तलैर्वालधिनान्यान्नखैर्द्विजैरपरान् ॥ 75

हत्वा चतुर्दशैवं गन्धर्वान् मारुतिः सहस्राणि ।
आरुह्यौषधिशैलं विशल्यकरणीं ददर्श न विचिन्वन् ॥ 76

दशयोजनानि विततं तच्छृङ्गं पञ्चयोजनोच्छ्रायम् ।
उत्पाट्याथ हनूमान् दोर्भ्यां स्कन्धे वहन्निवृत्तोऽभूत् ॥ 77

आस्थाय वायुवेगं रामं समुपाससाद सहशैलः ।
कपिसेनया महत्या समन्ततः संस्तुतोऽति वीरोऽसौ ॥ 78

उत्थायाथ सुषेणो विशल्यकरणीं ततः समादाय ।
पिष्ट्वा शिलातलेन नस्तः प्रददौ स लक्ष्मणस्य सुधीः ॥79

आघ्राय सोऽपि गन्धं तस्याः सहसा विशल्य उत्तस्थौ ।
तं वीक्ष्य जातहर्षाः कपयो नेदुः सुराश्च गगनस्थाः ॥ 80

एहीति स च सहर्षं लक्ष्मणमुद्वीक्ष्य सादरं रामः ।
परिरभ्य मुक्तशोकः हर्षादश्रु प्रवर्तयामास ॥ 81

तं परिरभ्य तदासौ सौमित्रिं राघवस्तदावादीत् ।
दिष्ट्या वीर भवन्तं मृत्वा पुनरागतं प्रपश्यामि ॥ 82

पञ्चत्वमुपगते त्वयि कोऽर्थो मम जीवितेन सौमित्रे ।
जनकसुतया तया वा किं वा राज्येन किं नु देहेन ॥ 83

इति वदति रामचन्द्रे तमब्रवील्लक्ष्मणोऽतिखिन्नात्मा ।
आर्य ब्रूहि नचैवं कृत्वा तादृग्विधां प्रतिज्ञां त्वम् ॥ 84

सन्तः कृतां प्रतिज्ञां वितथां कुर्वन्ति नैव दाशरथे ।
त्वमपि कृतां प्रतिज्ञां सत्यां कुरु रावणवधेन रघुवीर ॥85

अधुना राक्षसराजः करोति किं सङ्गरान्निवृत्तोऽसौ ।
*इत्युक्तः स च सहसा दूरे ज्ञात्वा पुरस्य वृत्तान्तम् ॥ 86

सत्वरमुपेत्य चास्मै रामाय शशंस रावणोद्योगम् ।
विधिना दत्तवरोऽसौ अधुना देवालयं प्रविश्यासौ ॥ 87

---

* अत्र पद्यार्थे असाङ्गत्यं दृश्यते । इत्युक्तः स चेत्यत्र केनोक्तः इति विषये रामेण इति प्रासङ्गिकतया अर्थकल्पनेऽपि उक्तः कः इत्यत्र ? सत्वरमुपेत्य रामाय शशंसेत्त्रच कर्तृवाचकपदं किं ? लक्ष्मणः इति वक्तुं न शक्यते अननुगतत्वात् । अतः श्लोकोऽयं एवं परिवर्तनीयः इति मन्यामहे – इत्युक्तःसचेत्यर्धस्थाने एवं पाठः –

'रामेणेत्थं कथितो विभीषणोऽवेत्य नागरीं वृत्तिम् ॥' इति ॥

रक्षोभिः कृतरक्षो यागं वितनोति रुद्रसन्तुष्ट्यै ।
पूर्णे कर्मणि तस्मिन् जेतुमशक्यो द्विसप्तलोकस्थैः ॥ 88

अतो यातयास्य विघ्नं वानरवीरैर्महाबलैः सहसा कर्तुम् ।
उक्त इति तेन रामो वानरमुख्यान् दशाङ्गदप्रमुखान् ॥ 89

आज्ञापयत्स सैन्यान् होमं नाशयत रावणस्येति ।
अथ राघवस्य वचनात् अङ्गदमारुतिगवाक्षगवयाश्च ॥ 90

शरभश्च गन्धमादनसुषेणनीलर्क्षमाल्यवत्प्रमुखाः ।
एते कपिप्रवीराः स्वबलैः सहिताः प्रतस्थिरे धीराः ॥ 91

उल्लङ्घ्य सालमुच्चं विविशुर्लङ्कां निशाचरैर्गुप्ताम् ।
देवालये वसन्तं परितो रक्षां विधाय रक्षोभिः ॥ 92

जुह्वतमिद्धे वह्नौ ददृशुस्ते रावणं सपत्नीकम् ।
आलोक्य तान् कपिवरान् निशाचरा युद्धदर्मदास्त्वरया ॥ 93

अभ्यद्रवन् समन्तात् उदायुधाः भूरिक्रूरवाग्घोषाः ।
अथ युद्धमद्भुतमभूत् कपिरक्षसां सेनयोर्महाबलयोः ॥ 94

वीरवरभीतिजननं देवासुरसेनयोरिवान्योन्यम् ।
तुमुले प्रवर्तमाने समरेऽपि रक्षसां विनाशकरे ॥ 95

रोषाद्धालितनूजो रावणमासाद्य भीषणमुवाच ।
पार्श्वस्थितां तवेमां भार्यां मन्दोदरीं नयामीह ॥ 96

मुष्णन्ति नैव शूरास्त्वमिव वने मैथिलीं दशग्रीव ।
या शक्तिरस्ति भवतस्तामास्थायेह तिष्ठ पुरतो मे ॥ 97

तव मूर्ध्नि वामपादं निधाय भार्यां नयामि तेऽद्यैव ।
आकर्ण्य तस्य वचनं तेनाकृष्टां विलोक्य निजकान्ताम् ॥ 98

उत्थाय मुष्टिना तं मूर्ध्नि निजघान रावणो रोषात् ।
वीरोऽथ वालिसूनुर्लाङ्गूलेनाभिहत्य दशकण्ठम् ॥ 99

उदपतदम्बरतले महतीमादाय तस्य रथशक्तिम् ।
अथ केचन प्लवङ्गाः सुमनोबर्हिर्हवींषि जलकुम्भान् ॥ 100

परितो विकीर्य पादैर्वह्निं निर्वाप्य खं समुत्पेतुः ।
कपिभिर्विकृष्यमाणा पतिता मन्दोदरी ततो दीना ॥ 101

रावणमुवाच रुदती किं मां कृष्टां न पश्यसि प्लवगैः ।
धर्ममवमत्य भवता परवनिता रावण *त्वयापहृता ॥ 102

प्राप्तं तत्फलमधुना भवता मां पश्य कपिभिराकृष्टाम् ।
जीवन्ति जगति सन्तः स्वजाश्रितपुत्रमित्रदारार्थम् ॥ 103

एतान्विनाशय सर्वान् किं वा ते जीवितेन राज्येन ।
धर्मं निरस्य भवता भ्रातुर्वाक्यं न च श्रुतं न च मे ॥ 104

---

* मन्दोदर्या इदं रावणनामनिर्देशपूर्वकं वचनं असङ्गतमिव भाति । अतः एवं भवितुमर्हति - "धर्ममवमत्य भवता परवनिता वीर यत्त्वयापहृता । प्राप्तं तत्फलमधुनेत्यादि ।"

*तेनेयं दुखस्था हा हन्तोत्तिष्ठ संहराशु रिपून् ।
इति दुःखितां स रुदतीं भार्यामाश्वास्य रावणो वाक्यैः ॥105

स्वपराक्रमं प्रशंसन् उदतिष्ठद्रोषभीषणः सहसा ।
अथ रावणस्तरस्वी पुनरपि युद्धाय क्लृप्तसन्नाहः ॥ 106

समुपाजगाम शीघ्रं रणक्षितिं यत्र दशरथस्य सुतौ ।
रथिनं पङ्क्तिमुखं तं विरथं रघुनन्दनं विलोक्येन्द्रः ॥ 107

विनिबर्हणाय ततोऽसौ स्वरथं प्रजिघाय राघवाय तदा ।
आस्थाय मातलिरथो स्यन्दनमिन्द्रस्य सध्वजं साश्वम् ॥108

प्राप प्रतोदपाणिः काकुत्स्थं रावणेन युध्यन्तम् ।
श्रुत्वा(दृष्ट्वा) प्रणामपूर्वं समारुरोहाथ राघवः स रथम् ॥109

अथ युद्धमद्भुतमभूत् उभयोः पौलस्त्यदशरथात्मजयोः ।
जयशब्दपूरितदिशोरस्त्रैरस्त्राणि निघ्नतोर्बलिनोः ॥ 110

देवा जयेति रामं दैत्याश्च जयेति वियति पौलस्त्यम् ।
ऊचुस्तदोभयेषामुभयोर्विजय इति पक्षपातोऽभूत् ॥ 111

उत्पाता अपि बहवो भौमा दिव्या युगान्त इव जाताः ।
तानविगणय्य रोषाद्युयुधाते रामरावणौ शूरौ ॥ 112

---

* "तेनावलेक युगळं नेष्टमिहोत्तिष्ठ संहराशु रिपून्" - इति स्थाने च सङ्गतार्थं तया पद्यं परिवर्तितम् ।

अथ शूलमशनिकल्पं धनदयवीयान् रणे समादाय ।
चिक्षेप घणघणायितघण्टं रामाय रुद्रकल्पाय ॥ 113

त्वरया समापतदसौ शरैरवार्यं दशाननप्रहितम् ।
निजघान शक्रशक्त्या रथस्थया राघवोऽपि तच्छूरः ॥ 114

विनिपात्य तस्य शूलं रामोऽश्वान् सायकैः शितैर्विध्वा ।
विव्याध तमपि सोऽपि क्षरदसृजाऽशोकवृक्ष इव फुल्लः ॥ 115

रामशरविद्धगात्रो रक्षोराजो विषादमधिगम्य ।
चुक्रोश राघवस्य व्यथितःसन् तेजसा रणे महता ॥ 116

दृष्ट्वा विषण्णमेनं रक्षोराजं स लक्षणैर्ज्ञात्वा ।
सारथ्यकर्मनिपुणः सूतोऽस्य रथं निवर्तयामास ॥ 117

समरे निवर्तिताश्वं रथं समालोक्य झटिति सव्रीळः ।
प्राप्य नवां परिभूतिं पौलस्त्यः सारथिं तमित्यूचे ॥ 118

भीतः किंनु रणात्त्वं किं वाप्युपजापितोऽसि रामेण ।
यदि वा स्मरसि गृहाणां रथमेनं किं न्यवर्तयः समरात् ॥ 119

स च रावणं तदानीं प्रत्यूचे नैव सङ्गराद्भीतः ।
उपजापितोऽस्मि न रिपुणा स्मरामि नैवाहमपि गृहान् राजन् ॥ 120

वैक्लव्यं तव दृष्ट्वा शत्रोर्हर्षं च नीतिमवलम्ब्य ।
श्रेयोऽर्थी तव कामं कालज्ञः स्यन्दनं निवर्तितवान् ॥ 121

आकर्ण्य तस्य वाक्यं प्रीतो दशकन्धरः प्रशस्यैनम् ।
विनिवर्तयेति स रथं तस्मै करभूषणं ददौ दिव्यम् ॥ 122

आदाय भूषणं तन्माणिक्यमरीचिराजिविच्छुरितम् ।
आश्वास्य रथगताश्वान् शनकैः स रथं निवर्तयामास ॥123

समररहितेऽन्तरेऽस्मिन् कुम्भजनिः प्राप्य गगनमार्गेण ।
रामं रथाधिरूढं प्रेम्णा तमुवाच सत्कृतस्तेन ॥ 124

आदित्यहृदयसंज्ञं स्वीकुरु मत्तो जयावहं स्तोत्रम् ।
उक्त्वेति मुनिरमुष्मै विजयदमुपदिश्य रणस्थलात्प्रययौ ॥125

अथ रावणश्च रोषाद्रयेण तीव्रेण सन्निवर्त्य रथम् ।
अभ्याससाद रामं पतङ्ग इव पावकं स्फुरद्रूपम् ॥ 126

रामः समीक्ष्य स रथं राक्षसराजस्य सपदि नीलाश्वम् ।
मातलिमुवाच मतिमान् अपसव्यं चोदयेति दिव्यरथम् ॥127

स तथा चकार सारथिरिन्द्रस्य जयाय राघवस्य रणे ।
आसंस्तदा निमित्तान्यरातिनाशाय रामविजयाय ॥ 128

अथ युद्धमद्भुतमभूत् उभयोः काकुत्स्थदेवकण्टकयोः ।
मृगराजयोरिव वने प्रमत्तयोर्बलवतोरतित्वरयोः ॥ 129

अथ राघवः क्षुरप्रं क्षिप्रं सन्धाय धनुषि शितधारम् ।
चिच्छेद राक्षसपतेः शीर्षं पश्यत्सु देव दैत्येषु ॥ 130

श्रीमत्किरीटसुभगं मणिकुण्डलशोभमानगण्डयुगम् ।
निपपात तत्पृथिव्यां युगक्षये बिम्बमिव रवेर्गगनात् ॥ 131

छिन्नेऽपि तस्य शीर्षे पुनरप्यन्ये शिरस्यथोत्पन्ने ।
तदपि निचकर्त रामः शितधारेणाशुगेन केनापि ॥ 132

एवं शरैः शिताग्रैरेकादशवारमरिशिरो रोषात् ।
चिच्छेद रामचन्द्रः पश्यत्सु विस्मितेषु देवेषु॥ 133

न मृतं विचित्रचरितं कृत्तेष्वपि मस्तकेषु पङ्क्तिमुखम् ।
दृष्ट्वा विषण्णचित्तं रघुवीरं मातलिस्तदाऽवादीत् ॥ 134

हन्तुं राक्षसराजं शस्त्रैरन्यैर्न शक्यते समरे ।
ब्रह्मास्त्रवध्य एव त्रिदशाः कथयन्ति सदसि शतमन्योः ॥ 135

तस्माज्जहि सुरशत्रुं ब्रह्मास्त्रेणैव रामचन्द्राशु ।
इति वदति शक्रसूते ब्रह्मास्त्रं धनुषि सन्दधे रामः ॥ 136

अस्त्रे प्रयुज्यमाने ब्राह्मे रामेण रावणवधाय।
वसुधा चचाल वेगाच्छैलैः क्षुभितैस्तदार्णवैर्जज्ञे ॥ 137

अस्त्रेणानेन रामो दशास्यवक्षो बिभेद दिव्येन ।
स शरो विभिद्य हृदयं दशाननस्याप पुनरपि निषङ्गे ॥ 138

चापः पपात पूर्वं गतायुषस्तस्य रथगतस्य करात् ।
पश्चात्पपात कायः स्यन्दनाच्छैलसन्निभो भूमौ ॥ 139

तस्मिन् हते दशास्ये शेषा विविशुर्निशाचरा नगरीम् ।
निपपात पुष्पवृष्टिः मुक्ता देवैः समन्ततो गगनात् ॥ 140

गम्भीरघोषमिश्रं दिशिदिशि दुन्दुभयः समन्ततो नेदुः ।
विबुधा विहाय शङ्कां शक्रप्रमुखाः प्रतुष्टुवू रामम् ॥ 141

चक्रुः सिह्म निनादान् कपयः सर्वेऽपि मारुतिप्रमुखाः ।
*सरितस्ततः प्रसन्ना मन्दं मन्दं ववौ च पवमानः ॥ 142

भानुश्च सुप्रभोऽभूज्जज्वलुरग्नयो विना धूमम् ।

इति आर्यारामायणे षड्विंशः सर्गः ॥

॥ सप्तविंशः सर्गः ॥

विशिखैर्विभिन्नहृदयं विनिर्गतासुं विकीर्णकेशभरम् ।
वीक्ष्याग्रजमथ वीरं विललाप विभीषणो विषण्णमनाः ॥1

विक्रान्त विनयवसते विभवैर्विख्यात विष्टपत्रितयैः ।
हा हन्त रजसि शेषे महार्हशयनोचितोऽपि दैववशात् ॥ 2

---

* एतत्पद्यार्थः सपशतीतृतीयचरित्रावसाने शुम्भवधान्ते प्रोक्तश्लोकस्थितिं अनुकरोति ।

पतितः किं भुविभास्वान् पङ्कनिमग्नोऽथवाभ्रमातङ्गः ।
छन्नः किं तमसेन्दुः शीर्णः कुलाचलः कुलिशनिर्भिन्नः ॥ 3

विश्वासधूमराजिः शौर्योदग्रतरहेतिरुद्दामः ।
दशवदनहव्यवाहो निर्वापित एव रामजलदेन ॥ 4

प्रज्ञाप्रवालशाली मानप्रसवो महातपोमूलः ।
दशमुखमहाद्रुमोऽयं भुग्नो रघुवीरसिन्धुरेन्द्रेण ॥ 5

कथितं मयाग्रज पुरा तदिदं प्राप्तं तवाधुना सकलम् ।
मदनशरपीडितानां हितमपि वाक्यं मनो न गृह्णाति ॥ 6

क्व गतो तव प्रहस्तः क्व गतो वा शक्रजिन्महाशूरः ।
क्व गतः स कुम्भकर्णः क्व गता देवान्तकातिकायमुखाः ॥7

वचनैः सहेतुकैरथ दृष्टार्थैरपि तत्र विलपन्तम् ।
शोकाकुलं विभीषणमित्थमवोचद्रघूद्वहो धीमान् ॥ 8

निहतं समीकभूमौ मनीषिणस्तत्र धर्मसंयुक्ताः ।
शोचन्ति न खलु शूरास्तस्मात्पौलस्त्य मुञ्च शोकमिमम् ॥9

बहुशः शतक्रतुमुखान् दिक्पालानजयदद्वितीयोऽसौ ।
तत्तादृशे विधिबलात्प्राप्ते कालवशमत्र किं शोकैः ॥ 10

शूराः केचन समरे कदाचिदहितान्विनाशयन्ति सखे ।
हन्यन्ते स्वयमपि तैस्ततो जयो जगति कस्य नित्यः स्यात् ॥11

अस्य परलोककृत्यं विभीषण त्वं विधेहि विधिपूर्वम् ।
इति वदति रामचन्द्रे पुनरप्यूचे विभीषणः शोचन् ॥ 12

संस्कर्तुं मृतमेनं राममयाचत भयान्वितोऽनुज्ञाम् ।
अथ रावणस्य निधनं निशम्य तस्य स्त्रियोऽतिशोकार्ताः ॥13

निरगुस्तदा नगर्या निवार्यमाणा निशाचरैर्वृद्धैः।
क्रोशन्त्य इव कुरर्यो विलपन्त्यः पांसुविप्रकीर्णकचाः ॥14

हतयूथपा वशा इव भग्नोपघ्ना लता इव बभूवुः ।
समरभुवमेत्य सहसा समीक्ष्य निजकान्तमन्तकाक्रान्तम् ॥15

रुरुदुः परीत्य दुःखात् अभिनिघ्नन्त्यः स्तनान्तरं सकलाः ।
सिक्तेषु रक्तपूरैः सङ्गरभूरेणुधूसरेषु तदा ॥ 16

अङ्गेषु तस्य शोकात् अपतन् छित्वा लता इव प्रमदाः ।
काचित् प्रगृह्य चरणं रुरोद दुःखात् निशाचराधिपतेः ॥17

काचिदवलम्ब्य मध्यं काचित्कण्ठं च बाहुयुगलेन ।
काचिदवलोक्य वदनं रक्षोराजोरसि मोहमापन्ना ॥ 18

आदाय करसरोजं समर्पयामास काचिदीक्षणयोः ।
स्वाङ्के निधाय पत्युर्वदनं काचित् विलोक्य विललाप॥ 19

काचिद्बाष्पैरसिञ्चद्वदनं कमलमिव हिमकणै रजनी ।
तस्य प्रधानमहिषी निपत्य तदुपरि नितान्तशोकार्ता ॥20

विललाप वेपमाना विकीर्णकेशा प्रसार्य बाहुयुगम् ।
हा कान्त हा महाबल हा लङ्कामल्ल हा महावीर ॥ 21

हा विजितवासव विभो हा राक्षसराज हा हतास्मि भृशम् ।
भो नाथ किं व्यवसितं सीतामभिकाङ्क्षता त्वया मनुजाम् ॥22

अन्तः पुरे त्वदीये तिष्ठन्तीष्वङ्गनासु दिव्यासु ।
दाक्षिण्येन च कुलेन रूपेण च सा मयाऽधिका किन्नु ॥23

मत्सदृशी किमिव तस्यां किं वा सक्तोऽसि राक्षसाधिपते ।
निहता येन निशाटा दूषणमुख्या पदातिनैकेन ॥ 24

सेतुः कृतश्च जलधौ सोऽयं मनुज इति कथमिवाज्ञासीः ।
त्यक्त्वाऽन्तःपुरमन्यं प्राप्तायै पादचारतो देशम् ॥ 25

किं वा न कुप्यसि त्वं मह्यं परिकीर्णकेशपाशायै ।
प्रापद्यदा हनूमान् लङ्कां देवैरपीक्षितुमशक्याम् ॥ 26

तत्प्रभृति राक्षसविभो भयान्वितं मामकं मनो जातम् ।
शक्रादयो दिगीशास्तव पुरतःस्थातुमपि न शक्तास्ते ॥ 27

मनुजः कथं नु शक्तो हन्तुं त्वां समिति राक्षसाधिपते ।
विष्णुः स एव साक्षात् मनुष्यतां प्राप्य साकममरगणैः ॥28

अङ्गीकृतकपिरूपैर्व्यनाशयत्त्वां विभो स्वयं वीर ।
मातामहेन च मया विभीषणेनापि कुम्भकर्णेन ॥ 29

उक्तं त्वया श्रुतं चेत् न भवेदेतादृशी दशा नाथ ।
सुकृतेऽति सौख्यमितरे दुःखमतीव प्रथाऽधुना स्पष्टा ॥ 30

प्राप्तो विभीषणः सुखमधुनाऽवस्था त्वयेदृशी प्राप्ता ।
पञ्चेन्द्रियाणि पूर्वं विजित्य वीर त्वया जिता लोकाः ॥ 31

अधुना स्मरद्भिरिव तैस्तद्वैरं राक्षसेन्द्र विजितोऽसि ।
रोहिण्यरुन्धतीभ्यां अप्यधिकां जलनिधिशैलतनयाभ्याम् ॥ 32

आकाङ्क्ष्य हन्त सीतां रक्षोऽधिपते त्वया कृतं किं वा ।
इति बहु विलप्य करुणं प्रधानमहिषी नितान्तशोकार्ता ॥ 33

मूर्छामवाप महतीं निपत्य रक्षोऽधिपस्य भुजमध्ये ।
सौदामिनीव रेजे सन्ध्यारागाभिरञ्जिते जलदे ॥ 34

वित्रुटितहारमालां विकीर्णकेशां तदा सपत्न्योऽन्याम् ।
आश्वासयन् रुदन्त्यो रुदतीमुत्थाप्य पाणियुगलेन ॥ 35

जानासि देवि न हि किं लोकस्थितिरध्रुवेति महितगुणे।
राज्ञां महात्मनामप्यचिरांशुरिवाशु चञ्चला लक्ष्मीः ॥ 36

ताभिरिति कथ्यमाना निःशब्दं सा रुरोद शोकेन ।
वक्षोजकुम्भयुगलीं स्नपयन्ती नयनसलिलपूरेण ॥ 37

एतस्मिन्नथ समये विभीषणं वीक्ष्य राघवोऽवादीत् ।
कुरु पारलौकिकविधिं भ्रातुस्तव ता निसर्गशोकार्ताः ॥38

इति वदति रामभद्रे विचार्य युक्त्या विभीषणो नितराम् ।
तस्यानुवृत्तिवचनं न जगाद तदा निवार्य निजशोकम् ॥ 39

सन्त्यक्तनीतिमघृणं परहिंसाबद्धकृच्छ्रमतिघोरम् ।
परदारसक्तचित्तं संस्कर्तुं राम नाहमुद्युञ्जे ॥ 40

सकलजगदहितकारी सहजो भ्रातापि मम महान् शत्रुः ।
पूज्योऽपि गुरुरपि विभो दशकण्ठो राम नार्हति सपर्याम् ॥41

श्रुत्वा स तस्य वचनं धर्मज्ञो राघवः परं प्रीतः ।
विनयान्वितं तदानीं विभीषणं वीक्ष्य वाक्यमिदमूचे ॥ 42

अतिबलवानतिशूरः कदाचिदपि समिति वासवप्रमुखैः ।
अपराजित इति लोके महती खलु कीर्तिरस्य यातुपतेः ॥43

मरणान्तं खलु वैरं यथा तवायं तथैव मम बन्धुः ।
कुरु पारलौकिकविधिं तस्येति ददौ रघूद्वहोऽनुज्ञाम् ॥ 44

एतन्निशम्य वचनं विभीषणोऽभ्येत्य राक्षसाधीशम् ।
रुदतीर्निवार्य वनिताः विधिवत्संस्कारमातनोद् भ्रातुः ॥45

सान्त्ववचोभिः सकला रमणीः स निवर्त्य रावणयवीयान् ।
तस्मादुपेत्य सहसा राघवपार्श्वे कृताञ्जलिस्तस्थौ ॥ 46

रामोऽपि राक्षसेन्द्रं हत्वा साकं समस्तसेनाभिः ।
प्रीतिं परां प्रपेदे वृत्रं हत्वा यथा शचीनाथः ॥ 47

देवाः सचारणगणा वासवमुख्या विमुक्तशोकास्ते ।
जग्मुस्ततः प्रहृष्टास्त्रिविष्टपं राघवं प्रशंसन्तः ॥ 48

मातलिरपि प्रहृष्टो राममभिष्टुत्य तद्विसृष्टःसन् ।
आदाय रथमथैन्द्रं जगाम सहसा पुरन्दराभ्यर्णम् ॥ 49

अथ राघवो महात्मा गाढं परिषस्वजे रवेःसूनुम् ।
सौमित्रिचोदितः सन् सेनानिलयं जगाम च प्रीतः ॥ 50

इत्यार्यारामायणे सप्तविंशः सर्गः ॥

॥ अष्टाविंशः सर्गः ॥

निर्वर्त्य देवकार्यं प्रतियाते मातलौ प्रसन्नमुखे ।
अथ राघवः प्रहृष्टं लक्ष्मणमित्यब्रवीत्प्रसन्नात्मा ॥ 1

आदाय सच्चरित्रं सौमित्रे रावणानुजं शीघ्रम् ।
लङ्कां प्रविश्य नगरीं अभिषेचय राक्षसेश्वरस्य पदे ॥ 2

स तदाज्ञया विभीषणमादाय सह प्लवङ्गमाध्यक्षैः ।
लङ्कां प्रविश्य तूर्णं विससर्ज हरीन् जलं समानेतुम् ॥ 3

आदाय तेऽपि कलशान् सौवर्णान् वारिराशितस्तोयम् ।
आनिन्यिरे च सहसा रामं स्थिरसङ्गरं प्रशंसन्तः ॥ 4

अथ लक्ष्मणो विभीषणमभिषेकार्थे निवेश्य मणिपीठे ।
कलशोदकेन विधिवत् तमभ्यषिञ्चद्दशास्यराज्यपदे ॥ 5

अभिषिक्तः स च तेन प्रहृष्टचित्तः फलानि कुसुमानि ।
आदाय रघुवरेण्यं प्रत्यागम्य प्रणम्य तानि ददौ ॥ 6

कृतकार्यं प्रणतं तं रामः परिरभ्य बाहुयुगलेन ।
दत्तानि तेन तानि प्रेम्णा प्रत्यग्रहीत्स तत्प्रीत्यै ॥ 7

वीक्ष्यान्तिके वसन्तं रामोऽतिविचक्षणं हनूमन्तम् ।
आह तमाशु गत्वा प्रियमाख्याहीति जनकतनयायै ॥ 8

स च रामचन्द्रवचनात् प्रविश्य लङ्कामशोकतरुमूले ।
निवसन्तीमतिमलिनां सीतां प्रणनाम सविनयं भक्त्या ॥ 9

दृष्ट्वा वायुतनूजं जनकतनूजा प्रसन्नवक्त्राब्जा
सद्यो बभूव सोऽपि प्रियमस्यै सर्वमाचचक्षेऽथ ॥ 10

मैथिलि भवदपकारिणमाजौ हत्वा दशाननं घोरम् ।
कुशली रघुप्रवीरः लक्ष्मणरविसुतविभीषणैः सार्धम् ॥ 11

इति मातरिश्वतनये कथयति तस्य प्रहृष्टचित्ता सा ।
नोवाच किञ्चिदपि तं तूष्णीं तस्थौ च नम्रवक्त्राब्जा ॥ 12

आलोक्य तामवचनां वातिः प्रोवाच विनम्रवक्त्राब्जाम् ।
देवि प्रहर्षितव्ये विषये रामस्य किं विषण्णासि ॥ 13

सा हनुमतेति पृष्टा समब्रवीत्पारितोषिकं तुभ्यम् ।
दातुं न किमपि हस्ते ममेति चिन्ताकुला भवामि भृशम् ॥ 14

तस्या निशम्य वचनं तथ्यं युक्तं च मारुतिः प्रीतः ।
इत्यब्रवीच्च सीतामिच्छामि तवापकारिणीर्हन्तुम् ॥ 15

सीताब्रवीत्पुनस्तं नैता हन्तुं त्वमर्हसि हनूमन् ।
एतासु कोऽपराधो निशाचरीष्वमरवैरिवशगासु ॥ 16

इच्छामि विजितशत्रुं द्रष्टुं प्राणेश्वरं ससौमित्रिम् ।
विससर्जेति तमुक्त्वा सोऽपि प्रापाशु राघवाभ्याशम् ॥ 17

तमथ प्रणम्य हनुमान् सीतावक्यं निवेदयामास ।
रघुवीरभाववेदी विनयानतकन्धरो विनीतात्मा ॥ 18

वचनं निशम्य रामो हनूमतस्तद्विभीषणमुवाच ।
मत्सविधमानय सखे सीतां स्नातामलङ्कृतां चेति ॥ 19

आकर्ण्य तस्य वचनं प्रविश्य लङ्कां विभीषणः सहसा ।
प्रणिपत्य जनकतनयां रामस्य वचो निवेदयामास ॥ 20

श्रुत्वा जनकतनूजा पत्युर्वचनं विभीषणस्य मुखात् ।
इच्छामि राममीक्षितुं अस्नातैवेत्युवाच तं शनकैः ॥ 21

तस्या निशम्य वचनं निजगाद विभीषणो विनीतात्मा ।
तव भर्तुरेव वचनात् कथयमाम्येवं तथा कुरुष्वार्ये ॥ 22

श्रुत्वा विभीषणमुखात् पत्युर्वचनं पतिव्रता सीता ।
अस्तु तथेत्यनुमेने तां प्रमदाश्चक्रुरञ्जसा स्नाताम् ॥ 23

अथ भूषितामनर्घैर्वसनाभरणैर्धृतोत्तरीयां ताम् ।
आदाय राक्षसेन्द्रः शिबिकारूढामुपासदद्रामम् ॥ 24

कृत्वाञ्जलिं कृतज्ञो विभीषणो जनकजासमागमं तस्मै ।
रघुवीराय तदाख्यत् स च तामानय सकाशमित्यूचे ॥ 25

आकर्ण्य तस्य वचनं विभीषणः प्लवगऋक्षरात्रिचरान् ।
उत्सारयाञ्चकार प्रबलैः कञ्चुकिभिराशु वेत्रकरैः ॥ 26

आलोक्य धावतस्तान् सकलानीकान् समन्ततस्त्वरया ।
दाक्षिण्येन तदानीम् निवर्तयामास राघवो महता ॥ 27

संरब्धतरमवोचत् प्राज्ञं पौलस्त्यनन्दनं रामः ।
सोपालम्भं सुतरां वचनं इदं निर्दहन्निवाक्षिभ्याम् ॥ 28

मामविगणय्य किं वा क्लेशयसीत्थं *भृशं समस्तजनान् ।
उद्वेगमेवमधुना त्यज नन्वेते विभीषण मदीयाः ॥ 29

---

* "जनान् मदीयांस्त्वम्" इति कथनं युज्यते ।

क्रतुसमये च विवाहे घोरे समरे(व्यसने)स्वयंवरे समितौ ।
आलोकनं हि रमण्या रक्षोऽधिपते न दुष्यति क्वापि ॥ 30

तदियं सङ्गरभूमिः सुमहद्व्यसनं च गतवती सीता ।
मत्सविधं च विषेषात् दर्शनमस्या भवेन्न दोषाय ॥ 31

तस्माद्विभीषणेमामानय सविधं जनकराजसुताम् ।
एषा विलोकयतु मां सुहृद्गणैरावृतं भृशं स्निग्धैः ॥ 32

इति वदति रामचन्द्रे विनयोपेतो विभीषणः सहसा ।
सीतामुपानिनाय प्रेक्ष्यैनां राघवो रुषा युयुजे ॥ 33

तं वीक्ष्य तीव्ररोषं विभीषणो द्युमणिवायुसुतमुख्याः ।
कपयश्च शोकमगमन् विरक्तमस्याममुं विदित्वैव ॥ 34

त्रपया विलीयमाना गात्रेषु विनमितम्लानमुखाब्जा ।
समुपाजगाम सीता पत्युः सविधं विभीषणानुगता ॥ 35

चेलाञ्चलावृतमुखी संसदि सर्वस्य महीसुता त्रपया ।
पत्युः समेत्य पार्श्वं रुरोद दुःखातुरा तदातितराम् ॥ 36

पतिदेवता क्षितिसुता पत्युर्वदनं चिरादहृष्टमियम् ।
हर्षाश्चर्यसमेता विलोकयामास विगतिशोकहरम् ॥ 37

पार्श्वस्थितां तदानीं प्रह्वां प्रसमीक्ष्य जनकराजसुताम् ।
हृदयान्तर्गतरोषो वक्तुमुपाक्रमत रावणारातिः ॥ 38

यत्कर्तव्यं पुंसा तत्कृमखिलं मयाऽधुना तरसा ।
शोकावमानविमताः समुद्धृता युगपदेव जनकसुते ॥ 39

सफलः परिश्रमो मे समजनि समरेषु संहृताराते: ।
सुग्रीववायुनन्दनविभीषणानां च जनकराजसुते ॥ 40

तेजस्वी च कुलीनः सद्वृत्तः परगृहोषितां प्रमदाम् ।
पुनरङ्गीकुरुते कः सौहार्दसमन्वितेन हृदयेन ॥ 41

दशकन्धराङ्कपतितां दुष्टेन तदीयचक्षुषा दृष्टाम् ।
[1]पुनराददीय भवतीं महत्कुलं व्यपदिशन् कथं सीते ॥ 42

सम्प्राप्य शीलविलयं तिष्ठस्यधुना पुरः किमर्थं मे ।
नेत्रातुरस्य पुरतो जनस्य दीप इव जनकराजसुते ॥ 43

नास्ति मम त्वयि भद्रे जनकतनूजे [2]कदाप्यभिष्वङ्गः ।
तस्माद्गच्छ यथेष्टं सत्वरमधुना मयाप्यनुज्ञाता ॥ 44

कार्यं त्वया न मे त्वं याहि दिशं यत्र वसतिरभिरुचिता ।
अथवा विभीषणेऽस्मिन् सौम्ये वा लक्ष्मणेऽपि वा भरते ॥ 45

इति गदिता जनकसुता संसदि रोषान्वितेन रामेण ।
अश्रूणि मार्जयन्ती गद्गदकण्ठी तमित्युवाच शनैः ॥ 46

एतादृशं वचो मां श्रावयसे किं नु दारुणमिदानीम् ।
असदृशमतिरूक्षमिदं रघुवीर प्राकृतमिवातितराम् ॥ 47

---

1. दा with आ to take, potential mood Ist person singular.

2. अल्पोऽप्यभिष्वङ्गः इति कथनं युक्तं भाति ।

न तथास्म्यहं कदाचिद्यथा त्वमवगच्छसि प्रकामं माम् ।
विश्वसिहि वीरराघव चारित्रेणैव ते शपे स्वेन ॥ 48

नाथ रघूद्वह शङ्का त्वया न कार्या मयि प्रमादवशात् ।
रक्षोगृहोषिताया अपि मम चित्तं विजानता विमलम् ॥ 49

तद्गात्रस्य स्पर्शमहं यद्यपि विवशा गतास्मि रघुवीर ।
एष किल कामकारो न मदीयः किं तु देवताधीनः ॥ 50

वरो वायुतनूजो विसर्जितो मद्गवेषणाय यदा ।
लङ्कापुरीगताहं किं वा भवता तदा न सन्त्यक्ता ॥ 51

अमुञ्चत्तदा भवान् मां यद्यचिरेण त्यजेयमेवासून् ।
ससुहृज्जनस्य भवतो न वृथैष भवेत्परिश्रमो राम ॥ 52

एवं जनकतनूजा कथयन्ती बाष्पगद्गदं शोकम् ।
दीनं ध्यानसमेतं सौमित्रिं वीक्ष्य वाक्यमिदमूचे ॥ 53

मिथ्यापवादिताहं जीवितुमिच्छामि नैव सौमित्रे ।
विरचय चितां सुविपुलां ज्वलनं प्रविशामि सम्भृतज्वालम् ॥54

उक्त इति भूमिपुत्र्या सौमित्रिर्वीक्ष्य राघवस्य मुखम् ।
तद्दृष्टिचोदितः सन् चितामतानीत् समुच्छ्रितं शोचन् ॥55

राममधोमुखमथ सा प्रदक्षिणीकृत्य पावकं दीप्तम् ।
उपसृत्य वीतशङ्का तस्मै प्रणिपत्य वाक्यमिदमूचे ॥ 56

पावक परिशुद्धाहं मनसा वाचा च कर्मणा चापि ।
रघुनन्दनं विनान्यं पुरुषं यदि नाद्रियेऽथ भव शीतः ॥ 57

इति जानकी वदन्ती प्रविवेश हुताशमुरुतरज्वालम् ।
रक्षः कपिगणसविधे पश्यत्सु देवेषु किं च दैत्येषु ॥ 58

कौसुम्भमम्बरमभूत् कटीतटे कुङ्कुमं कुचद्वन्द्वे ।
कण्ठे निशा कबर्यां हल्लकमाला च हव्यवाहोऽस्याः ॥ 59

अपि च कचशैवलभरैः निरुपमनयनयुगजलधरैःसुभगैः ।
अधरप्रवालतिलका ग्रीवाशङ्खकुचचक्रवाकैश्च ॥ 60

बाहाबिसत्रिवलिकातरङ्गनाभीमनोहरावर्तैः ।
प्रपदद्वयीकमठिकाचरणकराननसरोरुहैर्नव्यैः ॥ 61

अपि लावण्यजलौघैः समाकुला जनकराजतनयायाः ।
रेजे तदा हुताशः पद्माकर इव स सम्भृतज्वालः ॥ 62

तस्यां तथा विशन्त्यां हुताशनं दीप्तममलचित्तायाः ।
दुःखादुदश्रुनयना हाहेति प्लवगराक्षसा नेदुः ॥ 63

तेषां निशम्य घोषं रामोऽपि दुःखितो भृशं दध्यौ ।
आजग्मुरेनममरा हरं पुरोधाय वेधसं च तदा ॥ 64

राघवमथाब्रुवंस्ते प्राञ्जलय उद्धृत्य भूषितान् बाहून् ।
ज्वलितेऽनले पतन्तीं सीतां समुपेक्षसे *जगत्स्वामिन् ॥ 65

---

* कथं इति युक्तम् ।

इति देवेषु वदत्सु प्रत्यूचे तान् सविस्मयो रामः ।
कोऽहं ब्रूथ यथार्थं यदि वा जानीथ यदि मम प्रभवम् ॥66

इति वदति रामचन्द्रे ब्रह्मा तमुवाच सन्निधौ घुसदाम् ।
त्वं शङ्खचक्रधारी विष्णुः सर्वात्मको जगत्कर्ता ॥ 67

जन्मजरान्तरहितं प्रकृतेः परमद्वयं गुणातितरम् ।
सत्यं चिन्मयममलं पुरुषं त्वां आमनन्ति वेदान्ताः ॥ 68

अन्तःस्थितोऽपि जगतां अनवच्छिन्नो हि देहिभिर्देव ।
देवास्तव स्वरूपं न विजानन्त्येव किम्पुनर्मनुजाः ॥ 69

सङ्क्रान्तोऽपि विवस्वान् वारिषु धरणीतले समस्तेषु ।
एकस्तथाप्यनेकस्त्वमपि विभोऽन्तः स्थितोऽसि जन्तूनाम् ॥ 70

तव मूर्तिरखिलदेहे तिलेषु तैलमिव सर्वतो व्याप्ता ।
न विजानन्ति भवन्तं सहैव सन्तं विपश्चितोऽपि विभो ॥ 71

रज्जावहिरिव शुक्तौ रजतमिवेदं भाति जगत्समस्तम् ।
असदपि सदिव समिन्धे देव त्वन्मायया दशास्यरिपो ॥72

सृष्टेस्त्वमेव कर्ता पालयिता च त्वमेव लोकानाम् ।
संहर्ता च तथान्ते त्वमेव राम त्रिमूर्तितामयसे ॥ 73

सीता सरोजनिलया त्वं विष्णुर्भूतभव्यभवदीशः ।
रावणवधाय देव राम त्वं मानुषमाश्रितो वपुर्देव ॥ 74

इति वेधसा समुदिते वचने तथ्येऽथ पावकः सहसा ।
अवधूय काष्ठसञ्चयमादायाविर्बभूव भूपुत्रीम् ॥ 75

उद्यद्दिवाकररुचिं प्रतप्ततपनीयभूषणप्रकराम् ।
अक्लिष्टमाल्यकबरीं रामायादाद्वचोऽप्युवाचेदम् ॥ 76

शृणु राम भूमिजैषा त्रिकरणशुद्धा पतिव्रता नियता ।
रक्षोगृहोषितापि त्वद्गतचित्तैव परिगृहाणैनाम् ॥ 77

इन्द्रादिदेववन्दित सान्द्रदयामन्दिरेक्षणाम्भोज ।
श्रीरामचन्द्र रघुकुलपाथोनिधिचन्द्र पाहि वैदेहीम् ॥ 78

इत्युक्तवति हविर्भुजि रामस्तमुवाच देवतासविधे ।
जानामि शुद्धभावां जनकतनूजामयोनिजामग्ने ॥ 79

रक्षोगृहोपरुद्धां रामो जग्राह कामपरतन्त्रः ।
इति लोकवादभीत्या समुपेक्षितेयं विशन्त्यपि ज्वलनम् ॥ 80

इति राघवे ब्रुवाणे पशुपतिरभ्येत्य चाब्रवीदेनम् ।
तातस्तवागतोऽयं दाशरथे व्योमयानमधिरूढः ॥ 81

अस्मै कुरु प्रणामं सावरजो देवताशरीराय ।
इति शम्भुनोपदिष्टस्तथैव चक्रे रघूद्वहो भक्त्या ॥ 82

आलिङ्ग्य सानुजं तं पङ्क्तिरथो हर्षगद्गदाक्षरया ।
वाचा प्रशस्य राघवमूचे वचनमिदमुरुतरप्रीतिः ॥ 83

शृणु राम मैथिलीयं परिशुद्धैनां गृहाण पतिदेवाम् ।
देवद्विजावमन्ता दिष्टया निहतो दशाननः क्रूरः ॥ 84

गत्वा पुरीमयोध्यां अभिषेचय शीघ्रमात्मराज्ये त्वाम् ।
धर्मेण पालय महीमित्यादिश्यागमद्दिवं भूयः ॥ 85

इत्यार्यारामायणे अष्टाविंशः सर्गः ॥

॥ एकोनत्रिंशः सर्गः ॥

आचख्युरथ सुरास्ते पुरहरपुरुहूत पद्मजप्रमुखाः ।
राम वृणीष्व वरं त्वं सम्प्रीता घोरवैरिहननेन ॥ 1

इति तैर्मुदा समुदितो वरं ययाचे स तानथ दयालुः ।
जीवयत राक्षसबलैर्निहतान् भल्लूक वानरान् समरे ॥ 2

अस्तु तथेति सुराः स्वान् राघवमामन्त्र्य जग्मुरावासान् ।
तद्दृष्टिपातपूताः सम्फुल्लसरोजभासमानमुखाः ॥ 3

अथ *दानवाहितवरात् लब्धप्राणान् समीक्ष्य भल्लूकान् ।
शाखामृगानपि तथा हर्षमवापानुजेन सह रामः ॥ 4

---

* दानवानां अहिताः देवाः तेषां वरात् ।

सोऽपि परिगृह्य सीतां तद्रात्रिं तत्र सह तयाऽनैषीत् ।
प्रातः समेत्य रामं विभीषणः सानुजं प्रणम्योचे ॥ 5

स्नात्वाम्बरानुलेपन भूषणमाल्यै र्विभूषय स्वाङ्गम् ।
इत्युक्तवन्तमेनं स चाब्रवीन्न्यायगर्भितं वचनम् ॥ 6

भरतेन सुचरितवानहं नाङ्गीकुर्यां विनाहमेतानि ।
शाखामृगाम्बुवाहाः क्ष्वेलस्तनिता दृगुल्लसच्चपलाः ॥ 7

एते गिरितरुवर्षैरनाशयन्नखिलराक्षसदवाग्निम् ।
आतो विभीषणैनान् रत्नैर्विविधैविभूषणैर्दिव्यै : ॥ 8

प्रीणय वसुप्रदानैरित्युक्तस्तेन स च तथा चक्रे ।
तमुर्दीर्येति सहर्षं हरिसुतमाहूय कृतसुहृत्कार्यम् ॥ 9

श्रान्तोऽसि वानरविभो गच्छपुरीमित्यवोचदथ रामः ।
आकर्ण्य तस्य वचनं रविसूनुर्वाक्यमब्रवीत् धृतिमान् ॥10

श्रान्तिः कुतो महात्मन् पुंसां त्वत्पादसेविनां अनिशम् ।
सह रामचन्द्र भवता समेत्य साकेतमधिगतैश्वर्यम् ॥ 11

भद्रासने भवन्तं प्रतिष्ठितं वीक्ष्य तदनु यास्यामि ।
इत्युक्तवति हरीन्द्रे पुष्पकमानीय रावणस्याग्र्यम् ॥ 12

अरोप्य तत्र सीतां सहानुजेनारुरोह रघुवीरः ।
तदनु विभीषणवायुजवालिसुतजाम्बवत्प्रमुखाः(न्) ॥13

आरुह्य निखिलहरयो यथासुखं तत्र तत्र ते न्यवसन् ।
आरुढे हरिसैन्ये सकले रामस्य शासनाद्दिव्यम् ॥ 14

पुष्पकमथोत्पपात प्रभूतशोभं पदं तदा विष्णोः ।
गच्छन् स गगनमार्गे रक्षःसैन्यं हतं रणक्षोण्याम् ॥ 15

परिदर्शयन् प्रियायै सेतुं महतीं शुभं च वारीशम् ।
विपथानि काननानि व्यतीत्य देशान् गिरीन् महेन्द्रादीन् ॥ 16

प्राप प्रभूतशोभां वानरकुलराजपालितां नगरीम् ।
तामालोक्य मनोज्ञां कथितां रामेण सपदि किष्किन्धाम् ॥17

सीताब्रवीत्प्रहृष्टा रामं रावणनिषूदनं प्रेम्णा ।
सह वानराङ्गनाभिर्नगरीं नाथ प्रवेष्टुमिच्छामि ॥ 18

इति मैथिलीसमीरितमाकर्ण्यास्थापयद्विमानमसौ ।
तत आहूय सखायं सुग्रीवं प्लवगसङ्घमध्यगतम् ॥ 19

सीतामनोरथं तं रामस्तस्मै शशंस हृष्टात्मा ।
सोऽप्यवरुह्य विमानात् प्रविश्य नगरीं प्रहृष्टकीशगणाम् ॥ 20

अधिगम्य मन्दिरंस्वं ताराप्रमुखा उवाच कपिकान्ताः ।
इच्छति रघुवरपत्नी गन्तुमयोध्यां सहैव भवतीभिः ॥ 21

तद्भूषिताः समस्ताः निर्यान्तु विमानमग्र्यमधिरोढुम् ।
आकर्ण्य तस्य वचनं ताराप्रमुखाः समस्तकपिकान्ताः ॥ 22

धृतचित्रवसनभूषास्तदध्यरुक्षन् विमानमतिशोभम् ।
सीतां प्रणम्य मुदितास्तस्थुस्तस्याः समीपतःसर्वाः ॥ 23

अथ रामचन्द्रवचनात् तत्पुष्पकमुत्पपात गगनतलम् ।
गच्छन्नुवाच रामः *सीतामालोक्य ऋश्यमूकाद्रिम् ॥ 24

अस्मिन् गिरौ ममाभूत् सुग्रीवस्यापि सख्यमेतादृक् ।
आलोकयेह सीते पम्पां सम्फुल्लपद्मकल्हाराम् ॥ 25

दृष्ट्वैनामतिरम्यां विरहात्तव मे मनो बहु क्लान्तम् ।
पम्पायास्तीरेऽत्र दृष्टा शबरी तपस्विनी नियता ॥ 26

अत्र निहतः कबन्धः योजनबाहुः निशाचरो घोरः ।
प्रेयसि विमानवेगात् प्राप्ताः स्मः पावनं ज़नस्थानम् ॥ 27

यत्रावसाम शरदस्तिस्रः साग्राश्च साकमनुजेन ।
अत्र खलु राक्षसी सा विरूपिता लक्ष्मणेन शूर्णखा ॥ 28

अत्र खलु राक्षसबलं निहतं खरदूषणादिभिः सहितम् ।
मायामृगेण मामिह पङ्क्तिमुखो हन्त दूरमपवाह्य ॥ 29

अहरत्कौणपस्त्वामस्मिन् सीते ममाश्रमे रम्ये ।
आगस्त्यमाश्रममिदं लोपामुद्राविवर्धितक्षितिजम् ॥ 30

एतत्प्रसन्नसलिलं भ्रातुरगस्त्यस्य चाश्रमं रम्यम् ।
आश्रममण्डलमेतत् पश्य पवित्रं प्रसन्नसाकारम् ॥ 31

---

* गच्छन्नुवाच रामः सीतां पश्येममृश्यमूकाद्रिम् इति पाठः सङ्गतः भाति ।

अस्माकमत्र वसतां दश व्यतीयुः समाः सुखेनैव ।
आश्रममिदं सुरम्यं पश्य सुतीक्ष्णस्य दृश्यते सीते ॥ 32

एतद्विभाति पुरतः शरभङ्गस्याश्रमं महापुण्यम् ।
अत्रेराश्रममेतत्पवित्रमतिविस्तृतं तपस्वियुतम् ॥ 33

पश्य प्रिये ससानुं विचित्रकूटं च चित्रकूटगिरिम् ।
नीलमणिजालनीलां पश्य त्वं पद्मलोचने यमुनाम् ॥ 34

स्फटिकशिलाविमलजलां गङ्गामपि मङ्गलप्रदां भजताम् ।
मध्ये तयोः पवित्रं पश्य भरद्वाजमुनिवरस्य शुभम् ॥ 35

आश्रमममोघविघटनपटुतरपावनचलितधूमाग्निम् ।
इत्याश्रमाणि रामः प्रेयस्यै दर्शयन् प्रसन्नात्मा ॥ 36

संस्थाप्य तत्र विमानं अदर्शयच्छृङ्गिबेरनगरं च ।
सैषा गुहस्य नगरी यत्र मयाऽबन्धि सानुजेन जटा ॥ 37

तत्रैव गुहसुमन्त्रौ विसर्जितौ जाह्नवीतटस्थल्याम् ।
समदर्शयत्प्रियायै प्रतिष्ठितं स्वर्गमिव ततः क्षोण्याम् ॥38

साकेतमुच्चगोपुरमुत्तोरणमुच्छ्रितध्वजस्फीतम् ।
अभिवीक्ष्य राजधानीमिक्ष्वाकूणां महानुभावानाम् ।
नेमुः कपिप्रवीरा बद्धाञ्जलयो ह्यवाप्तनेत्रफलाः ॥

इत्यार्यारामायणे एकोनत्रिंशः सर्गः ॥

।। त्रिंशः सर्गः ।।

अवरुह्याथ विमानात् सह सीतालक्ष्मणप्लवङ्गबलैः ।
चीरिभिरुपास्यमानं रामः प्रणनाम तं भरद्वाजम् ।। 1

प्रणतं तमथ मुनीन्द्रः सपर्यया पर्यपूजयत्प्रणयात् ।
हृष्टमनाः स च सम्यक् तस्य सदारस्य कुशलमप्राक्षीत् ।। 2

भरतस्य साधुवृत्ते समातृवर्गस्य कुशलमप्यखिलम् ।
पप्रच्छ सोऽपि तस्मै शशंस कुशलं च तद्गतं सकलम् ।। 3

भूयः प्रसन्नचेता रघुवीरमुवाच तं भरद्वाजः ।
वनवासे तव वृत्तं प्रत्यग्दृष्ट्याऽवलोकितं सर्वम् ।। 4

दिष्ट्या त्वया विनिहतो देवरिपू रावणो रणे शूरः ।
दिष्ट्या विमोचितेयं सीता क्रूरेण तेन संरुद्धा ।। 5

प्रीतोऽस्मि कर्मणा तव वरमिष्टं ददामि रघुवीर ।
तस्मिन्निति ब्रुवाणे रामो वव्रे वरं तदाऽभीष्टम् ।। 6

आसाकेतममुष्मिन् विपिने पार्श्वद्वये स्थिता वृक्षाः ।
सततं भवन्तु फलिताः परितः षड्योजनान्तरालगताः ।। 7

अस्तु तथेति स हृष्टो दत्त्वाऽस्मै राघवाय वरमेनम् ।
तमथ प्रहृष्टमानसमातिथ्येन च निमन्त्रयाञ्चक्रे ।। 8

आहूय रामभद्रस्ततो हनूमन्तमिति तदावोचत् ।
गच्छ भरताय शीघ्रं शंस तमात्मानमागतं विपिनात् ॥ 9

गच्छन् प्रविश्य मार्गे सख्युर्नगरं च शृङ्गिबेराख्यम्
आवेदय प्रवृत्तिं मम स च प्रीतिमनुभवत्वधिकाम् । 10

इत्युक्तः स च सहसा रम्यं परिगृह्य मानुषं रूपम्
उत्प्लुत्य गगनमार्गं प्रतिपद्य गुहस्य नगरमभिपेदे ॥ 11

आख्याय राघवस्य प्रवृत्तिमस्मै प्रपूजितोऽनेन ।
तत उत्प्लुत्य स वेगात् पवनस्य पथा समासददयोध्याम् ॥12

क्रोशान्तरे स तस्यां नन्दिग्रामे तपस्विवेषधरम् ।
भरतं विलोक्य गगनात् अवतीर्य ननाम तं प्रहृष्टमनाः ॥ 13

रघुवीरस्य स दूतं ज्ञात्वा तं तत्प्रवृत्तिमप्यखिलाम् ।
आकर्ण्य तस्य वचनात् तस्मै बहु पारितोषिकं प्रददौ ॥ 14

निवसति कुत्र ममार्यः पृष्टस्तेनेति मारुतिर्भूयः ।
आख्यदमुमाश्रमपदं गतो भरद्वाजमुनिवरस्येति ॥ 15

आकर्ण्य तस्य वचनं प्रीतः शत्रुघ्नमब्रवीदनुजम् ।
कारय पुरस्य शोभां विशेषपूजां च सकलदेवानाम् ॥ 16

श्रुत्वा स तस्य वचनं तथैव चक्रे यथोदितं तेन ।
भरतस्ततः सुमन्त्रं मन्त्रिणमाहूय वाक्यमिदमूचे ॥ 17

संयोजयाशु सेनां आर्यप्रत्युद्गमाय सगजाश्वाम् ।
पौरान् द्विजातिमुख्यान् श्रेणीमुख्यांश्च सह महामात्यैः ॥ 18

इत्याज्ञाप्य सुमन्त्रं सहर्षपीयूषसिन्धुमग्नमनाः ।
मारुतिना सह कथयन् रामस्य गुणान्निनाय तां रजनीम् ॥ 19

प्रातः पुरोधसा सह स मन्त्रिवर्गेण मातृवर्गं च ।
आनाय्य तत्र भरतो रामागमनं विलोकयन् तस्थौ ॥ 20

स पुष्पकमुदीक्ष्य ततो प्रभया विद्योतयद्दिशो गगने ।
तद्वीक्ष्य जातहर्षो भरतः प्रत्युद्ययौ रघुप्रवरम् ॥ 21

आलोक्य पुष्पकगतं सीतालक्ष्मणसमन्वितं हर्षात् ।
भरतो ननाम रामं भक्त्या भूम्यामपातयद्गात्रम् ॥ 22

अवरुह्य वाहनेभ्यः प्रणेमुरखिलाः प्रजाश्च तं भक्त्या ।
हर्षाश्रुपूर्णनयनाः सुमेरुशैलस्थमिव विवस्वन्तम् ॥ 23

संस्थाप्य पुष्पकं तद्रामस्तत्राधिरोहयामास ।
भरतं समातृवर्गं हर्षादुत्फुल्ललोचनः सहसा ॥ 24

अभ्येत्य सोऽपि रामं पुनरपि निपपात पादयोर्भक्त्या ।
प्रणतं सोऽपि भुजाभ्यां आलिङ्ग्याङ्के न्यवेशयत्प्रेम्णा ॥25

अथ लक्ष्मणेन नमिते ननाम सीतां च रविसुतप्रमुखान् ।
आलिङ्ग्य जाम्बवन्तं विभीषणं चाब्रवीदमुं प्रीतः ॥ 26

आर्यो ममातिबलवान् सम्यति भवतःसहायमधिगम्य ।
देवासुरैरवध्यं रावणमवधीत्तपोबलोत्सिक्तम् ॥ 27

उक्त्वेति तं स भूयः समासदद्राघवं विमानाग्रे ।
संस्थाप्य तं स चाङ्के कुशलं पप्रच्छ रघुवरः प्रीतः ॥ 28

शत्रुघ्नोऽपि तदानीं प्रणम्य रामं च लक्ष्मणं सीताम् ।
तस्थौ तस्य समीपे कपीन् समालिङ्ग्य जाम्बवत्प्रमुखान् ॥ 29

तत उत्थाय सहर्षं रामः प्रणनाम मातरं हृष्टाम् ।
तदनु वसिष्ठं च गुरुं जननीः सर्वा यथोचितं धीमान् ॥ 30

अथ राघवाज्ञयाग्र्यं पुष्पकमेतत् समाससाद शनैः ।
भरताश्रममतिरम्यं प्रजाभिरखिलाभिरनुगतं च बलैः ॥ 31

अवतार्य तत्र पुष्पकमवतीर्यास्माद्रघुप्रवीरोऽसौ ।
तस्मै ददावनुज्ञां वोढुं भूयोऽपि विश्रवस्तनयम् ॥ 32

अथ पादुके परार्घ्ये भक्त्या संयोज्य पादयोर्भ्रातुः।
भरतो व्यजिज्ञपदमुं स्वीकुरु राज्यं त्वदीयमार्येति ॥ 33

कोशश्च दशगुणस्ते विवर्धितस्तमपि पश्य रघुवीर ।
मुक्त्वा जटास्त्वमधुना शीघ्रं राज्येऽभिषेचयात्मानम् ॥ 34

विज्ञापितस्तदानीं भरतेन भ्रातृवत्सलेनेत्थम् ।
प्रथमं व्यमोचयदसौ तस्य जटा लक्ष्मणस्य पश्चात् ॥ 35

संस्नाप्य तौ पुरस्तात् स्वयमपि सस्नौ सुगन्धितोयेन ।
अम्बरसुगन्धिमाल्याभरणान्याभ्यां सहैव सोऽङ्गचकरोत् ॥36

कौसल्यापि तदानीं वसनाभरणैर्विभूष्य वैदेहीम् ।
सकलाः कपिवरकान्ता रत्नाभरणैरभूषयद्दिव्यैः ॥ 37

भरताज्ञया सुमन्त्रः रथमानिन्ये ततो विधेयाश्वम् ।
समुदञ्चितध्वजाग्रं विभूषितं व्योमयानमिव चित्रम् ॥ 38

अथ मन्त्रिणां प्रजानां कर्म कपीन्द्रस्य वानरर्क्षाणाम् ।
कथयन् विभीषणस्य चचाल तस्माद्रघुप्रवीरोऽसौ ॥ 39

तत आरुरोह स रथं रश्मीञ्जग्राह तस्य भरतोऽथ ।
सौमित्रिरातपत्रं चामरयुगळं विभीषणकपीन्द्रौ ॥ 40

रामाज्ञयाध्यरुक्षद् द्विरदं शत्रुञ्जयाभिधं हरिराट् ।
अधिगतमानुषरूपा हरयोऽपि नव द्विपान् सहस्राणि ॥ 41

सह तूर्यशङ्खघोषैर्गजबृंहित वाजिहेषितप्रमुखैः ।
प्रविवेश राजधानीं प्रकीर्यमाणः समन्ततो लाजैः ॥ 42

आसाद्य राजमन्दिरमवतीर्य रथात्सहानुजो रामः ।
रविसुत विभीषणाभ्यां सहितः प्रविवेश मन्त्रिभिः सहितः ॥43

नृपभवनं प्रविशन्तं तूर्यरवापूर्यमाणहरिदन्तम् ।
अभ्याययुः सुवेषाः षोडश कन्याः सह द्विजप्रवरैः ॥ 44

तत्रासने निषण्णं परिवव्रुः समन्ततः सचिवाः ।
प्राप्तोदयस्तदासौ नक्षत्रैरिव निशाकरो रेजे ॥ 45

अथ भरतमन्तिकस्थं रघुवीर उवाच मन्द्रया वाचा ।
दर्शय मन्दिरमेतद्विभीषणप्लवगराजयोरिति तम् ॥ 46

स च तौ करौ गृहीत्वा प्रविश्य शुद्धान्तमखिलमप्यनयोः ।
अभितश्च दर्शयित्वा पुनरपि रामं समासदद् विनयात् ॥ 47

रघुवरमथाभिषेक्तुं रविसुतमाहूय सोऽब्रवीत्प्रणयात् ।
आनेतुमब्धितोयं चतुरः प्रेषय कपिवरानिति तम् ॥ 48

तस्याज्ञया कपिवराः कलशानादाय सपदि सौवर्णान् ।
मारुतिजाम्बवदाद्याश्चतुरब्धीनामथानयन् वारि ॥ 49

अथ रघुवरं वसिष्ठः सीतासहितं निवेश्य मणिपीठे ।
मुनिभिः सहाभ्यषिञ्चद् गुरुरिव शक्रं समन्वितो देवैः ॥ 50

त्रिदशाः शतक्रतुमुखास्त्रिविष्टपादेत्य गगनमार्गस्थाः ।
तस्याभिषेकलक्ष्मीं पश्यन्तो हर्षमापुरत्यर्थम् ॥ 51

छत्रं दधौ स मूर्ध्नि शत्रुघ्नस्तस्य पूर्णचन्द्रनिभम् ।
रविसुतविभीषणावपि चामरयुगळं शशाङ्करशोभम् ॥ 52

समये तत्र समीरः समेत्य रामाय शतमखनियोगात् ।
शतकनककमलकलितां मालां हारं मनोहरं च ददौ ॥ 53

अप्सरसोऽपि समन्तात् ननृतुः परितो जगुश्च गन्धर्वाः ।
भूमिः सस्यसमृद्धा फलभरभरिताः सकलपादपा आसन् ॥54

अयुतं महाहयानां धेनूनामपि तथा सवृषभाणाम् ।
रामो ददौ द्विजेभ्यस्त्रिंशत्कोटीस्ततथा सुवर्णानाम् ॥ 55

वसनानि भूषणान्यपि विविधानि मनोज्ञरत्नखचितानि ।
स्रजमपि रत्नविचित्रां सुग्रीवायाददात्प्रहृष्टोऽसौ ॥ 56

वैडूर्यरत्नचित्रे मणिभिर्वज्रैश्च भूषिते दिव्ये ।
उदितदिवाकररुचिनी तदाङ्गदायाङ्गदे ददौ धृतिमान् ॥ 57

मध्यमणिरश्मिरञ्जितमुडुगणपरिभावुकप्रभाभरितम् ।
रामस्तदातिरुचिरं तारं हारं ददौ च सीतायै ॥ 58

अवमुच्य सापि कण्ठादमलं हारं मनोहराकारम् ।
अवलोकयाञ्चकार प्लवगान् सर्वान् मुहुर्मुहुश्च पतिम् ॥ 59

तां वीक्ष्येङ्गितवेदी रामः प्रोवाच जनकराजसुताम् ।
तुष्टासि यत्र कान्ते तस्मै देहीति तावकं हारम् ॥ 60

कपिमध्ये निजबुध्या शिष्टं दक्षं समीक्ष्य हनुमन्तम् ।
निजकिरणजालविततं तस्मै हारं ददौ मुदा सीता ॥ 61

तदनु विभीषणरविसुतमारुतियुवराजजाम्बवत्प्रमुखान् ।
रामो हरीनशेषान् रत्नैर्वसनैश्च सत्कृतांश्चक्रे ॥ 62

हरयो रविसुतमुख्या दृष्ट्वा सर्वेऽपि राघवाभ्युदयम् ।
जग्मुस्तेन विसृष्टाः किष्किन्धां हृष्टमानसाः सर्वे ॥ 63

लब्ध्वा रघुप्रवीराल्लङ्काराज्यं विभीषणो धृतिमान् ।
सत्कृत्य सर्वकामैस्तेन विसृष्टो ययौ निजावासम् ॥ 64

धर्मेण राज्यमखिलं मनुरिव शासद्रघुप्रवीरोऽसौ ।
लक्ष्मणमवोचदेवं लक्ष्मण धर्मज्ञ मया सहैव त्वम् ॥ 65

अधुनापि राज्यभारं तथैव वह पूर्वराजनिर्व्यूढम् ।
अनुमेने न यदासौ युवराजपदे नियुज्यमानोऽपि ॥ 66

धीरो रघुप्रवीरो भरतं चक्रे तदैव युवराजम् ।
आजानुलम्बिबाहुर्विशालवक्षस्थलो महास्कन्धः ॥ 67

रामः शशास वसुधां लक्ष्मणसेवितपदारविन्दोऽसौ ।
ईजे मखैरशेषैरग्निष्टोमादिभिर्महावीरः ॥ 68

अकरोच्च वाजिमेधान् शतं ततो भूरिदक्षिणान् विविधान् ।
न विषाग्निवैरिजनिता न चापि चोरादिभीतिरप्यत्र ॥ 69

भूमिः प्रवृद्धसस्या सर्वा जाताः प्रजाश्च संहृष्टाः ।
इत्युक्तमेतदार्यैः पूर्वै रामस्य यःपठेन्मर्त्यः ॥ 70

सोऽप्याशु मुक्तपापः श्रेयः प्राप्नोति धीरतां याति ॥

इत्यार्यारामायणे त्रिंशः सर्गः ॥

॥ श्रीरस्तु ॥ श्रीकृष्णार्पणमस्तु ॥

॥ आर्यरामायणं समाप्तम् ॥


சரசுவதி மகால் நூலக அச்சகம்